M-40

SKM 104 | 89 (ख)

श्रीधर विरचिता भावार्थ दीपिका टीका

भागवत नवम स्कन्ध

समय — 1838 AD

पत्र — 51

भाषा — संस्कृत

पुस्तक् श्रीमद्भागवतकोनवमस्कंध पत्राणि ॥ ५२ ॥
श्रीपुस्तक् महंतश्रीचैतन्यदासजीकालोहार्गलकेमहंत

भा० न०
१

॥श्रीराधाकृष्णायनमः॥श्रीगोपालायनमः॥गुणानामगुणानांवा हैसेवे गुणं तेकरुणानिधिं॥तमहंशरणं[illegible]यामि
परमानंदमाधवं २ त्रिगुणाद्गभिरध्यायैर्वैवस्वतसुतान्वयः॥नवमेस्कंधसतत्कीर्तिर्वंशगायवितन्यते॥एवमुक्तोष्टमस्कंधे
सद्धर्मःसत्वशोधकः॥कर्तृपालकवक्त्रादिमन्वादीनांनिरूपणात्॥सद्धर्मेशुद्धसत्वानांमतरंगेशसत्कथाः॥सूर्यसो

॥श्रीकृष्णायनमः॥श्रीराजोवाच॥मन्वंतराणिसर्वाणित्वयोक्तानिश्रुतानिमे॥वीर्याण्यनंतवीर्य
स्यहरेस्तत्रकृतानिच॥१॥योसौसत्यव्रतोनामराजर्षिर्द्रविडेश्वरः॥ज्ञानंयोतीतकल्पांतेलेभेपुरुषसेवया॥
२॥सवैविवस्वतःपुत्रोमनुरासीदितिश्रुतं॥त्वत्तस्तस्यसुताःप्रोक्ताइक्ष्वाकुप्रमुखानृपाः॥३॥तेषांवंशंपृथक्ब्र
ह्मन्वंश्यानुचरितानिच॥कीर्तयस्वमहाभागनित्यंशुश्रूषतांहिनः॥४॥येभूतायेभविष्याश्चभवंत्यद्यतनाश्च
ये॥तेषांनःपुण्यकीर्तीनांसर्वेषांवदविक्रमान्॥५॥श्रीसूतउवाच॥एवंपरीक्षिताराज्ञासदसिब्रह्मवादिनां
॥पृष्टःप्रोवाचभगवान्शुकःपरमधर्मवित्॥६॥श्रीशुकउवाच॥श्रूयतांमानवोवंशःप्राचुर्येणपरंतप
नशक्यतेविस्तरतोवक्तुंवर्षशतैरपि॥७॥

मान्वयाख्यानैरधुनासंगतोच्यते॥४॥तत्रच॥त्रयोदशभिरध्यायैःसूर्यवंशोऽनुवर्ण्यते॥एकादशभिरध्यायैः
सोमवंशप्रस्ततःपरैः॥५॥तत्रतुप्रथमेध्यायेवैवस्वतसुतान्वये॥सोमवंशाद्वेशोत्थौ सुद्युम्नस्त्रीत्वमुच्यते॥६॥
उक्तानुवादएवैकंवैवस्वतमनोर्वंशएष्विति॥मन्वंतराणीतिपंचभिः॥७॥ १

अनुक्तं वंशं वक्तुं पूर्वोक्तमेव तावद्वंशं तत्प्रवर्तकं श्रीनारायणमारभ्यानुस्मारयति ॥ परावरेषामिति पंचभिः ॥ ८ ॥ नाभागं चेति पाठे पिनभगएव नाभागः ॥ १२ ॥ सूर्यपौत्रस्य स्त्रीत्वे सति बुधात् पुरूरवः प्रभृति सोमवंशसंचारं वक्तुं प्रस्तावमिलोपाख्यानमाह ॥ अप्रजस्य मनोः पूर्वमित्यादिनायावदध्यायसमाप्तिः ॥ एवमिक्ष्वाकुप्रभृतीनामुत्पत्तेः प्राक् ॥ १३ ॥ दुहित्रर्थं ममक-

परावरेषां भूतानामात्मा यः पुरुषः परः ॥ स एवासीदिदं विश्वं कल्पांतेऽन्यन्न किंचन ॥ ८ ॥ तस्य नाभेः समभ-
वत्पद्मकोशो हिरण्मयः ॥ तस्मिन्जज्ञे महाराज स्वयंभूश्चतुराननः ॥ ९ ॥ मरीचिर्मनसस्तस्य जज्ञे तस्यापि
कश्यपः ॥ दाक्षायिण्यां ततोऽदित्यां विवस्वानभवत्सुतः ॥ १० ॥ ततो मनुः श्राद्धदेवः संज्ञायामास भारत श्रद्धा-
यां जनयामास दश पुत्रान् स आत्मवान् ॥ ११ ॥ इक्ष्वाकुनृगशर्यातिदिष्टधृष्टकरूषकान् ॥ नरिष्यंतं पृष-
ध्रं च नाभगं च कविं विभुः ॥ १२ ॥ अप्रजस्य मनोः पूर्वं वसिष्ठो भगवान्किल ॥ मित्रावरुणयोरिष्टिं प्रजा-
र्थमकरोत्प्रभुः ॥ १३ ॥ तत्र श्रद्धा मनोः पत्नी होतारं समयाचत दुहित्रर्थमुपागम्य प्रणिपत्य पयोव्रता ॥
१४ ॥ प्रेषितोऽध्वर्युणा होता ध्यायंस्तत् सुसमाहितः ॥ हविषि व्यचरत्तेन वषट्कारं गृणन्द्विजः ॥ १
५ ॥ होतुस्तद्व्यभिचारेण कन्यैला नाम साभवत ॥ तां विलोक्य मनुः प्राह नातिहृष्टमना गुरुं ॥ १६ ॥ भगवन्
किमिदं जातं कर्म वो ब्रह्मवादिनां विपर्ययमहो कष्टं मैवं स्याद्ब्रह्मविक्रिया ॥ १७ ॥ यूयं मंत्रविदो युक्तास्त-
पसा दग्धकिल्विषाः ॥ कुतः संकल्पवैषम्यमनृतं विबुधेष्विह ॥ १८ ॥

न्यायया भवेत्तया उपेति हो तारं सम्पगयाचत पयसा एव व्रतमाहारो नियतो यस्याः ॥ १४ ॥ अध्वर्युणा होतर्यजेति प्रेषितो होता तां तेन गृहीते हविषि सति तत् दुहितृ प्रार्थितं ध्यायन् व्यचरत् अयजत ॥ पाठांतरे तच्च ध्यायत वाचा च षषट्कारं गृणन् वौषडित्युच्चारयन् ॥ १५ ॥ ब्रह्म

स्य

श्रीभा॰ ९ ॥ ८ ॥

त

भा०न०
२

प्रपितामहो बृह्मिष्ठ ॥२९॥ विगतं तिमिरं आभासः अन्यस्य प्रकाशस्य यास्तथा भर्तृदिशः कुर्वंतं ॥२९॥ प्रसंगं रत्वा निवेशं

तन्निशम्य वचस्तस्य भगवान् प्रपितामहः ॥ होतुर्व्यतिक्रमं ज्ञात्वा बभाषे रविनंदनं ॥२१॥ एतत् संकल्पवैष

म्यं होतुस्ते व्यभिचारतः ॥ तथापि साधयिष्येते सुप्रजास्त्वं स्वतेजसा ॥२०॥ श्रीशुक उवाच ॥ एवं व्यवसितो रा

जन् भगवान् स महायशाः ॥ अस्तौषीदादिपुरुषमिलायाः पुंस्त्वकाम्यया ॥२२॥ तस्मै कामवरं तुष्टो भग

वान् स महायशाः ॥२२॥ ददाविलाभवत्तेन सुद्युम्नः पुरुषर्षभः ॥२३॥ स एकदा महाराज विचरन्मृगयां व

ने ॥ वृतः कतिपयामात्यैरश्वमारुह्य सैंधव ॥२३॥ प्रगृह्य रुचिरं चापं शरांश्च परमाद्भुतान् ॥ दंशितो

ऽनुमृगं वीरो जगाम दिशमुत्तरां ॥२४॥ स कुमारो वनं मेरोरधस्तात् प्रविवेश ह ॥ यत्रास्ते भगवान् सर्वो

रममाणः सहोमया ॥२५॥ तस्मिन् प्रविष्ट एवासौ सुद्युम्नः परवीरहा ॥ अपश्यत् स्त्रियमात्मानमश्वं च वड

वां नृप ॥२६॥ तदा तदनुगाः सर्वे आत्मलिंगविपर्ययं ॥ दृष्ट्वा विमनसोऽभूवन् वीक्षमाणाः परस्परं ॥२७॥

श्रीराजोवाच ॥ कथमेवं गुणो देशः केन वा भगवन् कृतः ॥ प्रश्नमेनं समाचक्ष्व परं कौतूहलं हि नः ॥२८॥ श्री

शुक उवाच ॥ एकदा गिरिशं द्रष्टुमृषयस्तत्र सुव्रताः ॥ दिशो वितिमिराभासाः कुर्वंतः समुपागमन् ॥३०॥ तान्

विलोक्यांबिका देवी विवस्त्रा व्रीडिता भृशं ॥ भर्तुरंकात्समुत्थाय नीवीमाश्वथ पर्यधात् ॥३१॥ ऋषयोऽपि तयो

वीक्ष्य प्रसंगं रममाणयोः ॥ निवृत्ताः प्रययुस्तस्मान्नरनारायणाश्रमं ॥३२॥ तदिदं भगवानाह प्रियायाः

ततऊर्ध्वं वनं तद्वै पुरुषा वर्ज्जयंति हि

स्त्री प्रसंगदर्शनकलुषितमनसः ॥ संतस्त्वयातां ... नरनारायणाश्रमं ययुः ॥३२॥

साचेति ॥ अनुचरीसंयुक्तेतिचवक्तव्येभूतएवंगत्वापुंस्त्वनिर्दिशः ॥ ३३ ॥ आज्ञायनइच्छन् ॥ ३४ ॥ नाभ्यनंदत स्त्रीत्वेलज्जायामा
समासेनिलीयावस्थानात् ॥ ४२ ॥ इति श्रीभागवते महापुराणे नवमस्कंधे भावार्थदीपिकायां प्रथमोध्यायः ॥ १ ॥ हिता ये मनुपु

ततऊर्द्ध्वनंतद्वैपुरुषावर्ज्जयंतिहि ॥ साचानुचरसंयुक्ताविचचारवनाद्वनं ॥ ३३ ॥ अथतामाश्रमाभ्यासेचरंतींप्र
मदोत्तमां ॥ स्त्रीभिःपरिवृतांवीक्ष्यचकमेभगवान्बुधः ॥ ३४ ॥ सापितंचकमेसुभ्रूःसोमराजपतिंसुतं ॥ सतस्यांजनया
मासपुरूरवसमात्मजं ॥ ३५ ॥ एवंस्त्रीत्वमनुप्राप्तःसुद्युम्नोमानवोनृपः ॥ संस्मारस्वकुलाचार्यंवशिष्ठमितिशुश्रुम ॥
३६ ॥ सतस्यैतांदशांदृष्ट्वाकृपयाभृशपीडितः ॥ सुद्युम्नस्याशयन्पुंस्त्वमुपाधावतशंकरं ॥ ३७ ॥ तुष्टस्तस्मैसभगवान्
ऋषयेप्रियमावहन् ॥ स्वांचवाचमृतांकुर्वन्निदमाहविशांपते ॥ ३८ ॥ मासंपुमान्सभवितामासंस्त्रीतवगोत्रजः ॥ इ
त्थंव्यवस्थयाकामंसुद्युम्नोवतुमेदिनीं ॥ आचार्यानुग्रहात्कामंलब्ध्वापुंस्त्वंव्यवस्थया ॥ पालयामासजग
तीमभ्यनंदन्नतंप्रजाः ॥ ४० ॥ तस्योत्कलोगयोराजन्विमलश्चसुतास्त्रयः ॥ दक्षिणापथराजानोबभूवुर्धर्मवत्स
लाः ॥ ४१ ॥ ततःपरिणतेकालेप्रतिष्ठानपतिःप्रभुः ॥ पुरूरवसउत्सृज्यगांपुत्रायगतोवनं ॥ ४२ ॥ इति श्रीभागवतेम
हापुराणेनवमस्कंधेइलोपाख्यानेप्रथमोऽध्यायः ॥ १ ॥ श्रीशुकउवाच ॥ एवंगतेथसुद्युम्नेमनुर्वैवस्वतःपुत्र
कामस्तपस्तेपेयमुनायांशतंसमाः ॥ १ ॥ ततोऽयजन्मनुर्देवमपत्यार्थंहरिंप्रभुं ॥ इक्ष्वाकुपूर्वजान्पुत्रान्लेभेस्वसदृशा
न्दश ॥ २ ॥
त्राणांप्राक्पुत्रोविभागतः ॥ करूषकादिपंचानांवंशानाहलघुक्रमात ॥ वैवस्वतोमनुःश्राद्धदेवः ॥ इक्ष्वाकुःपूर्वजोयेषांता
न् ॥ २ ॥

भा० नु०
३

तत्र पृषध्रस्य वंशो नासीदिति सहेतुकमाह ॥ पृषध्रस्त्वित्यादिना कविः कनीयानित्यतः ॥ प्राक्तनेन ग्रंथेन खड्गपाणेः सति सुप्तोऽजाग
रणा वीरासनं तदेव व्रतं यस्य ॥ यतः ऽवहितः सन् गाः पालयामास ३ शार्दूलव्याघ्रः ४ प्रलीनाः उडुगणा यस्मिन् तस्मिन् समये व

पृषध्रस्तु मनोः पुत्रो गोपालो गुरुणा कृतः ॥ पालयामास गा यत्तो रात्र्यां वीरासनव्रतः ३ एकदा प्राविशद्गोष्ठं शा
र्दूलो निशि वर्षति ॥ शयाना गाव उत्थाय भीतास्ता बभ्रमुर्व्रजे ॥ एकां जग्राह बलवान् सा चुक्रोश भयातुरा ४ तस्या
स्तु क्रंदितं श्रुत्वा पृषध्रोऽनुससार ह खड्गमादाय तरसा प्रलीनोडुगणे निशि ५ अजानन्नहनद्बभ्रोः शिरः
शार्दूलशंकया ॥ व्याघ्रोऽपि वृक्णश्रवणो निस्त्रिंशाग्राहतस्ततः ६ निश्चक्राम भृशं भीतो रक्तं पथि समुत्सृजन्
मन्यमानो हतं व्याघ्रं पृषध्रः परवीरहा ७ अद्राक्षीत्स्वहतां बभ्रुं व्युष्टायां निशि दुःखितः ॥ तं शशाप कुलाचार्यः कृ
तागसमकामतः ८ न क्षत्रबंधुः शूद्रस्त्वं कर्मणा भविताधुना ॥ एवं शप्तः स्वगुरुणा प्रत्यगृह्णात्कृतांजलिः ९ ॥
अधारयद्व्रतं वीर ऊर्ध्वरेता मुनिप्रियं ॥ वासुदेवे भगवति सर्वात्मनि परेऽमले १० एकांतित्वं गतो भक्त्या सर्वभूतसुहृत्स
मः ॥ विमुक्तसंगः शांतात्मा संयताक्षोऽपरिग्रहः ११ यदृच्छयोपपन्नेन कल्पयन्वृत्तिमात्मनः ॥ आत्मन्यात्मानमाधाय ज्ञा
नतृप्तः समाहितः १२ विचचार महीमेतां जडांधबधिराकृतिः ॥ एवंवृत्तो वनं गत्वा दृष्ट्वा दावाग्निमुत्थितं १३ तेनोपयु
क्तकरणो ब्रह्म प्राप परं मुनिः १४ कविः कनीयान् विषयेषु निःस्पृहो विसृज्य राज्यं सह बंधुभिर्वनं ॥ निवेश्य चित्ते पुरुषं स्वरो

नोः ५ कपिलायाः गोः गां कामतो न ज्ञानेनेति ख्यापयति वृक्णः श्रवण इत्युक्तं ॥ व्युष्टायां प्रभातायां ८ क्षत्रबंधुरपि त्वं
न भवितासि अपि तु शूद्रो भवितेति ९ उपयुक्तकरणः दग्धदेहः १४ कवेरपि वंशो नाभवदिति बंधुभिः सह राज्यं विसृज्य १५ ३

ब्रह्मभूयं आत्मरूपत्वं ॥ नृगस्य वंशः सुतः सुमतिः ॥ ततो भूतज्योतिः ॥ ततो वसुः ॥ १७ ॥ ओघवतः पिता तत्पुत्रोऽप्योघवानित्यर्थः
१८ ॥ तदेवं त्रिभिः श्लोकैः करूषधृष्टनृगाणां वंशा उक्ताः नरिष्यंतस्य वंशमाह ॥ चित्रसेन इति सार्द्धैः त्रिभिः ततः इत्यादि यत्राधिक्यं
स्यात् ॥ तत्रानंतर्ये ततः इत्यादिपदं व्याख्येयं यत्र तु न्यूनत्वं तत्र पूर्वस्य चानुषंगादिति व्याख्येयं ॥ अग्निवेश्य एव कानीन इति

करूषान्मानवादासन् कारूषाः क्षत्रजातयः ॥ उत्तरापथगोप्तारो ब्रह्मण्या धर्मवत्सलाः ॥ १६ ॥ धृष्टाद्धार्ष्टम
भूत्क्षत्रं ब्रह्मभूयं गतं क्षितौ ॥ नृगस्य वंशः सुमतिः भूतज्योतिस्ततो वसुः ॥ १७ ॥ वसोः प्रतीकस्तत्पुत्र ओघवानोघव
त्पिता ॥ कन्या चौघवती नाम सुदर्शन उवाह तां ॥ १८ ॥ चित्रसेनो नरिष्यंताद्दक्षस्तस्य सुतोऽभवत् ॥ तस्य मीढ्वांस्ततः कूर्च
इंद्रसेनस्तु तत्सुतः ॥ वीतिहोत्रस्त्विंद्रसेनात्तस्य सत्यश्रवा अभूत् ॥ उरुश्रवाः सुतस्तस्य देवदत्तस्ततोऽभवत् ॥ २० ॥ ततोऽग्नि
वेश्यो भगवानग्निः स्वयमभूत्सुतः ॥ कानीन इति विख्यातो जातूकर्ण्यो महानृषिः ॥ २१ ॥ ततो ब्रह्मकुलं जातमा
ग्निवेश्यायनं नृप ॥ नरिष्यंतान्वयः प्रोक्तो दिष्टवंशमतः शृणु ॥ २२ ॥ नाभागो दिष्टपुत्रोऽन्यः कर्मणा वैश्यतां गतः ॥ भलंद
नः सुतस्तस्य वत्सप्रीतिर्भलंदनात् ॥ २३ ॥ वत्सप्रीतेः सुतः प्रांशुस्तत्सुतः प्रमितिं विदुः खनित्रः प्रमितेस्तस्माच्चाक्षु
षोऽथ विविंशतिः ॥ २४ ॥ विविंशतिसुतो रंभः खनिनेत्रोऽस्य धार्मिकः ॥ करंधमो महाराजस्तस्यासीदात्मजो नृप ॥ तस्या
विक्षित्सुतस्तस्य मरुतश्चक्रवर्त्यभूत् ॥ संवर्तोऽयाजयद्यं वै महायोग्यंगिरासुतः ॥ २६ ॥ मरुतस्य यथा यज्ञो न तथान्यो
जातूकर्ण्य इति ऽस्ति कश्चन ॥ सर्वं हिरण्मयं त्वासीद्यत् किंचितस्य शोभनं ॥ २७ ॥ विख्यातः ॥ २१ ॥ दिष्टस्य पुत्रो नाभागो व
क्ष्यमाणान्नाभागादन्य इति भ्रांतिव्युदासार्थं मनुवाक्यमात्रं ॥ २३ ॥ अंगिरसः सुतो महायोगी संवर्तोऽयमयाजयत् स मरुतः ॥ २६ ॥

नतस्तु

अस्य यत् किंचित्पात्रादिकमस्ति तत्तु सर्वं हिरण्मयं कृतं न तु मासीत् ॥ २७ ॥

अमाद्यत अत्यर्थं ॥ २८ ॥ यतः यस्यां तृणविंदोः पुत्रा अभवन् तानेवाह ॥ विशाल इति । तस्य तृणविंदोः सुता ३३ सहदेवजः
देवजेन सहितः ॥ पाठांतरे नामान्यत्वमात्रं अर्थस्तु स एव ३४ ॥ वैशालभूपाय स्यान्वये जाताः ३६ नवमे द्वितीयः २ तृतीये म

अमाद्यदिंद्रः सोमेन दक्षिणाभिर्द्विजातयः ॥ मरुतः परिवेष्टारो विश्वेदेवाः सभासदः ॥ २८ ॥ मरुत्तस्य दमः पुत्रस्तस्या
सीद्राज्यवर्द्धनः ॥ सुधृतिस्तत्सुतो जज्ञे सौधृतेयो नरः सुतः ॥ २९ ॥ तत्सुतः केवलस्तस्माद्धुंधुमान्वेगवांस्ततः ॥
बुधस्तस्याभवद्यस्य तृणविंदुर्महीपतिः ॥ ३० ॥ तं भेजेऽलंबुषा देवी भजनीयगुणालयं ॥ वराप्सरा यतः पुत्राः कन्या चे
डविडाऽभवत् ॥ ३१ ॥ तस्यामुत्पादयामास विश्रवा धनदं सुतं ॥ प्रादाय विद्यां परमामृषिर्योगेश्वरात्पितुः ॥
विशालः शून्यबंधुश्च धूम्रकेतुश्च तत्सुताः ॥ विशालो वंशकृद्राजा वैशालीं निर्ममे पुरीं ॥ ३३ ॥ हेमचंद्रः सु
तस्तस्य धूम्राक्षस्तस्य चात्मजः ॥ सतुआत्संयमादासीत्कृशाश्वः सहदेवजः ॥ ३४ ॥ कृशाश्वात्सोमदत्तोऽभूद्यो
ऽश्वमेधैरिडस्पतिं ॥ इष्ट्वा पुरुषमापाग्र्यां गतिं योगेश्वराश्रितां ॥ ३५ ॥ सौमदत्तिस्तु सुमतिस्तत्सुतो जनमेजयः ॥
एते वैशालभूपालास्तृणविंदोर्यशोधराः ॥ ३६ ॥ इति श्रीभागवते महापुराणे नवमस्कंधे द्वितीयोऽध्या
यः ॥ २ ॥ श्रीशुक उवाच ॥ शर्यातिर्मानवो राजा ब्रह्मिष्ठः संबभूव ह ॥ यो वा अंगिरसां सत्रे द्वितीयमहरूचि
वान् १ ॥ सुकन्या नाम तस्यासीत्कन्या कमललोचना ॥ तया सार्द्धं वनगतो भार्गवस्याश्रमं २ ॥

नु पुत्रस्य शर्यातेः कीर्त्यते अन्वयः ॥ यत्र सौकन्यमाख्यानं रेवतं च महाद्भुतं ॥ ब्रह्मिष्ठो वेदार्थतत्त्वज्ञः ॥ तदेवाह ॥ यो वा इति द्वि
तीयं द्वितीये अह्नि क्रियमाणं कर्म्म ऊचिवान् उवाच ॥ तस्य च ज्ञानतातं वा दिनान्तेरित्यादि नावस्पति ॥ आहोतावत् ॥ कन्या

[illegible]

अनेन अपराधं मुञ्चेयं मम कन्यां हि तस्मै च ये तु स्मात्ते कति वर्षाण्यस्या विवाहः ॥ कृतो न वेत्यादि वाक्यैः तदभिप्रायं तस्य मुनेर
भिप्रायं ज्ञात्वा तस्मै तां दुहितरं प्रादात ॥ हे ईश्वरौ सदैवौ युवां मह्यं वयस्तारुण्यं दत्तं संपादयत ॥ ११ ॥ असोमपयोः सोमपानरहितयोर
श्विनोर्युवयोः सोमस्य ग्रहं सोमपूर्णं पात्रं ग्रहीष्ये दास्यामीति ॥ युवां सोमेन यक्ष्ये इत्यर्थः ॥ ऐंद्रवायवग्रहं ज्ञातीत्यादिषु इष्यदेवतासंबं

सा सखीभिः परिवृता विचिन्वंती पुष्पाणि वने ॥ वल्मीकरंध्रे ददृशे खद्योत इव ज्योतिषी ॥ ३ ॥ ते दैववचोदिता बाला ज्योति
षी कंटकेन वै अविध्यन्मुग्धभावेन तस्यास्रावास्रक्ततो वहु ॥ ४ ॥ शकृन्मूत्रनिरोधोऽभूत्सैनिकानां च तत्क्षणात् ॥ राज
र्षिस्तमुपालक्ष्य पुरुषान्विस्मितोऽब्रवीत् ॥ ५ ॥ अप्यारेडन युष्माभिर्भार्गवस्य विचेष्टितं ॥ व्यक्तं केनापि नस्तस्य कृतमाश्र
मदूषणं ॥ ६ ॥ सुकन्या प्राह पितरं भीता किंचित्कृतं मया ॥ द्वे ज्योतिषी अज्ञानात्या निर्भिन्ने कंटकेन मे ॥ ७ ॥ दुहितुस्तद्वचः श्रु
त्वा शर्यातिर्जातसाध्वसः ॥ मुनिं प्रसादयामास वल्मीकांतर्हितं शनैः ॥ ८ ॥ तदभिप्रायमाज्ञाय प्रादाद्दुहितरं मुने ॥
कृच्छ्रान्मुक्तस्तमामंत्र्य पुरं प्रायात्समाहितः ॥ ९ ॥ सुकन्या च्यवनं प्राप्य पतिं परमकोपनं ॥ प्रीणयामास चित्तज्ञा अप्र
मत्तानुवृत्तिभिः ॥ १० ॥ कस्यचित्त्वथ कालस्य नासत्यावाश्रमागतौ ॥ तौ पूजयित्वा प्रोवाच वयो मे दत्तमीश्वरौ ॥ ११ ॥ ग्रहं
ग्रहीष्ये सोमस्य यज्ञे वामप्यसोमपोः ॥ क्रियतां मे वयो रूपं प्रमदानां यदीप्सितं ॥ १२ ॥ बाढमित्यूचतुर्विप्रमभिनंद्य भिषक्तमौ ॥
निमज्ज्यतां भवानस्मिन्ह्रदे सिद्धविनिर्मिते ॥ १३ ॥ इत्युक्तो जरया ग्रस्तदेहो धमनिसंततः ॥ ह्रदं प्रवेशितोऽश्विभ्यां वलीपलि
तविप्रियः ॥ १४ ॥

धातुपपत्या ग्रहज्ञातेर्योजयप्येवसाधित्वा ॥ १२ ॥ बाढमित्य निमज्ज्यतां भवानस्मिन्निमज्ज्यतामित्यूचतुः ॥ १३ ॥ ह्रदं
निवेशितः तावापतमिति वक्तृग्रहीत्वा प्रविष्टावित्यर्थः ॥ १४ ॥ अश्विनोः कारणं ययोर्युवयोः कृ[illegible]मत्पतिर्दृश्यत इति प्रा

ना० न० प्रलंभितो वंचितः ॥ हे सति असंगतं अनभीप्सं २० ॥ हे सतां कुलः प्रसूते ते मतिरन्यथा तद्विपर्ययेण कथमवगता अवसन्नास्य
5 पुरुषास्त्वयउतस्थुरपीच्यावनिता स्त्रियाः ॥ पद्मस्रजः कुंडलिनस्तुल्यरूपाः सुवाससः ॥ २५ ॥ तान्निरीक्ष्य वरा
रोहा सरूपान्सूर्यवर्चसः ॥ अजानती पतिं साध्वी अश्विनोः शरणं ययौ ॥ २६ ॥ दर्शयित्वा पतिं तस्यै पातिव्रत्येन तोषिता
तौ ॥ ऋषिमामंत्र्य ययतुर्विमानेन त्रिविष्टपं ॥ २७ ॥ यक्ष्यमाणोऽथ शर्यातिश्च्यवनस्याश्रमं गतः ॥ ददर्श दुहितुः पार्श्वे
पुरुषं सूर्यवर्चसं ॥ २८ ॥ राजा दुहितरं प्राह कृतपादाभिवंदनां ॥ आशिषश्चाप्रयुंजानो नातिप्रीतमना इव ॥ २९ ॥ चि
कीर्षितं ते किमिदं पतिस्त्वया प्रलंभितो लोकनमस्कृतो मुनिः ॥ यत्त्वं जराग्रस्तमसत्यसंमतं विहाय जारं भजसेऽमुमध्व
गं ॥ २० ॥ कथं मतिस्तेऽवगता तथा सतां कुलप्रसूते कुलदूषणं त्विदं ॥ बिभर्षि जारं यदपत्रपा कुलं पितुश्च भर्तुश्च न
यस्यधस्तमः ॥ २१ ॥ एवं ब्रुवाणं पितरं स्मयमाना शुचिस्मिता ॥ उवाच तात जामाता तवैष भृगुनंदनः ॥ २२ ॥ शशंस पि
त्रे तत्सर्वं वयोरूपाभिलंभनं ॥ विस्मितः परमप्रीतस्तनयां परिषस्वजे ॥ २३ ॥ सोमेन याजयन्वीरं ग्रहं सोमस्य चाग्रही
त् ॥ असोमयोरप्यश्विनोश्च्यवनः स्वेन तेजसा ॥ २४ ॥ हंतुं तमाददे वज्रं सद्यो मन्युरमर्षितः ॥ सवज्रं स्तंभयामास भुज
मिंद्रस्य भार्गव ॥ २५ ॥ अन्वजानंस्ततः सर्वे ग्रहं सोमस्य चाश्विनोः ॥ भिषजाविति यत्पूर्वं सोमाहुत्या बहिः कृतौ ॥ २५
उत्तानबर्हिरानर्तो भूरिषेण इति त्रयः ॥ शर्यातेरभवन्पुत्रा आनर्ताद्रेवतोऽभवत् ॥ २६ ॥ सोंतः समुद्रे नगरीं विनिर्मा
य कुशस्थलीं ॥ आस्थितो भुंक्त विषयानानर्तादीनरिंदम ॥ २७ ॥

ध्यवसितेति वा तदेवाह ॥ कुलदूषणं त्विदं मिति ॥ २२ ॥ [illegible] मनुर्येषाम इंद्रः ॥ २५ ॥ विषयान्देशान् अनुभुक्त 5

ककुद्मिर्ज्येष्ठो यस्मिन्नतत् विभुं ब्रह्माणं ॥२९॥ न लब्धः क्षणोऽवसरो येन ॥३०॥ आद्यं ब्रह्माणं ॥३१॥ ते त्वया हृदि ये कृतास्ते
सर्वे कालेन निरुद्धाः संहृताः ॥३२॥ त्रिनवसप्तविंशतिचतुर्युगानि तैः विकल्पितो विभक्तः यो देवस्यांशोऽस्ति तस्मै नररत्नाय देहि
॥३३॥ तदेवाह भुव इति ॥३४॥ पुण्यजनत्रासात् पक्षभयात् पूर्वमेव पुरं तत् भ्रातृभिस्त्यक्तं ॥३५॥ इति नवमे तृतीयोध्यायः ॥३॥ चतुर्थे म
नुपुत्रस्य नभगस्य कथोच्यते ॥ तत्सुतस्याम्बरीषस्य कृत्यापघातिहतायतः ॥१॥ तत्पौत्रस्य नाभागस्य वंशमाह ॥ नभगस्यापत्यं नाभागः ॥

तस्य पुत्रशतं जज्ञे ककुद्मिज्येष्ठमुत्तमं ॥ ककुद्मी रेवतीं कन्यां तामादाय विभुं गतः ॥२९॥ कन्यावरं परिप्रष्टुं ब्र
ह्मलोकमपावृतं ॥ आवर्तमाने गांधर्वे स्थितोलब्धक्षणः क्षणं ॥३०॥ तदंत आद्यमानम्य स्वाभिप्रायं न्यवेदयत् ॥ त
त्श्रुत्वा भगवान् ब्रह्मा प्रहस्य तमुवाच ह ॥ अहो राजन्निरुद्धास्ते कालेन हृदि ये कृताः ॥ तत्पुत्रपौत्रनप्तॄणां गोत्रा
णि न च शृण्महे ॥३२॥ कालोभियातस्त्रिनवचतुर्युगविकल्पितः ॥ तद्गच्छ देवदेवांशो बलदेवो महाबलः ॥ कन्यार
त्नमिदं राजन्नररत्नाय देहि भोः ॥३३॥ भुवो भारावताराय भगवान्भूतभावनः ॥ अवतीर्णो निजांशेन पुण्यश्रव
णकीर्तनः ॥३४॥ इत्यादिष्टोऽभिवंद्याजं नृपः स्वपुरमागतः ॥ त्यक्तं पुण्यजनत्रासात् भ्रातृभिर्दिक्ष्ववस्थितैः ॥३५॥
सुतां दत्वाऽनवद्यांगीं बलाय बलशालिने ॥ बदर्याख्यं ययौ राजा तप्तुं नारायणाश्रमं ३६ ॥ इति श्रीभागवते मह
पुराणे नवमस्कंधे तृतीयोध्यायः ॥३॥ श्रीशुक उवाच ॥ नाभागो नभगापत्यं यं ततं भ्रातरं कविं ॥ यविष्ठं व्य

नाभागादम्बरीषो महाभागवतोऽभूदिति वक्तुं भजन्दायं ब्रह्मचारिणमागतं ॥१॥ न ॥ तद्धेतुत्वेन वंशप्रवर्तकस्य नाभागस्य निः
कपटं चरितं तेन तु श्रीलडप्रमादमाह ॥ यं ततमित्यादिना ब्रह्मचारिणं बहुकालं गुरुकुले वसंतं नैष्ठिकोऽसाविति मत्वा विभागसमये
तस्मै नाभागमकल्पयन् भ्रातरः सर्वे दायं विभज्य गृहीत्वा पश्चाद्गुरुकुलादागतं यं भागार्थिनं कविं विद्वांसं यविष्ठं प्रति ततं तातं पित

श्रीभागवतटीका नवमस्कं० ॥८॥

भा० न०
६

एतदेव प्रश्नोत्तराभ्यां स्पष्टयति॥ तत्र नाभागः पृच्छति॥ हे भ्रातरः मह्यं किमभंक्त यूयं भजनं कं भागं मदर्थेऽयं कल्पितवंतः॥ भ्रातरस्त्वाहुः
तदा विस्मृतमस्माभिः॥ इदानीं तु त्वं पितरं विभजामो पितरं गृहाणेत्यर्थः॥ स च पितरं गत्वाह॥ तत हे तात आर्य्याः श्रेष्ठाः मम त्वाम भांक्षुः
भागं चक्रुः॥ मदीयो भागस्त्वमित्यर्थः॥ पाठांतरे हे तात किमिदं ममाभाक्षुः भजाम पितरं तवेत्यकथयत॥ आर्य्यास्त्वां मह्यं किमर्थं ददुरित्य
र्थः॥ पिताह॥ हे पुत्रक तत्तेरुक्तं मा स्म आदृथाः॥ प्रतारणमात्रं तैः कृतं तस्मिन् आदरं माकार्षीः॥ नह्यहं दाय इव भोगसाधनमित्यर्थः॥ २ तथा

भ्रातरोऽभंक्त किं मह्यं भजाम पितरं तव॥ त्वां ममार्य्यास्तताभांक्षुर्मा पुत्रक तदादृथाः॥२॥ इमे अंगिरसः सत्रमासतेद्यसु
मेधसः॥ षष्ठं षष्ठमुपेत्याहः कवे मुह्यंति कर्म्मणि॥३॥ तांस्त्वं शंसय सूक्ते द्वे वैश्वदेवे महात्मनः॥ ते स्वर्यंतो धनं सत्रप
रिशेषितमात्मनः॥४॥ दास्यंत्यथ ते तो गच्छ तथा स कृतवान् यथा॥ तस्मै दत्त्वा ययुः स्वर्गं ते सत्रपरिशेषितं॥५॥

ते भोगसाधनं दत्तोऽहं तव जीवनोपायं उपदेक्ष्यामीत्याह॥ इमे इति सप्तभ्यां॥ अभिसवः षडहो भवति॥ पृष्ठ्यः षडहो भवतीति विहितेषु॥ आ
वर्त्तमानेषु षष्ठं षष्ठमहः॥ कर्म्मण्येत्य प्राप्य कर्म्मणि तदनुष्ठाने सुमेधसोऽपि ते सूक्तविशेषाज्ञानेन मुह्यंति॥ हे कवे हे विद्वन्॥२॥ तान्
महात्मनोऽपि वैश्वदेवे इदमित्थाय रौद्र इमि ति च पे यज्ञेन दक्षिणायेति च द्वे वैश्वदेवे सूक्ते शंसय पाठय॥ ततः कर्म्मणि समाप्ते सति ते स्व
र्यंतः स्वर्गं गच्छंतः स्वसत्रपरिशेषितमवशिष्टमात्मनो धनं ते तुभ्यं दास्यंति॥ अथ तस्मात्तान् गच्छेति॥ तथेत्यादि स्मुक्तवाक्यं
यथावत्कृतवान्॥ सत्रपरिशेषितं सत्रावशिष्टं धनं ६॥ ५॥

६

पुरुषः श्रीरुद्रः इरयेत इतिदर्शनेन अरीरं कृष्णं दर्शनीयं यस्य सः ॥ वास्तुकं यज्ञभूमिगतं वसु धनं ममेत्युवाच ॥ ६ ॥ तर्हि स्मितं देवं ममेदमि
तिमानवो नाभागउवाच ॥ पुनश्च रुद्र उवाच ॥ नो आवयोरस्मिन् विवादे ते पितरि प्रश्नः स्यादिति पृष्टवानिति शुकोक्तिः ॥ ७ ॥ एतत्
स्यमनो वाक्यं यज्ञवास्तुगतमिति ॥ उच्छिष्टमुर्वरितं ॥ क्वचिदिति दक्षाध्वरे ॥ उच्छेषणभागो वै रुद्र इति श्रुतेश्च किंच ॥ स देवे
श्वरः ॥ सर्वमप्यर्हतीति किं पुनर्यज्ञावसिष्टमित्यर्थः ॥ ८ ॥ ९ ॥ श्रीरुद्र उवाच ॥ यत इति इदमाख्यानं श्रुतिप्रसिद्धं ॥ तथाहि वह्नश्च ॥ वा

तं कश्चित्तस्वीकरिष्यंतं पुरुषः कृष्णदर्शनः ॥ उवाचोत्तरतोऽभ्येत्य ममेदं वास्तुकं वसु ॥ ६ ॥ ममेदमृषिभिर्दत्तमिति तर्हि
स्म मानवः ॥ स्यान्नौ ते पितरि प्रश्नः पृष्टवान् पितरं तथा ॥ ७ ॥ यज्ञवास्तुगतं सर्वमुच्छिष्टमृषयः क्वचित् ॥ चक्रुर्हि
भागं रुद्राय स देवः सर्वमर्हति ॥ ८ ॥ नाभागस्तं प्रणम्याह तवेश किल वास्तुकं ॥ इत्याह मे पिता ब्रह्मन् शिरसा त्वां प्रसा
दये ॥ ९ ॥ यत्ते पितावदद्धर्मं त्वं तु सत्यं प्रभाषसे ॥ ददामि ते मंत्रदृशे ज्ञानं ब्रह्म सनातनं ॥ १० ॥ गृहाण द्रविणं दत्तं मा
त्सत्रे परिशेषितं ॥ इत्युक्त्वांतर्हितो रुद्रो भगवान् सत्यवत्सलः ॥ ११ ॥ य एतत्संस्मरेत्प्रातः सायं च सुसमाहितः ॥ कवि
र्भवति मंत्रज्ञो गतिं चैव महात्मनः ॥ १२ ॥ नाभागादंबरीषोऽभून्महाभागवतः कृती ॥ नास्पृशद्ब्रह्मशापोऽपि यं न प्रतिहतः
क्वचित् ॥ १३ ॥ राजोवाच ॥ भगवन् श्रोतुमिच्छामि राजर्षेस्तस्य धीमतः ॥ तथा भूद्यत्र निर्मुक्तो ब्रह्मदंडो दुरत्ययः ॥ १४ ॥

रुद्रः ॥ नाभागेन दिष्टं शंसति वै मानवं ब्रह्मचर्यं वसंतं भ्रातरो निरभजन् सो ब्रवीदित्यादि ॥ १० ॥ ११ ॥ अस्याख्यानस्य स्मरणे फलमाह ॥ एतदि
ति ॥ आत्मनो गतिं च प्राप्नोतीति शेषः ॥ १२ ॥ क्वचिदपि न प्रतिहतः ॥ ब्रह्मशापोऽपि ब्राह्मणेन दुर्वाससा निर्मितः कृत्यानलोऽपि यं नास्पृ

शत् ॥ अतोऽसौ महाभागवतः अत एव कृती पुण्यवान् ॥ १३ ॥
तस्य श्रोतुमिच्छामि चरितमिति शेषः ॥ ब्रह्मदंडः कृत्यानलः
न प्राभूत न समर्थो न बभूव ॥ १४ ॥

ना० न०
७ पि

श्रियं संपदं ॥ विभवमैश्वर्यं ॥ अतुलं निरुपमं ॥२५॥ पुंसामतिदुर्लभमपि तत्सर्वं स्वस्य तुच्छत्वसंस्मृतं निरूपितं ॥ अनुपादेयं मेने । तत्र हेतुः
विभवस्यानिर्वाणं नाशं विद्वान ॥ यत येन विभवेन तन्नाशेन वा पुमानतमो विशति मोहे निमज्जति ॥२६॥ नन्वेवं ज्ञानं तेऽपि विन्नेवेषि गो
हस्पतेत्तत्राह । वासुदेव इति । तावद्भक्तिं प्राप्तः येन भावेन इदं विश्वं लोष्ठवदिति तुच्छे स्मृतं ॥२७॥ नक्तिमेव सर्वे ङ्यारणां भगवत्परेल
कथनेन प्रपंचयति । सवा इति त्रिभिः ॥ स्फीतिस्त्रोत्रं अच्युतस्य सत्कथानामुदये अवरणे च कारे तस्य सर्वत्रान्वयः ॥२८॥ मुकुंदस्य लिंगा

श्रीशुक उवाच ॥ अंबरीषो महाभागः सप्तद्वीपावतीं महीं ॥ अव्ययां च श्रियं लब्ध्वा विभवं चातुलं भुवि ॥१५॥ मेनेतिदुर्लभं
पुंसां सर्वं तत्स्वप्नसंस्तुतं ॥ विद्वान्विभवनिर्वाणं तमो विशति यत्पुमान ॥१६॥ वासुदेवे भगवति तद्भक्तेषु च साधुषु ॥ प्राप्तो
भावं परं विश्वं येनेदं लोष्टवत्स्मृतं ॥१७॥ स वै मनः कृष्णपदारविंदयोर्वचांसि वैकुंठगुणानुवर्णने ॥ करौ हरेर्मंदिरमार्ज
नादिषु श्रुतिं चकाराच्युतसत्कथोदये ॥१८॥ मुकुंदलिंगालयदर्शने दृशौ तद्भृत्यगात्रस्पर्शेंगसंगमं ॥ घ्राणं च तत्पादस
रोजसौरभे श्रीमत्तुलस्या रसनां तदर्पिते ॥१९॥ पादौ हरेः क्षेत्रपदानुसर्पणे शिरो हृषीकेशपदाभिवंदने ॥ कामं च दास्ये
न तु कामकाम्यया यथोत्तमश्लोकजनाश्रया रतिः ॥२०॥ एवं सदा कर्मकलापमात्मनः परेधियज्ञे भगवत्यधोक्षजे ॥ सर्वा
त्मभावं विदधन्महीमिमां तन्निष्ठविप्राभिहितः शशास ह ॥२१॥ नामालयानि स्थानानि तेषां दर्शने दृशौ नेत्रे श्रीम
त्याः तुलस्याः तत्पादसरोजेन यत्सौरभं तस्मिन् ॥ तदर्पिते तस्मै निवेदिते नाद्ये ॥१९॥ कामं स्रक्चंदनादि सेवा दास्ये निमित्ते तत् अस्मा
त्स्वीकाराय न तु कर्मकाम्यया विषये छया ॥ कथं चकार उत्तमश्लोकजनाश्रया रतिर्यथा भवेत्तथा ॥ अनेन तद्भक्तेषु च परं भावं प्राप्त
इत्येतत्स्फुटीकृतं ॥२०॥ सर्वात्मेति भावो भावना यस्मिन् तत् आत्मनः ॥ स्वस्य कर्मणां कलापं समूहं भगवति विदधत् समर्पयन् । तन्निष्ठे

र्भगवतैर्विप्रैः । अभिहितः सन् महीं शशास पालयामास
अनेनाधिकृतधर्मोपि यथावद्दर्शितः ॥२१॥

किंचयज्ञाधिष्ठातारमीश्वरमश्वमेधैराडे आराधयामास। महाविभूत्यानुपचितान्यंगानि दक्षिणाश्चयेषु तैर्वसिष्ठादिभिर्हेतुभूतैस्ततैर्वि
स्तृतैः धन्वनि धन्वदेशेऽभिस्रोतः केसरस्वती मनिस्रोतं तस्याः प्रतिलोममित्यर्थः २२ किंच। यस्य क्रतुषु सदस्याः ऋत्विजो योगीर्वाणैः। सहहन्तृषु रणा
दिनिस्तुल्यरूपाव्यदृश्यंत सइत्थमितिच तुर्णान्वयः। नच देवानां निमेषाभावात् तुल्यरूपता अनिमिषाश्च व्यदृश्यंत न निमिषंतीति तथाश्च
व्यदर्शनात्मक्यंन तेषां निमिषोपरमादिति भावः २३ यस्य यज्ञीयैर्मनुजैरपि स्वर्गो न प्रार्थितः। तस्य तु का वार्ता। २४ आस्तां स्व

ईजेऽश्वमेधैरधियज्ञमीश्वरं महाविभूत्योपचितांगदक्षिणैः। ततैर्वसिष्ठासितगौतमादिभिर्धन्वन्यभिस्रोतमसौसरस्वतीं
॥२२॥ यस्य क्रतुषु गीर्वाणैः सदस्या ऋत्विजो जनाः। तुल्यरूपाश्चानिमिषा व्यदृश्यंत सुवाससः॥२३॥ स्वर्गो न प्रार्थितो
यस्य मनुजैरमरप्रियः। शृण्वद्भिरुपगायद्भिरुत्तमश्लोकचेष्टितं॥२४॥ समर्द्धयंति तान्कामाः स्वाराज्यपरिभावि
ताः। दुर्लभा नापि सिद्धानां मुकुंदं हृदि पश्यतः॥२५॥ सइत्थं भक्तियोगेन तपोयुक्तेन पार्थिवः। स्वधर्मेण हरिं प्रीणन्स
र्वान्कामान्शनैर्जहौ॥२६॥ गृहेषु दारेषु सुतेषु बंधुषु द्विपोत्तमस्यंदनवाजिवस्तुषु। अक्षय्यरत्नाभरणायुधादि
ष्वनंतकोशेष्वकरोदसन्मतिं॥२७॥

र्गप्रार्थनावार्ता शंकापि पद्यतः मुकुंदमिति। पश्यतस्तान्कामाः विषयाः तं समर्द्धयं
ति नहर्षयंति। कथंभूताः स्वाराज्येन स्वस्वरूपसुखेन परिभाविताः। अतिशयिताः अतएव सिद्धानामपि दुर्लभाः। यानीति पाठे यानि मनु
जानं स्वाराज्ये त्यत्राऽपि द्वितीयांतपाठे मनुजानां विशेषणं। यमिति पाठे यमं वरीषं। पश्यतामिति पाठे सिद्धानां विशेषणं॥२५॥ एवं भग
वदाराधनपरस्य कामाद्युपेक्षां नैव चित्रमित्युपसंहरति॥ सइत्थमिति द्वाभ्यां॥२६॥

भा०न०
८

नन्वेवंभूतोसौ कथं प्रतिपक्षैर्न्नं जयेत तत्राह ॥ तस्माइति ॥ २७ ॥ तदेवं तस्य वैराग्यादिकं हरिभक्तिं चोक्त्वा ब्रह्मदंडो यत्र न प्राभूदिति यदुक्तं तदेव दर्श
द्दश्रीवृत्तनिरांधकथयन्नाह ॥ आरिराधयिषुरित्यादियावदध्यायसमाप्तिः ॥ आर्चयत ॥ अडागमाभावआर्षः ॥ ३० ॥ ब्राह्मणांस्तर्पयामास ।
मिष्टान्नैन ॥ आप्तकामानप्यज्ञानपेक्षानपि ॥ ३२ ॥ रूप्याग्रीणांरूप्यखुराणां ॥ पयःशीलादिसंपदोयासांतासां ॥ ३३ ॥ न्यर्बुदानिषट्षष्टि

तस्मा अदाद्धरिश्चक्रं प्रत्यनीकभयावहं ॥ एकांतभक्तिभावेन प्रीतो भृत्याभिरक्षणं ॥ २८ ॥ आरिराधयिषुः कृष्णं म
हिष्या तुल्यशीलया ॥ युक्तः सांवत्सरं वीरो दधार द्वादशीव्रतं ॥ २९ ॥ व्रतांते कार्त्तिके मासि त्रिरात्रं समुपोषितः ॥ स्नातः
कदाचित्कालिंद्यां हरिं मधुवनेर्चयत ॥ ३० ॥ महाभिषेकविधिना सर्वोपस्करसंपदा ॥ अभिषिच्यांबराकल्पैर्गंधमाल्या
र्हणादिभिः ॥ ३१ ॥ तद्गतांतरभावेन पूजयामास केशवं ॥ ब्राह्मणांश्च महाभागान्सिद्धार्थानपि भक्तितः ॥ ३२ ॥ गवां
रुक्मविषाणीनां रूप्यांघ्रीणां सुवाससां ॥ पयःशीलवयोरूपवत्सोपस्करसंपदां ॥ ३३ ॥ प्राहिणोत्साधुविप्रेभ्यो गृहे ।
षु न्यर्बुदानि षट् ॥ भोजयित्वा द्विजानग्रे स्वाद्वन्नं गुणवत्तमं ॥ ३४ ॥ लब्धकामैरनुज्ञातः पारणायोपचक्रमे ॥ तस्य त
र्ह्यतिथिः साक्षाद्दुर्वासा भगवानभूत ॥ ३५ ॥ तमानर्चातिथिं भूयः प्रत्युत्थानासनार्हणैः ॥ ययाचेभ्यवहाराय पादमूलमु
पागतः ॥ ३६ ॥ प्रतिनंद्य स तां याच्ञां कर्तुमावश्यकं गतः ॥ निममज्ज बृहद्ध्यायन्कालिंदीसलिले शुभे ॥ ३७ ॥ मुहूर्तार्द्धावशिष्टायां
द्वादश्यां पारणं प्रति ॥ चिंतयामास धर्मज्ञो द्विजैस्तद्धर्मसंकटे ॥ ३८ ॥ ब्राह्मणातिक्रमे दोषो द्वादश्यां यदपारणे ॥ यत्कृत्वा
साधु मे भूयादधर्मो वा न मां स्पृशेत ॥ ३९ ॥

कोटीः ॥ ३४ ॥ तर्हि तदैव दुर्वासा अतिथिः साक्षात्स सहोभूत ॥ ३७ ॥ आनर्चे अ
र्चितवान् ॥ अभ्यवहाराय भोजनाय ॥ ३६ ॥ आवश्यकं नैयमिकं माध्याह्निकं कर्म कर्तुं गतः बृहत ब्रह्म ॥ ३७ ॥ धर्मसंकटमेवाह यद्य

८

एवंद्विजैःसहविचार्यनिश्चिनोति॥अंभसेति॥व्रतस्यपारणंसमाप्तिंतत्॥अशितमाहः॥अशितंनेतिचाहुःश्रुतिःअपोऽश्नातितन्नेवाना-
शितंनैवाशितमिति॥४०॥प्रत्यचष्टप्रत्यैहत॥४२॥प्रचलत्कंपमानंगात्रंयस्यभ्रुकुटिलमाननंयस्य॥४३॥क्रुद्धमहिंपावकोऽग्निः त्याकु

कृटि

अंभसाकेवलेनाथकरिष्येव्रतपारणं॥आहुरब्भक्षणंविप्राह्यशितंनाशितंचतत्॥४०॥इत्यपःप्राश्यराजर्षिश्चिंतयन्म-
नसाच्युतं॥प्रत्यचष्टकुरुश्रेष्ठद्विजागमनमेवसः॥४१॥दुर्वासायमुनाकूलात्कृतावश्यकआगतः॥राज्ञाभिनंदितस्त-
स्यबुबुधेचेष्टितंधिया॥४२॥मन्युनाप्रचलद्गात्रोभ्रुकुटिलाननः॥बुभुक्षितश्चसुतरांकृतांजलिमभाषत॥४३॥अ-
होअस्यनृशंसस्यश्रियोन्मत्तस्यपश्यत॥धर्मव्यतिक्रमंविष्णोरभक्तस्येशमानिनः॥४४॥योमामतिथिमायातमातिथ्ये-
ननिमंत्र्यच॥अदत्वाभुक्तवांस्तस्यसद्यस्तेदर्शयेफलं॥४५॥एवंब्रुवाणउत्कृत्यजटांरोषविदीपितः॥तयासनिर्ममेतस्मै
कृत्यांकालानलोपमां॥४६॥तामापतंतींज्वलतीमसिहस्तांपदाभुवं॥वेपयंतींसमुद्वीक्ष्यनचचालपदान्नृपः॥४७॥
प्राग्दिष्टंभृत्यरक्षायांपुरुषेणमहात्मना॥ददाहकृत्यांतांचक्रंक्रुद्धाहिमिवपावकः॥४८॥तदभिद्रवदुद्वीक्ष्यस्वप्र-
यासंचनिःफलं॥दुर्वासादुद्रुवेभीतोदिक्षुप्राणपरीप्सया॥४९॥तमन्वधावद्भगवद्रथांगंदावाग्निरुद्धूतशिखो-
यथानुषक्तंमुनिरीक्षमाणोगुहांविविक्षुःप्रससारमेरोः॥५०॥दिशोनभःक्ष्मांविवरान्समुद्रान्लोकान्सपालांस्त्रिदिवंगतःसः॥य-
तोयतोधावतितत्रतत्रसुदर्शनंदुःप्रसहंददर्श॥५१॥अलब्धनाथःसयदाकुतश्चित्संत्रस्तचित्तोऽरणमेषमाणः॥देवं
विरिंचंसमगाद्विधातस्त्राह्यात्मयोनेऽजिततेजसोमां॥५२॥

रिव॥४८॥निष्फलमुद्वीक्ष्य॥४९॥अनु-
रोगेहायांविविक्षुर्धावत॥५०॥अरणमेषमाणः॥शरणमिच्छन्॥अजिततेजसःहरेश्चक्रात्॥५२॥
कंएस्रतःसंसक्तंमे

हु

ना०न०
५

एतत्सर्वं यस्य भ्रूभंगमात्रेण तिरोभविष्यति ॥ एकदा क्रीडाया अवसाने त्वपि कदा द्विपरार्द्धसंज्ञे काले ॥ ५३ ॥ अतो वयं सर्वे यस्य
नियमनाज्ञामुपपन्नाः प्राप्ताः संतो लोकहितयुक्ता भवत्येवं तन्नियमं समूर्ध्न्यर्पितं वहामः ॥ अतस्त्वं कोऽहो हे एणत्वार क्षितुं न समर्थो हि मि-
तिशेषः यत्तदोर्नित्यसंबंधात ॥ ५४ ॥ सो रुद्रोपि प्रत्याचष्टे वयमिति चतुर्भिः ॥ अग्निमहति महत्वमेवाह यस्मिन्परमे स्वरे अडा ब्रह्म

ब्रह्मोवाच ॥ स्थानं मदीयं सहविश्वमेतत्क्रीडावसाने द्विपरार्द्धसंज्ञे ॥ भ्रूभंगमात्रेण हि संदिधक्षोः कालात्मनो यस्य तिरो-
नविष्यति ॥ ५३ ॥ अहं भवो दक्षभृगुप्रधानाः प्रजेशभूतेशसुरेशमुख्याः ॥ सर्वे वयं यन्नियमं प्रपन्ना मूर्ध्न्यर्पितं लोकहितं
वहामः ॥ ५४ ॥ प्रत्याख्यातो विरिंचेन विष्णुचक्रोपतापितः ॥ दुर्वासाः शरणं यातः शर्वं कैलासवासिनं ॥ ५५ ॥ श्रीरुद्र उवाच
॥ वयं न तात प्रभवाम भूम्नि यस्मिन्परेन्येप्यजजीवकोशाः ॥ भवंति काले न भवंति हीदृशाः सहस्रशो यत्र वयं भ्रमामः
वा ॥ ५६ ॥ अहं सनत्कुमारश्च नारदो भगवानजः ॥ कपिलोपांतरतमो देवलो धर्म आसुरिः ॥ ५७ ॥ मरीचिप्रमुखाश्चान्ये सि-
द्धेशाः पारदर्शिनाः ॥ विदाम न वयं सर्वे यन्मायां माययावृताः ॥ ५८ ॥ तस्य विश्वेश्वरस्येदं शस्त्रं दुर्विषहं हि नः ॥ तमेव
शरणं याहि हरिस्ते शं विधास्यति ॥ ५९ ॥ ततो निराशो दुर्वासाः पदं भगवतो ययौ ॥ विकुंठाख्यं यदध्यास्ते श्रीनिवासः
श्रिया सह ॥ ६० ॥ संदह्यमानोऽजितशस्त्रवह्निना तत्पादमूले पतितः सवेपथुः ॥ आहाच्युतानंत सदीप्सित प्रभो कृता-
गसं माऽव हि विश्वभावन ॥ ६१ ॥

एतस्त्व एवडीवास्तेषां कोशाः उपाधिभूता ब्रह्मांड विग्रहा इदृशास्वपमानब्रह्मांडप्रमा-
णा अन्येपि भवंति जायंते न रूपंति च ॥ यत्र येषु ब्रह्मांडेषु लोकेषु शाभिमानिनो वयं भ्रमामः ॥ ५६ ॥ ननु सर्वज्ञस्य तव भ्रमः कुतस्तत्रा- ५
ह अहमिति पारदर्शिनाः सर्वज्ञा अपि यस्य मायां न विद्मः ॥ ५७ ॥ हे सतामीप्सित मामवहि याहि ॥ ६१ ॥

अपराधं निवेदयन्प्रार्थयते ॥ अज्ञानतेति ॥ अघं दुःखं अपचितिं निष्कृतिं ॥ मद्भक्तद्रोहे निष्कृतिं न पश्यामीति चेत्तत्राह ॥ यस्य तव नाम्नि की
र्तिते नारकस्थोपि मुच्यते तस्य तव किमशक्यमिति भावः ॥ ६२ ॥ ६२ ॥ न आशासे न स्पृहयामि ॥ ६४ ॥ इमं परं च लोकं हित्वा ॥ ६५ ॥ ६६ ॥ प्र
तीतं प्राप्तमपि ॥ ६७ ॥ ६८ ॥ आत्मनस्त्वेव अभिचारो हिंसा यतो भूत तमेव याहि ॥ ६९ ॥ अशिवमनर्थं ॥ ७० ॥ तपोविद्यासंपन्न

अज्ञानता ते परमानुभाव कृतं मयाघं भवतः प्रियाणां ॥ विधेहि तस्यापचितिं विधातर्मुच्येत यन्नाम्न्युदिते नारकोपि ॥ ६
२ ॥ श्रीभगवानुवाच ॥ अहं भक्तपराधीनो ह्यस्वतंत्र इव द्विज ॥ साधुभिर्ग्रस्तहृदयो भक्तैर्भक्तजनप्रियः ॥ ६३ ॥ ना
हमात्मानमाशासे मद्भक्तैः साधुभिर्विना ॥ श्रियं चात्यंतिकीं ब्रह्मन्येषां गतिरहं परा ॥ ६४ ॥ ये दारागारपुत्राप्तान्प्रा
णान्वित्तमिमं परं ॥ हित्वा मां शरणं याताः कथं तांस्त्यक्तुमुत्सहे ॥ ६५ ॥ मयि निर्बद्धहृदयाः साधवः समदर्शनाः ॥ वशे
कुर्वंति मां भक्त्या सत्स्त्रियः सत्पतिं यथा ॥ ६६ ॥ मत्सेवया प्रतीतं च सालोक्यादिचतुष्टयं ॥ नेच्छंति सेवया पूर्णाः कुतो
न्यत्कालविद्रुतं ॥ ६७ ॥ साधवो हृदयं मह्यं साधूनां हृदयं त्वहं ॥ मदन्यत्ते न जानंति नाहं तेभ्यो मनागपि ॥ ६८ ॥ उपायं क
थयिष्यामि तव विप्र शृणुष्व तत् ॥ अयं ह्यात्माभिचारस्ते यतस्तं याहि वै भवान् ॥ ६९ ॥ साधुषु प्रहितं तेजः प्रहर्तुः कु
रुतेऽशिवं ॥ ७० ॥ तपो विद्या च विप्राणां निःश्रेयसकरे उभे ॥ ते एव दुर्विनीतस्य कल्पेते कर्तुरन्यथा ॥ ७१ ॥ ब्रह्मंस्तद्गच्छ भ
द्रं ते नाभागतनयं नृपं ॥ क्षमापय महाभाग ततः शांतिर्भविष्यति ॥ ७२ ॥ इति श्रीभागवते महापुराणे न
वमस्कंधे अंबरीषचरिते चतुर्थोऽध्यायः ॥ ४ ॥

स्य मम कथमनर्थः मम जनीति मा स्म विस्मयं कार्षीरित्याह तप इति ॥ ७१ ॥ ७२ ॥ इति श्रीनवमस्कंधे टीकायां चतुर्थोध्यायः ४

भा॰ नं॰ २०

पंचमेविष्णुचक्रंतुप्रसाद्यप्राणसंकटात् । दुर्वासारक्षितस्तेनयथातुष्टावतन्मोच्यते ॥ १ ॥ सतुघमनमितिछेदः सुलोपः पादपूरणार्थः । २ । ज्यो
तिषांनक्षत्राणांपतिः सोमस्त्वं ॥ मात्राणिइंद्रियाणिच ॥ त्वछंतेयेवागम्याहृयुः ॥ स्वंस्वंकार्यंकुर्वंतीत्यर्थः ॥ ३ ॥ सहस्रआरायस्पहे
सहस्रारस्वनि[illegible]स्तिशरणभूयाः ॥ इड्स्पातेरुच्यते ॥ ४ ॥ त्वांस्मुरणरहस्त्रणेनैवयुक्तमेवेत्याह । त्वंधर्मइतिनवतवेयमतिस्तुति
रित्याह ॥ योरुपपरवसैं स्वरेस्परतेजः ॥ सामर्थ्यंत्वं ॥ अयंभावः सरेह्नतेत्यादिषुविसिद्धंभगवतः । शोभनंदर्शनंहिततएवसर्वेडा

श्रीशुकउवाच ॥ एवंभगवतादिष्टोदुर्वासाश्चक्रतापितः ॥ अंबरीषमुपावृत्यतत्पादौदुःखितोऽग्रहीत ॥ १ ॥ त
स्यसोद्यमनंवीक्ष्यपादस्पर्शविलज्जितः ॥ अस्तावीत्तद्धरेरस्त्रंकृपयापीडितोभृशं ॥ २ ॥ अंबरीषउवाच ॥ त्वमग्नि
र्भगवान्सूर्यस्त्वंसोमोज्योतिषांपतिः ॥ त्वमापस्त्वंक्षितिर्व्योमवायुर्मात्रेंद्रियाणिच ॥ ३ ॥ सुदर्शननमस्तुभ्यंसहस्रारा
च्युतप्रियः सर्वास्त्रघातिन्विप्रायस्वस्तिभूयाइडस्पते ॥ ४ ॥ त्वंधर्मस्त्वमृतंसत्यंत्वंयज्ञोऽखिलयज्ञभुक् ॥ त्वंलोक
पालःसर्वात्मात्वंतेजःपौरुषंपरं ॥ ५ ॥ नमःसुनाभाखिलधर्मसेतवेह्यधर्मशीलासुरधूमकेतवे ॥ त्रैलोक्यगोपाय
विशुद्धवर्चसेमनोजवायाद्भुतकर्मणेगृणे ॥ ६ ॥ त्वत्तेजसाधर्ममयेनसंहृतंतमः ॥ प्रकाशश्चदृशोमहा
त्मनां ॥ दुरत्ययस्तेमहिमागिरांपतेत्वद्रूपमेतत्सदसत्परावरं ॥ ७ ॥

तेश्वतरवत्वमेवंसर्वात्मेति ॥ ५ ॥ हेसुनाभअद्भुतकर्माणंत्वांकःस्तोतुंसमर्थः ॥ अतस्तुभ्यंकेवलंनमोगृणेइत्यन्वयः ॥ अद्भुतकर्मत्व
मेवाह ॥ अखिलानांधर्माणांसेतवेमर्यादारूपाय अतएवाधर्मशीलानांअसुराणांधूमकेतवेदाहकाय ॥ त्रैलोक्यंगोपायतीति
तथा ॥ विशुद्धमत्युज्ज्वलंवर्चस्तेजोयस्यतस्मै ॥ ६ ॥ तदेवप्रपंचयतित्वत्तेजसेतिदृशांमहात्मनांप्रकाशश्चत्वयैवरूपतेप्रकाश्यत

९ हरिः २०

ने हे अच्युत अनंतदेवेन श्रीहरिणा यदा विसृष्टः त्वं तदा दैत्यानां दानवानां बलं प्रविश्य सन् तेषां बाहादीन् भिंदन् खलं राजसे पाठांतरे उद्दिताद् दैत्य
दानवाय स्मिन् ततः छलं ॥ सर्वपदेन संधिरार्षः ॥ ९ ॥ किंच त्वया भगवन् नियुक्तेन खलानामेव दंडः कार्यः साधवस्तु रक्षणीयाः ॥ अतो वि

यदा विसृष्टस्त्वमनंजनेन वै बलं प्रविष्टोऽजित दैत्यदानवं ॥ बाहूदरोर्वंघ्रिशिरोधराणि व[stain]न्नजस्रं प्रधने विराजसे प्र
॥ ९ ॥ स त्वं जगत्त्राण खलप्रहाणये निरूपितः सर्वसहो गदाभृता ॥ विप्रस्य चास्मत्कुलदैवहेतवे विधेहि भद्रं तदनु
ग्रहो हि नः ॥ १९ ॥ यद्यस्ति दत्तमिष्टं वा स्वधर्मो वा स्वनुष्ठितः ॥ कुलं नो विप्रदैवं चेत् द्विजो भवतु विज्वरः ॥ २० ॥ यदि
नो भगवान् प्रीत एकः सर्वगुणाश्रयः ॥ सर्वभूतात्मभावेन द्विजो भवतु विज्वरः ॥ २१ ॥ श्रीशुक उवाच ॥ इति सं
स्तुवतो राज्ञो विष्णुचक्रं सुदर्शनं ॥ अशाम्यत् सर्वतो विप्रं प्रदहद् राजयाच्ञया ॥ २२ ॥ स मुक्तोऽस्त्राग्नितापेन दुर्वासाः
स्वस्तिमांस्ततः ॥ प्रशशंस तमुर्वीशं युंजानः परमाशिषः ॥ २३ ॥ दुर्वासा उवाच ॥ अहो अनंतदासानां महत्त्वं
दृष्टमद्य मे ॥ कृतागसोपि यद्राजन् मंगलानि समीहसे ॥ २४ ॥ दुःकरः को नु साधूनां दुस्त्यजो वा महात्मनां ॥ यैः सं
गृहीतो भगवान् सात्वतामृषभो हरिः ॥ २५ ॥ यन्नामश्रुतिमात्रेण पुमान् भवति निर्मलः ॥ तस्य तीर्थपदः किं वा दा
ने सानामवशिष्यते ॥ २६ ॥ राजन्ननुगृहीतोहं त्वयातिकरुणात्मना ॥ मदघं पृष्ठतः कृत्वा प्राणा यन्मेभिरक्षिताः ॥ २७ ॥

प्रहरणेन अस्मान् अनुग्रहाणेत्याह ॥ स त्वमिति ॥ हे जगत्त्राण स एवंभूतस्त्वं खलानामेव प्रहरणार्थं निरूपितो नियुक्तः ॥ अतोस्म
त्कुलस्य दैवहेतवे नाग्यलाभाय विप्रस्य भद्रं विधेहि ॥ तदेव नोनुग्रहः ॥ १९ ॥ सर्वसुकृतान्यर्पणेन विप्ररक्षां प्रार्थयते ॥ यद्यस्ती
ति द्वाभ्यां विप्रो दैवं देवता यस्मिन् ततः ॥ २० ॥ २१ ॥ राज्ञस्तस्यैव याच्ञया ॥ २३ ॥ २४ ॥ २७

भा० न० राज्ञेत्यादि श्लोकद्वयं शुकोक्तिः प्रीतेति श्लोकद्वयं पुनश्च विप्रोक्तिः २८ । २९ आत्मनि मेधायेन तेनातिथ्येन ३० त्वरियं तत्रस्थोऽस्मा
२२ नः कीर्त्तयिष्यति ३१ । ३२ तस्य धैर्यातिशयमाह गतो मुनिर्यावता नागतः तावत्संरोऽतिक्रान्त इति ३३ । द्विजस्योपयोगेन मोऽडने

राज्ञा तमकृताहारः प्रत्यागमनकांक्षया ॥ चरणावुपसंगृह्य प्रसाद्य समभोजयत् ॥ २८ ॥ सोऽशित्वादृतमानीतमा
तिथ्यं सार्वकामिकं ॥ तृप्तात्मा नृपतिं प्राह भुज्यतामिति सादरं ॥ २९ ॥ प्रीतोस्म्यनुगृहीतोस्मि तव भागवतस्य वै
दर्शनस्पर्शनालापैरातिथ्येनात्ममेधसा ॥ ३० ॥ कर्म्मावदातमेतत्ते गायन्ति स्वस्त्रियो मुहुः ॥ कीर्तिं परमपुण्यां
च कीर्त्तयिष्यति भूरियं ॥ ३१ ॥ श्रीशुक उवाच ॥ एवं संकीर्त्य राजानं दुर्वासाः परितोषितः ॥ ययौ विहायसामन्त्र्य ब्रह्म
लोकमहेतुकं ॥ ३२ ॥ संवत्सरोत्यगात्तावद्यावता नागतो गतः ॥ मुनिस्तद्दर्शनाकांक्षो राजाऽब्भक्षो बभूव ह ॥ ३३ ॥
गतेथ दुर्वाससि सोऽम्बरीषो द्विजोपयोगातिपवित्रमाहरत् ॥ ऋषेर्विमोक्षं व्यसनं च बुध्वा मेने स्ववीर्यं च परा
नुभावं ॥ ३४ ॥ एवंविधानेकगुणः स राजा परात्मनि ब्रह्मणि वासुदेवे ॥ क्रियाकलापैः समुवाह भक्तिं ययाऽ
विरिंच्यान्निरयांश्चकार ॥ ३५ ॥ अथाम्बरीषस्तनयेषु राज्यं समानशीलेषु विसृज्य धीरः ॥ वनं विवेशात्मनि
वासुदेवे मनो दधद्ध्वस्तगुणप्रवाहः ॥ ३६ ॥ इत्येतत्पुण्यमाख्यानमम्बरीषस्य भूपतेः ॥ संकीर्त्तयन्ननुध्याय
न्भक्तो भागवतो भवेत् ॥ ३७ ॥ इति श्रीभागवते महापुराणे नवमस्कंधेऽम्बरीषोपाख्याने पंचमोऽध्यायः ॥ ५ ॥

न्यातिपवित्रं आहरत बुभुजे स्ववीर्यं च धैर्यादिलक्षणं परानुभावं भगवतः प्रभावं मेने ३४ एवंविधा अनेके गुणा यस्य २२
सः आविरिंच्यान् विरिंचपदसहितान् निरयानपनयदित्यर्थः ३५ ३६ ३७

षष्ठारंनें वरीषस्य वंशमुक्त्वा ततः परं ॥ षष्ठाध्याये भिरध्यायैरिक्ष्वाकोर्वंश उच्यते ॥१ तत्र षष्ठे शशादादिर्मांधात्रन्तो निरूप्यते । प्रसंगा
ना त्सौभरेर्वंशो मांधातृतनयापतेः ततवेसंतापयि ॥२ ये अंगिरसा जनिताः एते रथीतरस्य क्षेत्रे प्रसूतत्वेन रथीतरगोत्राः सतः आंगिरसो
वीर्येण प्रसूतत्वात् आंगिरसाश्च पुनरपि रथीतराणामन्येषां जातानां प्रवरा मुख्याः स्मृताः युतः क्षत्रोपेताः ब्राह्मणा इत्यर्थः ॥३॥
तदेवं मनोर्दशसु पुत्रेषु पृषध्रकविभ्यां विरक्तत्वान्न वंशप्रवर्तकौ ॥ करूषादीनां च समस्तानां वंशान्स्तारतम्य केमेणोक्ताः श्लोकैः

श्रीशुक उवाच ॥ विरूपः केतुमान् शंभुरंबरीषसुतास्त्रयः ॥ विरूपात्पृषदश्वोऽभूत्तत्पुत्रस्तु रथीतरः ॥१॥ र
थीतरस्याप्रजस्य भार्यायां तंतवेऽर्थितः ॥ अंगिरा जनयामास ब्रह्मवर्चस्विनः सुतान् ॥२॥ एते क्षेत्रे प्रसूता वै
पुनस्त्वांगिरसाः स्मृताः ॥ रथीतराणां प्रवराः क्षत्रोपेता द्विजातयः ॥३॥ क्षुवतस्तु मनोर्जज्ञे इक्ष्वाकुर्घ्रा
णतः सुतः ॥ तस्य पुत्रशतज्येष्ठा विकुक्षिनिमिदंडकाः ॥४॥ तेषां पुरस्तादभवन्नार्यावर्ते नृपा नृप ॥ पंच
विंशतिः पश्चाच्च त्रयो मध्ये परेऽन्यतः ॥५॥ स एकदाष्टकाश्राद्धे इक्ष्वाकुः सुतमादिशत् ॥ मांसमानीयतां मेध्यं विकुक्षे
गच्छ मा चिरं ॥६॥ तथेति स वनं गत्वा मृगान्हत्वा क्रियार्हणान् ॥ श्रांतो बुभुक्षितो वीरः शशं चाददपस्मृतिः ॥७॥

मतिवितनुमिक्ष्वाकोर्वंशमाह । क्षुवतस्त्वित्यादिना यावत्सोमवंशप्रस्तावः क्षुतं कुर्वतो मनोर्घ्राणतो जज्ञे ॥ अतिशयां जनया
मास दश पुत्रानिति पूर्वोक्तं वा कुलाभिप्रायेणेति द्रष्टव्यं पुत्राणां शतेति ज्येष्ठाः ॥४ आर्यावर्तः पुण्यभूमिर्मध्यं विंध्यहिमा
लययोः ॥ तस्मिन्पुरस्तात्समुद्रपूर्वं तं मंडलविभागेन पंचविंशतिनृपा अभवन् हे नृप ॥ तथैव पश्चाच्च पंचविंशति ॥ मध्ये तु
ज्येष्ठास्त्रयः ॥ अपरे तु अन्यतो [illegible] दक्षिणोत्तरादिषु ॥५ विकुक्षिरेव शशाद इति विख्यात इति वक्ष्यति । तत्र हेतुमाह । स
एकदेति चतुर्भिः ॥६ क्रियार्हणान्मेध्यान् ॥ आदत् अभक्षयत ॥७॥

भा०न० तद्गुरुर्वसिष्ठः । प्रोक्षणाय प्राशोचितसंस्काराय । त्यक्तो विधिः सदाचारो येनतां ॥ ९ ॥ सतु इक्ष्वाकुः जापकेन वसिष्ठेन राज्यभोगे
१२ न विरक्तो योगी सन् येन योगेन कलेवरत्यक्त्वामः । यत्परं तत्कृष्वाय १० शासन् पालयन् हरिमीडे ॥ ११ ॥ दैत्यपुरस्य जयात्पुरंजयः इक्ष्वा
वाहोऽस्येंतीऽइवाहः । ककुदि स्थितत्वात ककुत्स्थ इति च । शशादसुतस्य त्रीणि नामानि तत्कर्मनिमित्तानि ॥ १२ ॥ तान्येव व्याचष्टे ।

शेषं निवेदयामास पित्रे तेन च तद्गुरुः ॥ चोदितः प्रोक्षणायाह दुष्टमेतदकर्मकं ॥ ८ ॥ ज्ञात्वा पुत्रस्य तत्कर्म गुरुणा
भिहितं नृपः ॥ देशान्निःसारयामास सुतं त्यक्तविधिं रुषा ॥ ९ ॥ सतु विप्रेण संवादं जापकेन समाचरन् ॥ त्यक्त्वा कलेवरं यो
गीस तेनावापयत्परं ॥ १० पितर्युपरते सोऽत्य विकुक्षिः पृथिवीमिमां शासन्नीडे हरिं यज्ञैः शशाद इति विश्रुतः ॥ ११ ॥ पु
रंजयस्तस्य सुतइन्द्रवाह इतीरितः ॥ ककुत्स्थ इति चाप्युक्तः शृणु नामानि कर्मभिः ॥ १२ ॥ कृतांत आसीत्समरो देवा
नां सह दानवैः ॥ पार्ष्णिग्राहो वृतो वीरो देवैर्दैत्यपराजितैः ॥ १३ ॥ वचनाद्देवदेवस्य विष्णोर्विश्वात्मनः प्रभोः ॥ वाहन
त्वे वृतस्तस्य बभूवेंद्रो महावृषः ॥ १४ ॥ स संनद्धो धनुर्दिव्यमादाय विशिखान् शितान् ॥ स्तूयमानः समारुह्य युयु-
त्सुः ककुदि स्थितः ॥ १५ ॥ तेजसाप्यायितो विष्णोः पुरुषस्य परात्मनः ॥ प्रतीच्यां दिशि दैत्यानां न्यरुणत्त्रिदशैः पुरं १६
तैस्तस्य चाभूत्प्रधनं तुमुलं रोमहर्षणं ॥ यमाय भल्लैरनयद्दैत्यानभियर्युधे ॥ १७ ॥ तस्येषुपाताभिमुखं युगांताग्निमिवो
त्वणं ॥ विसृज्य दुद्रुवुर्दैत्या हन्यमानाः स्वमालयं ॥ १८ ॥ मंतयतीति । तथापा-
ण आह । कृतांत इति समभिः कृतं विश्व
र्ष्णिग्राहः ससहायः ॥ १३ ॥ इन्द्रो यदि मम वाहनं स्यात्तर्हि दैत्यान् हनिष्यामीति तेन वाहनत्वेन वृतः ॥ सन्निंद्रो ल ... ज्जया तदंगीकु
र्वन्विष्णोर्वचनात्तस्य वाहनत्वाय महावृषो बभूवेत्यर्थः ॥ १४ ॥ येऽभिमुखं ययुः तानयमंदर्शयितुं सदेहानेव भल्लैरनयदित्यर्थः

॥ २८ ॥ [margin text, written vertically]

१२

इतिएतैः कर्मभिः पुरंजयादिनामभिराहूतं व्याहृतः । पाठांतरे आहूत इत्यर्थः ॥ १९ ॥ २० श्रावस्तिः श्रावस्तस्य पुत्रः कुवलयाश्व एव धुंधु
२ माइतिख्यातः ॥ २१ ॥ तत्र कारणमाह यइति सुतानामेकविंशत्यासहस्रैर्वृतः सनहतवान् धुंधुमार इतिचेतिचकारस्यान्वयः २२
अयतस्मान्निकुंभात् हर्यश्व ॥ २५ ॥ नार्योरणंज्ञातेनसह अस्यपुत्रार्थमिंद्रदैवत्यामिष्टिंवर्त्तयामासुः समेत्याश्वयो ॥ २६ ॥ तदेवा

जित्वापुरं धनं सर्वं सश्रीकं वज्रपाणये ॥ प्रत्ययच्छत्स राजर्षिरितिनामभिराहृतः ॥ १९ ॥ पुरंजयस्य पुत्रोभूदनेनास्तत्सु
तः पृथुः । विश्वरंधिस्ततश्चंद्रो युवनाश्वश्च तत्सुतः ॥ २० श्रावस्तस्तत्सुतो येन श्रावस्ती निर्ममे पुरी ॥ बृहदश्वस्तु
श्रावस्तिस्ततः ॥ कुवलयाश्वकः ॥ २१ ॥ यः प्रियार्थमुतंकस्य धुंधुंनामासुरं बली ॥ सुतानामेकविंशत्यासहस्रैरह
नद्वृतः ॥ २२ धुंधुमार इति ख्यातः तत्सुतास्ते च जज्वलुः ॥ धुंधोर्मुखाग्निना सर्वे त्रय एवावशेषिताः ॥ २३ दृढा
श्वः कपिलाश्वश्च भद्राश्व इति भारत ॥ दृढाश्वपुत्रो हर्यश्वो निकुंभः तत्सुतः स्मृतः २४ बर्हणाश्वो निकुंभस्य कृ
शाश्वोथास्य सेनजित् ॥ युवनाश्वोभवत्तस्य सोनपत्यो वनं गतः ॥ २५ ॥ भार्याशतेन निर्विण्णः ऋषयोस्य कृपालवः ॥
इष्टिं स्म वर्तयांचक्रुरैंद्रीं ते सुसमाहिताः २६ राजा तद्यज्ञसदनं प्रविष्टो निशि तर्षितः ॥ दृष्ट्वा शयानान् विप्रांस्तान्
पपौ मंत्रजलं स्वयं ॥ उत्थितास्ते निशम्याथ व्युदकं कलशं प्रभो ॥ पप्रच्छुः कस्य कर्मेदं पीतं पुंसवनं जलं राज्ञा पीतं
विदित्वाथ ईश्वरप्रहितेन ते ॥ ईश्वराय नमश्चक्रुरहो दैवबलं बलं ॥ २९ ततः कालउपावृत्ते कुक्षिं निर्भिद्य दक्षिणं
युवनाश्वस्य तनयश्चक्रवर्ती जजान ह ३० कं धास्यति कुमारोयं स्तन्ये रोरूयते भृशं ॥ मां धाता वत्स मा रोदीरितींद्रो देशिनीम
दात ॥ ३१ ॥

ह. राजेतिद्वाभ्यां तर्षितः तृषितः सन् जलार्थं प्रविष्टः मंत्राभिमंत्रि तं(ले)पत्न्यैदेयं स्वयं पपौ व्युदकं निरुदकं ॥ पुंसव
नं पुत्रोत्पत्तिकारणं २८ अहो दैवबलमेव मुख्यं बलं पुरुषबलं तु न किंचिदिति वदंतः ईश्वराय नमस्कारं चक्रुः २९ ॥ ३० अ

तस्य पितायुवनाश्वोभिन्नकुक्षिरपि न ममार । किंतु कालांतरे तपसा सिद्धिमन्वगात् ॥ ३२ ॥ मांधातुर्महिमानमाह त्रसद्दस्युरिति षड्भिः
अग्रहेराजन यस्मान्मांधातुर्हस्यवग्रुद्धिगताः कंपिताः संतस्त्रसंति अतं इडा दस्युरिति नाम विदधे ॥ समांधातो भुवनि मेकः मा शशा
सेतुत्तरेणान्वयः ॥ ३३ ॥ अच्युतस्य तेजसा अप्रच्युततेजसेतिवा ॥ ३४ ॥ आत्मविदपि सः यज्ञैर्विष्णुमीडे ॥ तमेव विशिनष्टि सर्वदे

न ममार पिता तस्य विप्रदेवप्रसादतः ॥ युवनाश्वोथ तत्रैव तपसा सिद्धिमन्वगात् ॥ ३१ ॥ त्रसद्दस्युरितींद्रेण विदधे
नाम तस्य वै ॥ यस्मात्त्रसंति ह्युद्विग्ना दस्यवो रावणादयः ॥ ३३ ॥ यौवनाश्वोथ मांधाता चक्रवर्त्यवनेः प्रभुः ॥ सप्त
द्वीपवतीमेकः शशासाच्युततेजसा ॥ ३४ ॥ ईजे च यज्ञं क्रतुभिरात्मविद्भूरिदक्षिणैः ॥ सर्वदेवमयं देवं सर्वात्मकमतींद्रि
यं ॥ ३५ ॥ द्रव्यं मंत्रो विधिर्यज्ञो यजमानस्तथर्त्विजः ॥ धर्मो देशश्च कालश्च सर्वमेतद्यदात्मकं ॥ ३६ ॥ यावत्सू
र्य उदेति स्म यावच्च प्रतितिष्ठति ॥ सर्वं तद्यौवनाश्वस्य मांधातुः क्षेत्रमुच्यते ॥ शशाविंदोर्दुहितरि बिंदुम
त्यामधान्नृपः ॥ पुरुकुत्समंबरीषं मुचुकुंदं च योगिनं ॥ ३८ ॥ तेषां स्वसारः पंचाशत्सौभरिं वव्रिरे पतिं ॥ यमु
नांतर्जले मग्नः तप्यमानः परंतपः ॥ ३९ ॥ निर्वृतिं मीनराजस्य वीक्ष्य मैथुनधर्मिणः ॥ जातस्पृहो नृपं विप्रः क
न्यामेकमयाचत ॥ ४० ॥ सोप्याह गृह्यतां ब्रह्मन्कामं कन्या स्वयंवरे ॥ स विचिंत्याप्रियं स्त्रीणां जरठोयमसंमतः ॥ ४१ ॥

वमयामिति ॥ सार्धेन ॥ २५ ॥ २६ ॥ प्रतितिष्ठति अस्तं गच्छति ॥ प्रसंगात्सौभरेश्चरितमाह ॥ तेषामिति यावत्समाप्तिः मांधातुः कन्याः
३८ ननु महातापसस्य कुतो विवाहप्रसंगः ॥ कथं वा नराजकन्या वव्रिरे तत्राह ॥ यमुनांतर्जल इति षड्भिः ३९
नृपं मांधातारं सोपि मांधाता स्वयंवरे कामं गृह्यतामित्याह ॥ स विप्रः स्त्रीणामप्रियं मां विचिंत्यानेनाहं प्रत्युक्तोऽतत्रात्मा
नं तथा साधयिष्यामीति व्यवसितः । निश्चितवानिति हृद्योरन्वयः ॥ अप्रियहेतुः जारटो वृद्धः ॥ ४१ ॥

वलीभिर्युक्तः । पलितिः लितश्चरणडाल्कः कंपमानशिराः तापसत्वादिनावाऽसंमतोहमिति कृत्वा तथेत्यस्य प्रपंचः ॥ सुरस्त्रीणामभीप्सितं
किंपुनर्मनुजेंद्राणां याः स्त्रियः तासामिति । ९२ ततः किंवृत्तं तदाह । मुनिरिति द्वाभ्यां । कन्याप्रतिहारेण पंचाशता पि राजकन्याभिः सए
कएव वृतः । ९४ तस्य गार्हस्थ्यं वर्णयति । सइति चतुर्भिः वह्वृच इति मंत्रसामर्थ्ययुक्तः । ताभिः सह रेमे उत्तरेणान्वयः । कुत्र रेमे अ
पारणीयं दुरंतं यत्तपः । तस्य श्रिया सम्पद्या अनर्घ्याः परिच्छदा येषु तेषु गृहेषु सौगंधिकानां कल्हाराणां वनं काननानि तेषु

वलीपलितएडाल्क इत्यहं प्रत्युदाहृतः ॥ साधयिष्ये तथात्मानं सुरस्त्रीणामभीप्सितं ॥ ९२ ॥ किंपुनर्मनुजेंद्राणामिति व्यवसि
तः प्रभुः ॥ मुनिः प्रवेशितः क्षत्रा कन्यांतःपुरमृद्धिमत् । ९३ ॥ वृतश्च राजकन्याभिरेकः पंचाशता वरः ॥ तासां कलिरभू
त्भूयांस्तदर्थे पोह्य सौहृदं । ९४ ॥ ममानुरूपो नायं व इति तद्गतचेतसां सवह्वृचस्ताभिरपारणीयतपःश्रियानर्घ्य
परिच्छदेषु ॥ गृहेषु नानोपवनामलांभः सरस्सु सौगंधिककाननेषु ॥ ९५ ॥ महार्हशय्यासनवस्त्रभूषणस्नानानुलेपाभ्यव
हारमाल्यकैः ॥ स्वलंकृतस्त्रीपुरुषेषु नित्यदा रेमेनुगायत्द्विजभृंगवंदिषु ॥ ९६ ॥ यद्गार्हस्थ्यं तु संवीक्ष्य सप्तद्वीपवती
पतिः ॥ विस्मितः स्तंभमजहात्सार्वभौमश्रियान्वितं ९७ ॥ एवं गृहेष्वभिरतो विषयान्विविधैः सुखैः सेवमानो
नचालुष्यद्वाज्यबिंदुभिरिवानलः । ९८ ॥ सकदाचिदुपासीन आत्मापह्नवमात्मनः ॥ ददर्श वह्वृचाचार्यो मीनसंगस
मुत्थितं ॥ ९९ ॥

॥ ९५ कथंभूतेषु गृहादिषु ॥ स्वलंकृताः स्त्रियः पुरुषाश्च येषु अनुगायंतो द्विजाश्च पक्षिणः भृंगाश्च वंदिनश्च येषु कथंभूतः
महार्हशय्यादिभिरुपलक्षितः सन् ९६ स्तंभं गर्वं । ९७ आज्यप्लुतो के घृतबिंदुभिः । ९८ इदानीं तस्यानुतापपूर्वकं वानप्रस्थाश्र
ममाह ॥ सकदाचिदिति सप्तभिः ॥ आत्मनः मनसो हेतोः । आत्मनोऽपह्नवं तपोहानिं ददर्श ॥ ९९ ॥

भा॰ न॰
२४

संस्था सौभरि तद्व्रत स्थयोऽहं तस्य व्रतस्य तपः ॥ ५० ॥ मिथुनव्रतिनां दांपत्य धर्मेवतां चेत् यदि प्रसंगः ॥ तर्हि तु द्युतिषु ईश्वरार्थ धर्मे परे व्येव कार्य इति शेषः ॥ ५१ ॥ संगाज्जातं दोषं स्वरूपेण व्रूयति ॥ एक इति पंचाशतो भार्याभिः सं व्रधातपंचाशत् आसन्नु संवु मित्यर्थः ॥ ततश्च सुतैः पंचसहस्र सं र्गश्चासीं प्रत्येकं तासु पुत्र सातत्त्वपेणोत्यतेः ॥ उभयकृतानि ऐहिक पारत्रिकानि कर्माणि तद्विषयानां मनोरथानां ॥ अर्थभावः पुरुषार्थ वुद्धि

अहो इमं पश्यत मे विनाशं तपस्विनः सच्चरितव्रतस्य ॥ अंतर्जले वारिचरप्रसंगात् प्रच्यावितं ब्रह्म चिरं धृतं यत् ॥ ५० ॥ संगं त्यजेत मिथुनव्रतिनां मुमुक्षुः सर्वात्मना न विसृजेद्बहिरिन्द्रियाणि ॥ एकश्चरन् रहसि चित्तमनंत ईशे युंजीत तद्व्रतिषु साधुषु चेत्प्रसंगः ॥ ५१ ॥ एकस्तपस्व्यहमथांभसि मत्स्यसंगात् पंचाशदासमुत पंचसहस्रसर्गः ॥ ५२ ॥ नान्तं व्रजाम्युभयकृत्यमनोरथानां मायागुणैर्हृतमतिर्विषयेऽर्थभावः ॥ ५२ ॥ श्रीशुक उवाच ॥ एवं वसन् गृहे कालं विरक्तो न्यासमास्थितः वनं जगामानुययुस्तत्पत्न्यः पतिदेवताः ॥ ५३ ॥ तत्र तप्त्वा तपस्तीक्ष्णमात्मकर्षणमात्मवान् ॥ सहैवाग्निभिरात्मानं युयोज परमात्मनि ॥ ५४ ॥ ताः स्वपत्युर्महाराज निरीक्ष्याध्यात्मिकीं गतिं ॥ अन्वयुस्तत्प्रभावेन अग्निं शांतमिवार्चिषः ॥ ५५ ॥ इति श्री भागवते महापुराणे नवमस्कंधे षष्ठोऽध्यायः ॥ ६ ॥ श्रीशुक उवाच ॥ मांधातुः पुत्रप्रवरो योंऽवरीषः प्रकीर्तितः ॥ पितामहेन प्रवृतो यौवनाश्वश्च तत्सुतः ॥ १ ॥

मान ॥ ५१ ॥ न्यासो त्र संगत्याग एव वानप्रस्थ धर्म इत्यर्थः ॥ ५४ ॥ ५४ ॥ आध्यात्मिकीं गतिं ब्रह्मणि लयं ॥ ५५ ॥ इति नवमे षष्ठोऽध्यायः ॥ मांधातुरन्वयः प्रोक्तः सप्तमे यत्र गीयते ॥ पुरुकुत्सस्य चाख्यानं हरिश्चंद्रस्य चोत्तमं ॥ १ ॥ पुत्रप्रवरः पुत्रश्रेष्ठः सपितामहेन युवनाश्वेन प्रवृतः ॥ पुत्रत्वेन स्वीकृतः ॥ अत एव तस्य मांधातृ प्रवर्गत्वं तत्सुतः अंवरीषस्य सुतः ॥ १ ॥ श्रीराधाकृष्णाय नमः ॥ २४

इत्येयुवनाश्वांबरीषहारीता मांधातृ गोत्रस्य प्रवराः ॥ अवांतरविशेषवर्तकाः ॥ यच्छायौवनाश्वविशेषणं पितामहेन मांधात्रा सह आर्षेयवर
णे प्रवर्त्तः ॥ मांधाता प्रवरो येषां ते इमे अंबरीषयौवनाश्वहारीताः ॥ यथाहाश्वलायनः ॥ हरितकुत्सपिंगशंखदर्भ नामगवानां मांगि
रसांबरीषयौवनाश्वेति ॥ मांधातारं हैके वृवते अतीत्यांगिरसं हारीतं विहाय तृतीयः ॥ मांधात्रंबरीषयौवनाश्वेतीति ॥ पुरुकुत्सस्य वं
शं कथयिष्यन्नादौ तावत्तस्य विवाहं प्रभावं भावं चाह ॥ उरगैर्भीतैर्भियो दत्तां नर्मदां तया च ध्यानं च धाहीनं तत्सर्वं पुरुकुत्सो नागाल्लब्धु
वरोऽभूत्तवर मप्यह ॥ इदं नर्मदया रसातलानयनादिकं स्मरतां सर्पाद्भयमिति ॥ ३ ॥ देहकृत् पिता ॥ त्रसद्दस्योः सुतोऽनरण्य इत्यर्थः ॥ ६

हारीतस्तस्य पुत्रोऽभूत् मांधातृप्रवरा इमे ॥ नर्मदा भ्रातृभिर्दत्ता पुरुकुत्साय चोरगैः ॥ तया रसातलं नीतो भुजगेंद्रप्रयुक्त
या ॥ गंधर्वानवधीत्तत्र वध्यान्वै विष्णुशक्तिधृक् ॥ नागाल्लब्धवरः सर्पादभयं स्मरतामिदं ॥ ३ ॥ त्रसद्दस्युः पौरुकु
त्सोयोऽनरण्यस्य देहकृत् ॥ हर्यश्वस्तत्सुतस्तस्मादरुणोऽथ त्रिबंधनः ॥ ६ ॥ तस्य सत्यव्रतः पुत्रः त्रिशंकुरिति
विश्रुत ॥ प्राप्तश्चांडालतां शापात् गुरोः कौशिकतेजसा ॥ ५ ॥ सशरीरो गतः स्वर्गमद्यापि दिवि दृश्यते ॥ पाति
तोऽवाक्शिरा देवैस्तेनैव स्तंभितो बलात् ॥ ६ ॥ त्रैशंकवो हरिश्चंद्रो विश्वामित्रवसिष्ठयोः ॥ यन्निमित्तमभूद्युद्धं पक्षि
णोर्बहुवार्षिकं ॥ ७ ॥

त्रयः शंकवः दुःखहेतवो दोषा यस्यासौ त्रिशंकुः ॥ तदु क्तं हरिवंशे पितुश्चापरितोषेण गुरोर्दोग्ध्रीवध
धेन च ॥ अप्रोक्षितोपयोगाच्च त्रिविधस्ते व्यतिक्रम इति ॥ पररणीयमानविप्रकन्यापहरणात् क्रुद्धस्य गुरोः ॥ पितुः शापात् कौशिकस्य
विश्वामित्रस्य तेजसा प्रभावेन ॥ ५ ॥ तेनैव कौशिकेन ॥ ६ ॥ पक्षिणोः ॥ आडीबकयोः ॥ विश्वामित्रो राजसूयदक्षिणाछलेन हरिश्चंद्रस्य सर्व
पात स्वमपहृत्याया मासतच्छ्रुत्वा कुपितो वसिष्ठो विश्वामित्रं त्वं आडी भवेति शशाप ॥ सोपि त्वं बको भवेति वसिष्ठं शशाप ॥ तयोश्च युद्धमभू
दिति प्रसिद्धं ॥ ७ ॥

भा० न०
२५ ना

हरिश्चंद्र इह वैधस ऐक्ष्वाको राजाऽपुत्र आसेत्यादि स्कं तिप्रसिद्धं हरिश्चंद्रस्य चरितमाह ॥ सोऽनपत्य इत्यादि यावत्समाप्तिः । कथं शरणं यातः तदा
ह ॥ पुत्रो मे जायतां ८ । यदि वीरः पुत्रो मे जायेत तर्हि तेनैव पुरुषपशुना त्वां यजेयं यजामीति भावः ॥ तथेत्युक्तवता वरुणेन निमित्तेनास्य रोहि
तो नाम पुत्रो जातः ॥ ९ ॥ जाते पुत्रे स वरुणो जातः ॥ सुतो मानेन तनय यजस्वेत्यब्रवीत ॥ यदा पशुर्निर्दशः निर्जतदशदिवसः स्याद्धि तत्र स राजा ब्रु
वीदित्यनुषंगः ॥ १० ॥ राजन्निह वरुण राजन्यः पशु यदा सांनाहिकः कवचसंबंधार्हः ॥ स ग्रामे समर्थः ॥ अथ तदा शुचिरित्येवं तत्कालं व

सोऽनपत्यो विषण्णात्मा नारदस्योपदेशतः ॥ वरुणं शरणं यातः पुत्रो मे जायतां प्रभो ॥ ८ ॥ यदि वीरो महाराज तेनैव त्वां य
जाम्यहं इति ॥ तथेति वरुणेनास्य पुत्रो जातस्तु रोहितः ॥ ९ ॥ जातः सुतो ह्यनेनांगमाय यजस्वेति सोऽब्रवीत् ॥ यदा पशुर्निर्द
शः स्यादथ मेध्यो भवेदिति ॥ १० ॥ निर्दशे च स आगत्य यजस्वेत्याह सोऽब्रवीत् ॥ दन्ताः पशोर्यज्जायेरन्नथ मेध्यो भ
वेदिति ॥ ११ ॥ जाता दन्ता यजस्वेति स प्रत्याहाथ सोऽब्रवीत् ॥ यदा पतन्त्यस्य दन्ता अथ मेध्यो भवेदिति ॥ १२ ॥ पशोर्निप
तिता दन्ता यजस्वेत्याह सोऽब्रवीत् ॥ यदा पशोः पुनर्दन्ता जायन्तेऽथ पशुः शुचिः ॥ १३ ॥ पुनर्जाता यजस्वेति स प्रत्याहाथ सो
ऽब्रवीत् ॥ सांनाहिको यदा राजन्राजन्योऽथ पशुः शुचिः ॥ १४ ॥ इति पुत्रानुरागेण स्नेहयंत्रितचेतसा ॥ कालं वंचयता तं तमुक्तो
देवस्तमैक्षत ॥ १५ ॥ रोहितस्तदभिज्ञाय पितुः कर्म चिकीर्षितं ॥ प्राणप्रेप्सुर्धनुष्पाणिररण्यं प्रत्यपद्यत ॥ १६ ॥ पितरं वरुण
ग्रस्तं श्रुत्वा जातमहोदरं ॥ रोहितो ग्राममेयाय तमिन्द्रः प्रत्यषेधत ॥ १७ ॥

च युता राज्ञा उक्तः ॥ १४ ॥ प्रार्थितो देवो वरुणः ततं का
लं प्रतैक्षत तेत्यर्थः ॥ १५ ॥ चिकीर्षितं आत्मना पशुना वरुणयजनं ॥ १६ ॥ ततः कुपितेन वरुणेन ग्रस्तं ॥ अत एव जातं महदुदरं यस्य तं पितरं श्रु २५
त्वा ॥ १७ ॥

मनांवर्षं ।१८। द्वितीयेत्तृतीयेचतुर्थेचवर्षेऽह्नस्तहा ॥ अभ्येत्याभ्येत्यतद्वैवृतं प्रतिषेधनकिंचित् किंचिदाह ॥ १९ ॥ २० वरुणेनमुक्तमुदरं यस्यमह

त्सुकृपायस्पसः ॥ २१ ॥ आत्मवानंतमदग्निरध्वर्युरभूत ॥ आयास्योमुनिः सामगउद्गाताऽभूदित्यर्थः ॥ २२ ॥ उपरिष्टात्विश्वामित्रसुतारव्या

नप्रसंगेन ॥ २३ ॥ अविहतांगतिंज्ञानं ॥ २४ ॥ तामेवगतिमाह ॥ साक्षीभ्यांमनः पृथिव्यांधारयन्ज्ञानकलांध्यात्वातयाअज्ञानंविनिर्दहन् ॥ तांच

हित्वामुक्तामुक्तेवंधनः तस्याविलयक्रयः ॥ मनोमूलोहिसंसारः मनश्चान्नमयंअन्नमयंहिसोम्यमनइतिश्रुतेः ॥ अतोन्नशब्दवाच्यांयांपृथि

न्नमेः पर्यटनंपुण्यंतीर्थक्षेत्रनिषेवणैः ॥ रोहितायादिशच्छक्रः सोप्यरण्येवसत्समां ॥ १८ ॥ एवंद्वितीयेत्तृतीयेचतुर्थेपंचमेतथा

अभ्येत्याभ्येत्यस्थविरोविप्रोभूत्वाहवृत्रहा ॥ १९ ॥ षष्ठंसंवत्सरंतत्रचरित्वारोहितःपुरीं ॥ उपव्रजन्नजीगर्तादक्रीणान्मध्य

मंसुतं ॥ शुनःशेफंपशुंपित्रेप्रदायसमवंदत ॥ २० ॥ ततः पुरुषमेधेनहरिश्चंद्रोमहायशाः ॥ मुक्तोदरोयजद्देवान्वरुणा

दीन्महत्कथः ॥ २१ ॥ विश्वामित्रोभवत्तस्मिन्होताचाध्वर्युरात्मवान् ॥ जमदग्निरभूद्ब्रह्मावसिष्ठोयास्यसामगः ॥ २२ ॥ त

स्मैतुष्टोददौइंद्रः शातकौंभमयंरथं ॥ शुनःशेफस्यमाहात्म्यमुपरिष्टात्प्रचक्ष्यते ॥ २३ ॥ सत्यंसारांधृतिंदृष्ट्वासभार्ये

स्यचभूपतेः ॥ विश्वामित्रोभृशंप्रीतोददावविहतांगतिं ॥ २४ ॥ मनःपृथिव्यांतामद्भिः तेजसापोनिलेनतत्खेवायुंधार

यंस्तच्चभूतादौतंमहात्मनि ॥ २५ ॥ तस्मिन्ज्ञानकलांध्यात्वातयाज्ञानंनिर्दहन् ॥ २६ ॥ हित्वातांस्वेनभावेननिर्वाणसु

खसंविदा ॥ अनिर्देश्याप्रतर्क्येणतस्थौविध्वस्तवंधनः ॥ २७ ॥ इति श्रीभागवतेमहापुराणेनवमस्कंधेहरिश्चंद्रोपाख्यानो

नामसप्तमोध्यायः ॥ ७ ॥

व्यांमनोधारयन् ॥ एकीकुर्वंस्ततोपृथिवीमद्भिरे कीकुर्वन् ॥ अपस्तेजसातत्तेजोनिले ॥ तंचखे आका

शंतच्चभूतादावहंकारे तंचतादिमहंकारंमहात्मनिमहत्तत्त्वे ॥ २५ ॥ तस्मिन्विषयाकारंव्यावर्त्यज्ञानकलांज्ञानांशमात्मत्वेनध्यात्वा

तयाध्यानवृत्तिरूपयाआत्मावरकमज्ञानंविनिर्दहन्निर्वाणसुखसंविदातांचहित्वामुक्तवंधनः सन्अनिर्देश्यरूपेणाप्रतर्क्येणस्वेन

नवमस्कंधेटीकायां ७६ ।। श्रीरामरामराम

(७)

भा० नृ०
२६

अथ हे मे रोहितस्योक्तो वंशो यत्राभवन्नृपः । सगरः कपिलाक्षेपात् निर्दग्धा यस्य सूनवः १ चंपस्तस्माद्भूत् येन चंपापुरी विनिर्मिता अतः चंपा
त्सुदेवः हताभूर्यस्य । और्वेणाज्ञे विरागात्मानं देहं प्रजावंतं सगर्भं गरो विषं तेन गरेण सहैव जातः ३ गुरुवाक्येन और्ववचनेन कांश्चिद्

श्रीशुक उवाच ॥ हरितो रोहितसुतश्चंपस्तस्माद्विनिर्मिता ॥ चंपापुरी सुदेवोऽतो विजयो यस्य चात्मजः ॥ १ ॥ भरुकस्तत्सुतस्तस्मा
त् वृकस्तस्यापि बाहुकः सोऽरिभिर्हृतभूराजा सभार्यो वनमाविशत् ॥ २ वृद्धं तं पंचतां प्राप्तं महिष्यनुमरिष्यति ॥ और्वेण जा
नतात्मानं प्रजावंतं निवारिता ॥ ३ आज्ञायास्यै सपत्नीभिर्गरो दत्तोऽन्धसा सह तेनैव संजातः सगराख्यो महायशाः ॥ ४ ॥ स सच
गरश्चक्रवर्त्यासीत् सागरो यत्सुतैः कृतः यस्तालजंघान् यवनान् शकान् हैहयबर्बरान् ॥ ५ ॥ अवधीत् गुरुवाक्ये
न चक्रे विकृतवेषिणः ॥ मुंडान् श्मश्रुधरान् कांश्चित् मुक्तकेशार्धमुंडितान् ॥ ६ ॥ अनंतर्वाससः कांश्चिदबहिर्वा
ससोऽपरान् सोऽश्वमेधैरयजत सर्ववेदसुरात्मकं ॥ ७ ॥ और्वोपदिष्टयोगेन हरिमात्मानमीश्वरं ॥ तस्योत्सृष्टं पशुं यज्ञे
जहाराश्वं पुरंदरः ॥ ८ ॥ सुमत्यास्तनया दृप्ताः पितुरादेशकारिणः ॥ हयमन्वेषमाणास्ते समंतान्न्यखनन् महीं ॥ ९ ॥ प्रागुदी
च्यां दिशि हयं ददृशुः कपिलांतिके ॥ एष वाजिहरश्चौर आस्ते मीलितलोचनः ॥ १० ॥ हन्यतां हन्यतां पाप इति षष्टिसहस्रि
णः ॥ उदायुधा अभिययुरुन्मिमेष तदा मुनिः ॥ ११ ॥ स्वशरीराग्निना तावन्महेंद्रहृतचेतसः ॥ महद्व्यतिक्रमहता भस्मसाद्
भवत्क्षणात् ॥ १२ ॥

हत्वैव विकृतवेषिणश्चक्रे ॥ तदेवाह मुंडानिति ॥ मुक्तके ... शान् अर्धमुंडितांश्च ॥ और्वेणोपदिष्टो यो योगस्तेन ॥ ८ ॥ तस्य हे भार्ये सुमतिः केशिनी च ॥ तत्र सुमत्याः पुत्राणां प्रभावं मृत्युं चाह ॥ सुमत्या इति षड्भिः ॥ ९ ॥ एष वाजिहर इति ब्रुवतोऽभि ययुः ॥ १० ॥ षष्टिसहस्राणि परिच्छेदकतया संति येषां ते उन्मिमेष लोचनोन्मीलनं चकार ॥ ११ ॥ २६

केचितु कपिलस्य कोपाग्निना दग्धा इति वर्णयंति तन्निराकरोति नेति ॥ कुत इत्यत आह ॥ सत्वधामनि शुद्धसत्वमूर्तौ जातः पवित्रं शुद्धिकर
आत्मा यस्य तस्मिन् कथं विभाव्यते ॥ असंभावनायां दृष्टांतः भुवो रजः खे कथं संभाव्यते ॥ १३ ॥ किंच यस्य येन ईरिता प्रवर्त्तिता तस्य विप
श्चितः सर्वज्ञस्य कथं पृथग्मतिः अरिमित्रादिभेददृष्टिः ॥ १४ ॥ तदेवं सुमत्याः पुत्रेषु मृतेषु केशिन्याः पौत्रेणांशुमता समानीतः पितृव्यो दुर
गाद्य यत्तस्य वृत्तं तद्दर्शयितुमाह । योसमंजस इति उक्तः केवलमंज्ञैः वस्तुतस्तु समंजस एव स तु केशिन्याः सुतः । हेयं जलमिव धृती तं वार

न साधुवादो मुनिकोपभर्जिता नृपेंद्रपुत्रा इति सत्वधामनि ॥ कथं तमो रोषमयं विभाव्यते जगत्पवित्रात्मनि खे रजो भुवः
॥ १३ ॥ यस्येरिता सांख्यमयी दृढेह नौर्यया मुमुक्षुस्तरते दुरत्ययं ॥ भवार्णवं मृत्युपथं विपश्चितः परात्मभूतस्य कथं
पृथग्मतिः ॥ १४ ॥ योसमंजस इत्युक्तः स केशिन्यां नृपात्मजः ॥ तस्य पुत्रोंशुमान्नाम पितामहहिते रतः ॥ १५ ॥ असमंज
स आत्मानं दर्शयन्नसमंजसं जातिस्मरः पुरा संगात् योगी योगाद्विचालितः ॥ १६ ॥ आचरन् गर्हितं लोके ज्ञातीनां कर्म
विप्रियं ॥ सरय्वां क्रीडतो बालान् प्रास्यदुद्वेजयन् जनं ॥ १७ ॥ एवं वृत्तः परित्यक्तः पित्रा स्नेहमपोह्य वै ॥ योगैश्वर्येण
बालांस्तान् दर्शयित्वा ततो ययौ ॥ १८ ॥ अयोध्यावासिनः सर्वे बालकान् पुनरागतान् ॥ दृष्ट्वा विसिस्मिरे राजन् राजा चा
प्यन्वतप्यत ॥ १९ ॥ अंशुमांश्चोदितो राज्ञा तुरंगान्वेषणे ययौ ॥ पितृव्यखातानुपथं भस्मांतिद्दृशे हयं ॥ २० ॥

यति ॥ तस्यैव नृपस्यात्मनो देहाऽज्जातः ॥ तस्य कथामाह । चतुर्भिः असमंजसः पुरा पूर्वजन्मनि योगी सन् ॥ संगाद्धेतोः योगाद्विचालितः ॥ अतः इ
दानीं जातिस्मरः सन् संगपरिहाराय जनमुद्वेजयन् लोके गर्हितं ज्ञातीनां च विप्रियं कर्माचरन् । क्रीडतो बालान् सरय्वां प्रास्यत प्राक्षिपदि
ति द्वयोरन्वयः ॥ १६ ॥ एवंवि[illegible]धं वृत्तं कर्म यस्य सः ॥ १८ ॥ पितृव्यैः खातमनुयः । पंथाः तं ययौ । भस्मांति भस्मसमीपे । २० ॥

भा० न०
१७

अज्ञानतोऽवज्ञानतोप्यनुकंप्यावयं त्विति ॥ तुशब्दद्विरीशानमंशुमानेवमाशय २१ ॥ अजनः अजः ब्रह्मापि त्वं यद्यापि न पश्यति न च बुध्यते
कथंभूतं ॥ आत्मनः स्वस्मात्परं परमेश्वरं कैर्हेतुभिः समाधियुक्तिभिः ॥ समाधिनाप्यपरोक्षं न पश्यति युक्तिभिः परोक्षमपि सम्यग् न बुध्यत इत्यर्थः
अपरे अर्वाचीनास्तु कुतस्त्वां पश्येयुः अर्वाचीनत्वे हेतुः तस्य ब्रह्मणः मनश्च शरीरं च धीश्च सत्वतमोरजःकार्याणि ताभिर्ये विविधा देवा
तिर्यङ्नराणां सर्गाः तेषु सृष्टाः तत्रापि वयं अप्रकाशाः अज्ञाः कुतः पश्याम इत्यर्थः २२ अपरे तर्हि किं पश्यंति ॥ तदाह ॥ ये देहभाजस्त्वस्मिन्
सम्यक् स्थितमपि त्वां न विदुः ॥ किंतु गुणानेव विपश्यंति अप्रधान गुणानपि तु तम एव पश्यंति ॥ यतस्त्रिगुणा बुद्धिरेव प्रधानं येषां अ

तत्रासीनं मुनिं वीक्ष्य कपिलाख्यमधोक्षजं ॥ अस्तौत्समाहितमनाः प्रांजलिः प्रणतो महान् ॥ २१ ॥ अंशुमानुवाच ॥ न पश्य
ति त्वां परमात्मनोऽजनो न बुध्यतेद्यापि समाधियुक्तिभिः ॥ कुतोपरे तस्य मनःशरीरधीविसर्गसृष्टा वयमप्रकाशाः ॥ २२ ॥
ये देहभाजस्त्रिगुणप्रधाना गुणान्विपश्यंत्युत वा तमश्च ॥ यन्मायया मोहितचेतसस्त्वां विदुः स्वसंस्थं न बहिःप्रका
शाः ॥ २३ ॥ तं त्वामहं ज्ञानघनं स्वभावप्रध्वस्तमायागुणभेदमोहैः ॥ सुनंदनाद्यैर्मुनिभिर्विभाव्यं कथं विमूढः परिभा
वयामि ॥ २४ ॥

तो बहिरेव प्रधानं येषां ॥ अतो बहिरेव प्रकाशो ज्ञानं येषां बुद्धिपरतंत्रतया जाग्रत्स्वप्नयोर्विषयान्पश्यंति सुषुप्तौ तम एव केवलं न तु नि
र्गुणं त्वां सर्वत्र हेतुः ॥ यत् यतः यस्य तव मायया ते तिवा मोहितं चेतो येषां ते ॥ २३ ॥ तथाप्यहं विचारेण ज्ञास्यामीति चेत्तत्राह तं त्वामहं
विमूढः कथं परिभावयामि विचारयामि ॥ कथंभूतं ज्ञानघनं शुद्धज्ञानमूर्तिं ॥ स्वत एव प्रध्वस्तो मायागुणनिमित्तो भेदमोहो येषां
तैर्विभाव्यं विचिंत्यं अयं भावः ॥ ज्ञानैकघनत्वान्न तावत् ज्ञानविषयत्वं विचारविषयत्वेपि मायागुणैरभिभूतोहं न विचारे समर्थ इति ॥ २४ १७

का

तस्मात हे प्रशांत त्वां पुराणपुरुषं केवलं नमामे स्मन्वयः ॥ पुराण पुरुषत्वे हेतुः ॥ मायाया गुणाः । कर्माणि च विश्वस्य स्रष्ट्रादीनि लिंगानि ब्र
ह्मादि रूपाणि यस्य तं । प्रशांतत्वे हेतु ॥ सदसद्भ्यां कार्यकारणाभ्यां पुण्यपापाभ्यां वा विमुक्तं । अतः अनामरूपं न तत्कृत नामरूपश्र्
न्यं किंतु ज्ञानोपदेशाय गृहीतः प्रकटितो देहः ॥ शुद्धसत्वमूर्त्तिर्येन तं यद्वा हे प्रशांत मायेति ॥ हे अगुण इति च संबोध्य कर्म्मभिः स्रष्ट्रादि
कार्यैर्लिंगानि यस्येति योऽन्वयः यद्वा । प्रशांता माया गुणाद्या यस्मिन् इत्येकमेव पदं ॥ २५ ॥ स्व भाग्यं श्लाघ्यते त्वन्माय तिद्वाभ्यां कामादि ।

प्रशांतमायागुणकर्म्मलिंगमनामरूपं सदसद्विमुक्तं ॥ ज्ञानोपदेशाय गृहीतदेहं नमामहे त्वां पुरुषं पुराणं ॥ २५ ॥
काम त्वन्मायया चेरिते लोकवस्तुबुध्या गृहादिषु । भ्रमति लोभेर्ष्यामोहविभ्रांतचेतसः ॥ २६ ॥ अद्य नः सर्वभूतात्मन् काम
कर्म्मेंद्रियाशयः ॥ मोहपाशो दृढश्छिन्नो भगवंस्तव दर्शनात् ॥ २७ ॥ श्रीशुक उवाच ॥ इत्थं गीतानुभावस्तं भगवान् क
पिलो मुनिः । अंशुमंतमुवाचेदमनुगृह्य धिया नृप ॥ २८ ॥ श्रीभगवानुवाच ॥ अश्वोयं नीयतां वत्स पितामह पशुस्तव
इमे च पितरो दग्धा गंगांभोऽर्हंति नेतरत् ॥ २९ ॥ तं परिक्रम्य शिरसा प्रसाद्य हयमानयत् ॥ सगरस्तेन पशुना क्रतुशेषं
समापयत् ॥ ३० ॥ राज्यमंशुमति न्यस्य निःस्पृहो मुक्तबंधनः ॥ और्वोपदिष्टमार्गेण लेभे गतिमनुत्तमं ॥ ३१ ॥ इति श्रीभा
गवते महापुराणे नवमस्कंधे सगरोपाख्यानेऽष्टमोध्यायः ॥ ८ ॥ श्रीराधावरः ॥ श्री ॥ श्री ॥

निर्विभ्रांतानि चेतांसि येषां तथाभूताः सर्वे गृहादिषु भ्रमंति ॥ २६ ॥ हे सर्वभूतात्मन् नः अस्माकं त्वत्कृपयैव घटितात् । त्वद्दर्शनादिति दृढो
पि मोहमयः पाशः छिन्नः कथंभूतः कामादीनामाशयः ॥ आश्रय ॥ त्वत्प्रसादेन कृतार्थोस्मीति पर्यः ॥ २७ ॥ अंशुल्लब्धापि
साकांक्षं प्रत्याह ॥ इमे चेति परिक्रम्येति स्पष्टोक्तिः ॥ ८ ॥ इति ऽष्टाध्यायः ॥ श्री ॥

नवमेंशुमतो वंशः खट्वांगावधिवर्ण्यते ॥ गंगाभूतलमानिन्ये यस्य पौत्रो भगीरथः ॥ यथा सगरपौत्राय राज्यं दत्वा तपस्तेपे तथांशुमान् स्व
स्वपुत्राय राज्यं दत्वा महांतं कालं तपस्तेपे इति चकारस्यार्थः ॥ नाशक्नोत् गंगामानेतुमिति शेषः संस्थितः मृतः कालं मृत्युं रिष्टिवान् श
सः ॥ तं प्रत्यात्मानं दर्शयामास वरदास्मीति गंगयोक्तः ॥ स नः स्वमभिप्रायं पूर्वजोद्धरणं शंसं कथयामास ॥ ३ ॥ आह गंगा ॥ कोपि गां ग-
नात्पतंत्या मे वेगं धारयिष्यति ॥ भित्वान्यथा यास्ये रसातलं ॥ किंच आखंडलं तिष्ठालयिष्यति तत्रोपायो विचिंत्यतां ॥ ५ ॥ हरंति हरिष्यति अघं

श्रीशुक उवाच ॥ अंशुमांश्च तपस्तेपे गंगानयनकाम्यया ॥ कालं महांतं नाशक्नोत्ततः कालेन संस्थितः ॥ १ ॥ दिलीपस्तत्सु
तस्तद्वदशक्तः कालमेयिवान् ॥ भगीरथस्तस्य पुत्रस्तेपे स सुमहत्तपः ॥ २ ॥ दर्शयामास तं देवी प्रसन्ना वरदास्मि ते ॥
इत्युक्तः स्वमभिप्रायं शशंसावनतो नृपः ॥ ३ ॥ कोपि धारयिता वेगं पतंत्या मे महीतले ॥ अन्यथा भूतलं भित्वा नृप यास्ये
रसातलं ॥ ४ ॥ किंचाहं न भुवं यास्ये नरा मय्यामृजंत्यघं ॥ मृजामि तदघं कुत्र राजंस्तत्र विचिंत्यतां ॥ ५ ॥ भगीरथ उवाच ॥
साधवो न्यासिनः शांता ब्रह्मिष्ठा लोकपावनाः ॥ हरंत्यघं तेंगसंगात्तेष्वास्ते ह्यघभिद्धरिः ॥ ६ ॥ धारयिष्यति ते वेगं रुद्रस्त्वा
त्मा शरीरिणां ॥ यस्मिन्नोतमिदं प्रोतं विश्वं शाटीव तंतुषु ॥ ७ ॥ इत्युक्त्वा स नृपो देवं तपसातोषयच्छिवं ॥ कालेनाल्पीयु
सा राजंस्तस्येशः समतुष्यत ॥ ८ ॥ तथेति राज्ञाभिहितं सर्वलोकहितः शिवः ॥ दधारावहितो गंगां पादपूतजलां हरेः ॥ ९ ॥

निर्मलीत्यघभित् ६ ॥ आत्मा कथंभूतः यस्मिन्निदं विश्वमोतं ग्रथितं ॥ ऊर्ध्वतंतुषु शाटीव पटइव ॥ प्रोतं च तिर्यक्तंतुषु पट इव ॥ असौ स
र्वो धारस्त्वद्वेगं धारयिष्यतीत्यर्थः ॥ इति एवं गंगामुक्त्वा तच्छ्रुत्वेति पाठे श्रावयित्वेत्यर्थः ॥ ८ ॥ राज्ञाभिहितं तथेत्यंगीकृत्य हरेः पादेन

प्रसंगाद्गंगामाहात्म्यमाह ॥ चतुर्भिः यस्याः जलस्पर्शमात्रेण तच्चकेवलंदेहभस्मभिरेव नसाक्षात् ॥ ब्रह्मणिस्वकृतेनदंडेनहताअपितांश्रद्
धायेसेवंतेतित्रिभिः ॥ २२ ततः प्रपंचयति नस्मीन्त्तेनांगेनयः संगः तेन ॥ २३ अनंतस्याविश्लेषणंसंनिवेश्येति ॥ त्रैगुण्यंदेहसंबंधं ॥ २५ ॥ न

भगीरथः सराजर्षिर्निन्ये भुवनपावनीं ॥ यत्रस्वपितॄणांदेहाभस्मीभूताः स्मशेरते ॥ २० ॥ रथेनवायुवेगेनप्रयांतमनु-
धावती ॥ देशान्पुनंतीनिर्दग्धानासिंचत्सगरात्मजान् ॥ २१ ॥ यज्जलस्पर्शमात्रेण ब्रह्मदंडहता अपि ॥ सगरात्मजादिवंज-
ग्मुः केवलंदेहभस्मभिः ॥ २२ ॥ भस्मीभूतांगसंगेनस्वर्याताः सगरात्मजाः ॥ किंपुनः श्रद्धयादेवींयेसेवंतेधृतव्रताः ॥ २३ ॥
नह्येतत्परमाश्चर्यं स्वर्धुन्यायदिहोदितं ॥ अनंतचरणांभोजप्रसूतायाभवच्छिदः ॥ २४ ॥ संनिवेश्यमनोयस्मिन् श्रद्-
धयामुनयोमलाः ॥ त्रैगुण्यंदुस्त्यजंहित्वासद्योयातास्तदात्मतां ॥ २५ ॥ श्रुतोभगीरथाज्जज्ञेतस्यनाभोपरोभवत्
त सिंधुद्वीपस्ततस्तस्मादयुतायुस्ततोऽभवत् ॥ २६ ॥ ऋतुपर्णोनलसखोयोश्वविद्यामयान्नलात् ॥ दत्वाक्षहृदयंचा-
स्मैसर्वकामस्तुतत्सुतः ॥ २७ ॥ ततः सुदासस्तत्पुत्रोमदयंतीपतिर्नृप ॥ आहुर्मित्रसहंयंवैकल्मषाङ्घ्रिमुतक्वचित्
॥ २८ ॥ वसिष्ठशापाद्रक्षोभूदनपत्यः स्वकर्मणा ॥ राजोवाच ॥ किंनिमित्तोगुरोः शापः सौदासस्यमहात्मनः ॥
एतद्वेदितुमिच्छामः कथ्यतांनरहोयदि ॥ २९ ॥ श्रीशुकउवाच ॥ सौदासोमृगयांकंचिच्चरन्रक्षोजघानह ॥ मुमो-
चभ्रातरंसोथगतः प्रतिचिकीर्षया ॥ २० ॥ सचिंतयन्नघंराज्ञः सूदरूपधरोगृहे ॥ गुरवेभोक्तुकामायपक्त्वानिन्येनरामिषं ॥ २१ ॥

लस्यसखा ॥ अयात् प्राप ॥ तत्सुतः ऋतुपर्णस्यसुतः ॥ २७ ॥ तत्पुत्रः सौदासः ॥ २८ ॥ नरहः नरहस्यं ॥ २९ ॥ मृगयांचरन्कंचितरक्षःकंचिद्राक्षसंजघा-
न ॥ तस्यभ्रातरममुमोच ॥ सभ्रातापलाय्यगतः ॥ २० ॥ अयंप्रतिचिकीर्षया सूदः पाचकस्तद्रूपधरसन्राज्ञोगृहेवर्तमानः ॥

भा० न०
२९ मित्र

अभक्ष्यमंजसा विलोक्य ॥ २२ ॥ एवं नरमांसव्यवहारेण वशिष्ठ एवं तं आपं द्वादशवार्षिकं चक्रे ॥ रुशतीः तीक्ष्णाः अपः स्वपादयोरुत्सृष्टौ नान्य
त्र ॥ २३ ॥ तत्र हेतुः दिशः इति एवं अनेनैनसः हत्वमपि दर्शितं ॥ मित्रस्य कलत्रस्य वाचः सूहनात् ॥ २४ ॥ तदेवं राक्षसत्वं कल्माषांघ्रित्वेन चकार
एणमुक्तात्वकर्मणाऽनपत्य इति यदुक्तं तत्प्रपंचयति ॥ व्यवायकाल इत्यादिना कर्मणा अपड इत्येतेन ॥ वनमोको निवासो ययोः तौ वनौक

परिवेष्यमाणं भगवान् विलोक्यामेध्यमंजसा ॥ राजानमशपत्क्रुद्धो रक्षो ह्येवं भविष्यसि ॥ २२ ॥ रक्षः कृतं तद्विदित्वा चक्रे द्वा
दशवार्षिकं सोऽप्यपोंऽजलिनादाय गुरुं शप्तुं समुद्यतः ॥ वारितो मदयंत्यापो रुशतीः पादयोर्जहौ ॥ २३ ॥ दिशः खमवनिं सर्वं
पश्यन् जीवमयं नृपः ॥ राक्षसंभावमापन्नः पादे कल्माषतां गतः ॥ २४ ॥ व्यवायकाले ददृशे वनौकोदंपती द्विजौ ॥ क्षुधार्तो
जग्राह विप्रं तत्पत्न्याहाकृतार्थवत् ॥ २५ ॥ न भवान् राक्षसः साक्षादिक्ष्वाकूणां महारथः ॥ मदयंत्याः पते वीर नाध
र्मं कर्तुमर्हसि ॥ २६ ॥ देहि मेऽपत्यकामाया अकृतार्थं पतिं द्विज ॥ देहोऽयं मानुषो राजन् पुरुषस्याखिलार्थदः ॥ २७ ॥
तस्मादस्य वधो वीर सर्वार्थवध उच्यते ॥ एष हि ब्राह्मणो विद्वान् तपःशीलगुणान्वितः ॥ आरिराधयिषुर्ब्रह्म महापुरुष
संज्ञितं सर्वभूतात्मभावेन भूतेष्वंतर्हितं गुणैः ॥ २९ ॥ सोऽयं ब्रह्मर्षिवर्यस्ते राजर्षिप्रवराद्विभो ॥ कथमर्हति धर्मज्ञ वधं पितुरिवा
त्मजः ॥ ३० ॥ तस्य साधोरपापस्य भ्रूणस्य ब्रह्मवादिनः ॥ कथं वधं यथा बभ्रोर्मन्यते सम्मतो भवान् ॥ ३१ ॥

सो च तौ दंपती च पृथक्पदत्वेऽसकारलोप आर्षः ॥ अकृतार्थवत् दीनवत् ॥ अकृतार्थं असमाप्तरतिं सर्वभूतानामात्मेति भावनया आराधयितु
मिच्छुः ॥ यद्वा सर्वभूतानामात्मभावेन भूतेषु स्थितमपि गुणैरंतर्हितं ब्रह्मेति संबंधः पाठांतरे ॥ अंतर्हितः सोऽयमित्युत्तरेणान्वयः ॥ २९ ॥ १९
भ्रूणस्य श्रोत्रियस्य गर्भस्य सत इति वा ॥ बभ्रोः गोः सतां मतो भवान् वधं कथं साधु मन्यत इत्यर्थः ॥ ३१ ॥

क्षणमपियेनविनानजीविष्यामिसोयंयदिभक्षःक्रियतेतर्हिमृतकंयथामृतप्रायांमांपूर्वंभक्षय॥३३॥ दिधिषुंगर्भाधानकर्त्तारं॥३५॥ आधा
नात् मैथुनात् हे अकृतप्रज्ञ मत्त त्वमेवंमयादर्शितः॥३६॥ तदेवंकर्मणाअप्रजाः॥३९॥ अबिभ्रत्धारितवती नतुव्यजायत ततप्रसूत॥
अतोवसिष्ठएवतस्याउदरमश्मनाऽघ्नात् सउत्पन्नः॥सुतोश्मकः॥४०॥ स्त्रीभिः सर्वेक्षत्रपरशुरामात्परिरक्षितः अतोनारीकवचइ

यद्ययंक्रियतेभक्ष्यस्तर्हिमांखादपूर्वतः॥ नजीविष्येविनायेनक्षणंचमृतकंयथा॥३३॥एवंकरुणभाषिण्याविलपंत्याअनाथवत्॥ व्याघ्रःपशुमिवाखादत्सौदासःशापमोहितः॥३४॥ ब्राह्मणीवीक्ष्यदिधिषुंपुरुषादेनभक्षितं॥ शोचंत्यात्मानमुर्वीशमशपत्कुपितासती॥३५॥ यस्मान्मेभक्षितःपापकामार्त्तायाःपतिस्त्वया॥ तवापिमृत्युराधानादकृतप्रज्ञदर्शितः॥३६॥ एवंमित्रसहंशप्त्वापतिलोकपरायणा॥ तदस्थीनिसमिद्धेग्नौप्रास्यभर्तुर्गतिंगताः॥३७॥ विशापोद्वादशाब्दांतेमैथुनायसमुद्यतः॥ विज्ञाप्यब्राह्मणीशापंमहिष्यासनिवारितः॥३८॥ ततऊर्ध्वंसतत्याजस्त्रीसुखंकर्मणाप्रजाः॥ वसिष्ठस्तदनुज्ञातोमदयंत्यांप्रजामधात्॥३९॥ सावैसप्तसमागर्भमबिभ्रन्नव्यजायत॥ जघ्नेश्मनोदरंतस्याःसोश्मकस्तेनकथ्यते॥४०॥ अश्मकान्मूलकोजज्ञेयःस्त्रीभिःपरिरक्षितः॥ नारीकवचइत्युक्तोनिःक्षत्रेमूलकोभवत्॥४१॥ ततोदशरथस्तस्मात्पुत्रऐडविडस्ततः॥ राजाविश्वसहोयस्यखट्वांगश्चक्रवर्त्यभूत्॥४२॥ योदेवैरर्थितोदैत्यानवधीद्युधिदुर्जयः॥ मुहूर्त्तमायुर्ज्ञात्वैत्यस्वपुरंसंदधेमनः॥४३॥

त्युक्तः निःक्षत्रेसतिक्षत्रवंशस्यमूलमभवत्अतोमूलकइतिचोक्तः॥प्रसन्नैर्देवैर्वरंवृणीष्वेत्युक्तेखट्वांगेनोक्तं॥प्रथमंतावन्ममायुः
कथ्यतामितिदेवैश्चोक्तेमुहूर्त्तमात्रमिति॥ततज्ञात्वादेवदत्तेनविमानेनशीघ्रंस्वपुरमेत्यमनःपरमेश्वरेसंदधे॥४३॥

एतदेव स्वसाधुरतानुस्मरणपूर्वकं तत्कृतेन निश्चयेन दर्शयति ॥ नेति सप्तभिः कुलदैवात ब्रह्म कुलात् सकाशात् मे प्राणादयो नातिव
ल्लभाः नातिप्रियाः ॥ ६४ ॥ मह्यं मम ॥ ६५ ॥ भूतभावनो हरिस्तस्मिन्नेव भावना यस्य सोऽहं तं कामं न वृणे ॥ ६६ ॥ तत्र हेतुः य इति विक्षिप्तानींद्रि
याणि धीश्च येषां ते देवा अपि ॥ ६७ ॥ अथ तस्मात् प्रकृत्यात्मभावेनात्म निरूढं गुणेषु संगं विसृज्य कर्तुर्भावेन हित्वा तमेवाहं प्रपद्ये ते ॥ ६८ ॥

न मे ब्रह्मकुलात् प्राणाः कुलदैवान्न चात्मजाः ॥ न श्रियो न मही राज्यं न दाराश्चातिवल्लभाः ॥ ६४ ॥ न बाल्येऽपि म
तिर्मह्यमधर्मे रमते क्वचित् ॥ नापश्याम्युत्तमश्लोकादन्यत्किंचन वस्त्वहं ॥ ६५ ॥ देवैः कामवरो दत्तो मह्यं त्रिभुवने
श्वरैः ॥ न वृणे तमहं कामं भूतभावनभावनः ॥ ६६ ॥ ये विक्षिप्तेंद्रियधियो देवास्ते स्वहृदि स्थितं ॥ न विंदंति प्रियं शश्वत
आत्मानं किमुतापरे ॥ ६७ ॥ अथेशमायारचितेषु संगं गुणेषु गंधर्वपुरोपमेषु ॥ रूढं प्रकृत्यात्मनि विश्वकर्तुर्भावेन
हित्वा तमहं प्रपद्ये ॥ ६८ ॥ इति व्यवसितो बुध्या नारायणगृहीतया ॥ हित्वान्यभावमज्ञानं ततः स्वं भावमाश्रितः ॥ ६९ ॥
यत्तद्ब्रह्म परं सूक्ष्ममशून्यं शून्यकल्पितं ॥ भगवान् वासुदेवेति यं गृणंति हि सात्वताः ॥ ५० ॥ इति श्रीभागवते महा
पुराणे नवमस्कंधे श्राद्धदेववंशानुवर्णनं नवमोऽध्यायः ॥ ९ ॥ श्रीशुक उवाच ॥ खट्वांगाद्दीर्घबाहुश्च रघुस्तस्मात्
पृथुश्रवाः ॥ अजस्ततो महाराजस्तस्माद्दशरथोऽभवत् ॥ १ ॥

अन्यभावं देहाद्यभिमानरूपमज्ञानं हित्वा ॥ ६९ ॥ स्वं भावमेवाह ॥ यत्तदिति ॥ शून्यवत्कल्पितं वागाद्यविषयत्वात् ॥ वासुदेव इति ॥ यं गृणं
ति ॥ ब्रह्मणैव भक्तानुग्रहार्थमाविःकृततनोर्वासुदेवत्वात् ॥ ५० ॥ इति नवमः ॥ ९ ॥ दशमे प्राह खट्वांगवंशे श्रीरामसंभवं तच्चरित्र

खट्वांगाद्दीर्घबाहुश्च ॥ रघुस्तस्मात्पृथुश्रवाः ॥

ऋषिभिर्वाल्मीकिमुख्यैर्भूरि वर्णितं त्वया मुहुः श्रुतं तथापि संक्षेपतः॥ कथ्यमानं शृणु॥ ३॥ ग्रंथकोटिभिराकीर्णमद्भुतं रामविक्रमं अध्यायद्वयतो वक्ष्यन्नेकश्लोके समस्यति॥ स कोशलेन्द्रः श्रीरामः नो स्मान् अवतात् पातु॥ कथंभूतः॥ यो गुर्वर्थे पितुः सत्यस्य पालनार्थं त्यक्तराज्यः सन्॥ पद्भ्यां वदति सुकुमाराभ्यां पद्भ्यां तु देवाह॥ प्रियाया पाणिनापि स्पर्शेना क्लिष्टमायव्यो ताभ्यां व्रतिवनं व्यचरत् हरीन्द्रो हनुमान्सुग्रीवो वा अनुजो लक्ष्मणस्ताभ्यां पतितापनीतापथश्रमो यस्य स्वरूपेण रव्यावैरूपात् करणं नासि

तस्यापि भगवानेष साक्षाद्ब्रह्ममयो हरिः॥ अंशांशेन चतुर्धागात्पुत्रत्वं प्रार्थितः सुरैः॥ २॥ रामलक्ष्मणभरतशत्रुघ्ना इति संज्ञया॥ तस्यानुचरितं राजन्नृषिभिस्तत्त्वदर्शिभिः॥ श्रुतं हि वर्णितं भूरि त्वया सीतापतेर्मुहुः॥ ३॥ गुर्वर्थे त्यक्तराज्यो व्यचरदनुवनं पद्मपद्भ्यां प्रियायाः॥ पाणिस्पर्शाक्षमाभ्यां मृजितपथरुजो यो हरीन्द्रानुजाभ्यां॥ वैरूप्याच्छूर्पणख्याः प्रियविरहरुषारोपितभ्रूविजृंभत्रस्ताब्धिर्बद्धसेतुः खलदवदहनः कोशलेन्द्रोवतान्नः॥ ४॥ विश्वामित्राध्वरे येन मारीचाद्या निशाचराः॥ पश्यतो लक्ष्मणस्यैव हता नैऋतपुंगवाः॥ ५॥ ॥ श्री॥ ॥ श्री॥

कालेदुष्टहेतोः॥ तया प्रलोभितेन रावणेनापहारात् प्रियेण कलत्रेण विरहः॥ तेन रुट॥ तया आरोपितयोर्भ्रुवोर्विजृंभेणैव त्रस्तो ब्धिर्यस्मात॥ ततस्तद्विज्ञापनेन बद्धः सेतुर्येन ततः॥ खला रावणादयः एव दवो वह्निस्तस्य दहनः॥ ४॥ संक्षेपतो वर्णितं रामचरित॥ आदितश्चारभ्य विस्तरेणाह विश्वामित्राध्वर इत्यादिनाया वकुतराध्यायसमाप्ति पश्यत एव लक्ष्मणस्य तमप्यनपेक्षैव हता इत्यर्थः

ना

रामश्रीमान्कोशलेन्द्रोवतान्नावः॥ ५॥

ना० न० लोकेयेवीरास्तेषांसमितौसमाजेरणेशौर्येयंवक्रंधनुरिक्षुयष्टिमिवलीलयैवादायसज्जीकृतमारोपितंविकृष्यमध्येवभंज ॥ हेमयज्ञसूः
२१ कठिनंगरिष्ठंतदाह ॥ वाहकानांत्रिभिःशतैरुपनीतं ॥ बालगजस्यलीलेवलीलायस्यसः ॥ ६ ॥ अनुरूपाणिस्ववयोरूपाभिजनगुणशीला
दीनियस्याःतांसीतांसंज्ञांपूर्वंउरसिअभिलब्धोमानोययातांश्रियंजित्वा ॥ धनुर्भंगमहानादंश्रुत्वागृहस्थितस्यभृगुपतेर्दर्पंच
नयन ॥ अपनीतवान् ॥ कथंभूतस्यत्रिःसप्तकृत्वःराजवीजस्यअन्यांमहींयोकरोत् ॥ तस्याश्शोणीगुर्वर्थइतिश्लोकविवरणंन्नाह ॥ यः

योलोकवीरसमितौधनुरैशमुग्रंसीतास्वयंवरगृहेत्रिशतोपनीतं ॥ आदायबालगजलीलइवेक्षुयष्टिंसज्जीकृतंनृपवि
कृष्यवभंजमध्ये ॥ ६ ॥ जित्वानुरूपगुणशीलवयोगरूपांसीताभिधांश्रियमुरस्यभिलब्धमानां ॥ मार्गेव्रजन्भृगुपतेर्व्य
नयत्प्ररूढंदर्पंमहीमकृतयस्त्रिरराजबीजां ॥ ७ ॥ यःसत्यपाशपरिवीतपितुर्निदेशंस्त्रैणस्यचापिशिरसाजगृहेस
भार्यः ॥ राज्यंश्रियंप्रणयिनःसुहृदोनिवासंत्यक्त्वाययौवनमसूनिवमुक्तसंगः ॥ ८ ॥ रक्षःस्वसुर्व्यकृतरूपमसु
द्धबुद्धेस्तस्याःखरत्रिशिरदूषणमुख्यवंधून ॥ जघ्नेचतुर्दशसहस्रमपारणीयकोदंडपाणिरटमानउवासकृच्छ्रं ॥ ९ ॥

तिकदाचित्कैकेय्याःतुष्टेनराज्ञात्वद्यपेक्षितंदास्यामीतिप्रतिश्रुतं । ततःश्रीरामस्ययुवराज्याभिषेकसमयेतयाभरतस्यराज्यंरामस्यच
वनेनिवासःप्रार्थितः ॥ तदासत्यपाशेनपरिवीतस्यपितुर्निदेशमाज्ञांशिरसाजगृहेततोराज्यादिकंत्यक्त्वासभार्योययौ ॥ दुरत्यजस्यापिस
हर्षंत्यागेदृष्टान्तः ॥ मुक्तसंगोयोगीअसून्प्राणानिवेति ॥ ८ ॥ रक्षसोरावणस्यस्वसुःशूर्पणखायाः । असुद्धबुद्धेःसीताद्विष्टबुद्धेःका
मातुरायाइतिवारूपंव्यकृतविकारमनयतसतस्याःखरत्रिशिरोदूषणमुख्यान्बांधवान्जघ्ने । चतुर्दशसहस्रंजयोनअपारणीयंअलंघ्यं २१
महत्कोदंडपाणौयस्यसः ॥ ९ ॥

सीतायाः कथाश्रवणेनदीपितोहृच्छयोयस्यतेनससीतांहरिष्यतास्वस्मान्नीतेनस्वस्याश्रमादयकषेणार्थेसस्पृष्टंमारीचंविलोक्यतद्यानकथं
भूतंश्चकृतेनवपुषास्वर्णहरिणदेहेनोपलक्षितं॥अतएवप्रलोभितात्माश्रमतत्स्तेमायकृष्टःसन्कंदर्हंयथागृध्रः॥श्रीरुद्रः॥१०॥ततस्त्व
रद्दैधमेनरावणेनअसमक्षमपनीतोयांप्रियया वियुक्तोभ्रात्रासहलक्ष्मणेनक्षपणावृहनेचचार॥किमभिप्रायःसन्॥इतिश्रुतेनप्र
कारेणस्त्रीसंगिनांदुःखैर्दक्कीजतिंप्रख्यापयन्॥११॥आत्मार्थेनकृतेनकर्मणारावणेनसहयुद्धेनहतंकृत्यशास्त्रीयंदहनादिकं

सीताकथाश्रवणदीपितहृच्छयेनसस्पृष्टंविलोक्यनृपतेर्दशकंधरेण॥उद्घेकृतेनवपुषाश्रमतोपकृष्टोमारीचमा
शुविशिखेनयथाकमुग्रः॥१०॥रक्षोधमेनरकवद्विपिनेऽसमक्षंवैदेहराजदुहितर्यपयापितायांभ्रात्रावने
क्षपणावतत्प्रियया वियुक्तःस्त्रीसंगिनांगतिमितिप्रथयंश्चचार॥११॥दग्ध्वात्मकृत्यहतकृत्यमहत्कवधंसख्यं
विधायकपिभिर्द्दयितागतिंतैः॥वुध्वाथवालिनिहतेप्लवगेंद्रसैन्यैर्वेलामगात्समनुजोऽम्बुभवाब्धिंतांद्धिः॥१२॥यद्रोषा
विभ्रमविवृत्तकटाक्षपातसंभ्रांतनक्रमकरोभयगीर्णयोयः॥सिंधुःशिरस्यहर्हणांपरिगृह्यरूपीपादारविंदमुपग
म्यवभाषरातत॥१३॥

यस्यतंजटायुषंपुत्रस्वदग्ध्वाकवंधंसख्यंग्रहणायप्रसारितवाकुंराक्षसमहत्अथवालिनिहतेतैः॥कपिभिर्द्दयितायागतिंवुध्वाअजभवा
त्मामर्च्चितामंघ्रीयस्यससमनुजोवेलांसमुद्रतीरमगात्॥१२॥तत्रत्रिरात्रमुपवासेनप्रतीक्षितोऽपिसिंधुर्यदानोपस्थितःतदायस्यरोषविभ्र
मेणक्रोधलीलयाविवृत्तोयःकटाक्षःतस्यापातेनसंभ्रांतानक्रमकराश्चयस्मिन्भयेनगीर्णोग्रस्तःभितोयोषोयेनसः॥सिंधुःएतद्द
र्हणामाणंवनाथेअर्हणासपर्यादिकंरूपीमूर्तिमान॥१३॥

ना० न० नायशामेवाह ॥ नत्वामिति द्वाभ्यां ॥ एतावत्पर्यंतं तु निश्चतं त्वां तविद्रामनज्ञानीमइत्यर्थः ॥ इदानीं तु ज्ञातोसीत्याह ॥ यद्दितिए थकुयंदं यसे
२२ त्यर्थः ॥ यद्धतोस्त्युः सत्वाद्दिभ्यः सुरगणादयो भवंतीति सभवानिति ॥ २४ ॥ कामं यथेष्टं जलमाक्रम्यापि प्रयाहि ॥ अवमेहं पुरीवशायं त्रैलोक्यं
एवयति ॥ आक्रंदयति तथा तं इहि वहे वीर यद्यपि तव जलं प्रतिबंधकं न भवति तथापी ह सेतुबंधो हि तत् हि किमर्थं ते यशः सविस्तारयितदेवाह
यं सेतुमुपेत्य दुःकरकर्मावेक्ष्य त्वद्यशो गास्यंति भूपास्तं ॥ २५ ॥ तद्वाक्यमभिनंदयतत्कृतं तदाह ॥ बध्वेति ॥ विविधैरद्रीणां कूटैः शृंगैः सेतुबध्वा

ॐ

तं त्वां वयं जडधियो नु विदाम भूमन् कूटस्थमादिपुरुषं गतामधीशं ॥ यत्सत्वतः सुरगणा रजसः प्रजेशा मन्योश्च भूतप
तयः सभवान् गुणेशः ॥ २४ ॥ कामं प्रयाहि जहि विश्रवसोऽवमेहं त्रैलोक्यरावणमवाप्नुहि वीर पत्नीं । बध्नीहि सेतुमिह ते
यशसो वितत्यै गायंति दिग्विजयिनो यमुपेत्य भूपाः ॥ २५ ॥ बध्वोदधौ रघुपतिर्विविधाद्रिकूटैः सेतुं कपीन्द्रकरकंपितभूरु
हांगैः ॥ सुग्रीवनीलहनुमत्प्रमुखैरनीकैर्लंकां विभीषणदृशाऽविशदग्रदग्धां ॥ २६ ॥ सा वानरेंद्रबलरुद्धविहारकोष्ठ
श्रीद्वारगोपुरसदोवलभीविटंका ॥ निर्भज्यमानधिषणध्वजहेमकुंभशृंगाटका गजकुलैर्हृदिनीव घूर्णा ॥ २७ ॥

अग्रे सीतान्वेषणे हनुमतैव दग्धां लंकामविशत् ॥ कथंभूतैः अंगैः कपींद्राणां करैः कंपितानि भूरुहाणां अंगानि शाखादीनि येषु तैः
विभीषणस्य दृशा बुध्या के: सहाविशत् ॥ सुग्रीवादयः प्रमुखा येषां तैरनीकैः ॥ २६ ॥ ततश्च सा लंका घोरं प्रचलिता बभूव ॥ कथंभूता वा
नरेंद्राणां बलैः रुद्धा विहारादयो यस्यां निर्भज्यमानाधिषणादयो यस्यां सा तत्र विहारः क्रीडास्थानं कोष्ठं धान्यागारादि श्रीः कोशः द्वा
रं गृहाद्दीनां गोपुरं पुरद्वारं सदः सभाः वलभी प्रासादादिपुरोभागछादिनी विटंकः कपोतपालिका ॥ धिषणं वेदिकादि शृंगाटकं चतुःप २२

रक्षस्पतीरावणः पुत्रमिंद्रजितं प्रहस्तादींश्च समहितोतथायुक्तः ॥१८॥ असिश्लादिभिर्दुर्जेमांतां यातुधानएतनां सुग्रीवादिभिरन्वितः
श्रीरामोभ्यगात् ॥ मरुतसुतोहनुमान् ऋक्षोजांबवान् ॥१९॥ तेरयुपरतेरनीकपाश्चंगदाद्याः सर्वेरावणस्यइत्यादिभिर्यद्रूरूयसेन्यंतत्र
द्वंद्वयुद्धाभवति ॥ तथापि पत्यसंगम्यकुमादिभिर्निर्दिग्धः ॥ कान्सीतायाअभिमर्शेनिहतंमंगलंयस्य सदृशवणः ईदृशोयेषांतान् ॥२०॥ स्वबल
स्यनशिंनाशमवेक्ष्यरुष्टः सन्यानकंपुष्पकंविमानंरथं ता आरुह्यश्रीराममभिससार ॥ अथतुस्वःस्पंदनेस्वर्गस्थे इंद्रस्यरथेमा

रक्षस्पतिस्तद्बलोकवनिकुंभकुंभधूम्राक्षदुर्मुखसुरांतनरांतकादीन् ॥ पुत्रंप्रहस्तमतिकायतिशिरःप्रनादीन्सर्वानुगा
न्समहितोदृष्टकुंभकर्णो ॥१८॥ तांयातुधानप्रतनामसिश्लचापप्रासर्ष्टिशक्तिशरतोमरखड्गदुर्गा ॥ सुग्रीवलक्ष्मण
मरुत्सुतगंधमादनीलांगदर्क्षपनसादिभिरन्वितोगात् ॥१९॥ तेनीकपारघुपतेरभिपद्यसर्वे द्वंद्वंवरूथमिभपत्तिरथा
श्वयोधैः ॥ जघ्नुर्द्रुमैर्गिरिगदेषुभिरंगदाद्याः सीताभिमर्शहतमंगलरावणेशान् ॥२०॥ रक्षस्पतिःस्वबलनष्टिमवे
क्ष्यरुष्टआरुह्ययानकमथाभिससाररामं ॥ स्वःस्यंदनेद्युमतिमातलिनोपनीते विभ्राजमानमहनन्निशितैःक्षुरप्रैः ॥
प ॥२१॥ राममुक्तमाह पुरुषादपुरीषयन्नः कांतासमक्षमसतोपहृताश्चवते ॥ त्यक्तत्रपस्यफलमद्यजुगुप्सितस्ययच्छामिका
लइवकर्तुरलंघ्यवीर्यः ॥२२॥ एवंक्षिपन्धनुषिसंधितमुत्ससर्ज बाणंसवज्रमिवतद्धृदयंबिभेद सोसृग्वमन्दशमुखैर्न्य
पतद्विमानाद्धाहेतिजल्पतिजनेसुकृतीवरिक्तः ॥२३॥

तलिना इंद्रसारथिनोपनीते द्युमतिदीप्तियुक्ते विभ्राजमानमहनत् अहत ॥२१॥ हे पुरुषाद पुरीषराक्षसपुरीषप्राय यद्यस्मात् उपहृता
श्ववत् श्वायथा असमक्षं गृहंप्रविश्य किमपिहरतितद्वत् ॥ तस्मात् जुगुप्सितस्यकर्मणः कर्तुस्ते ऽद्यकालइवालंघ्यवीर्योहं फलंयच्छा
मि ॥ अधर्मकर्तुः पुंसः कालोयच्छतीतिवा रिक्तः क्षीणपुण्यः सुकृती विमानाद्दिवविमानात्पुष्पकात् न्यपतदिति ॥२३॥

राक्षसस्त्रीगणां विलापमाह ॥ तत इति पंचभिः मुंदं स्वल्पमुदरं यस्याः तया र्वणभार्यया सह ॥ २४ ॥ परैरर्दिता ॥ २६ ॥ गृध्राणां अन्नं भक्ष्यः न
रकहेतवे नरकरोगाय ॥ २८ ॥ सांपरायिकं और्ध्वदैहिकं ॥ २९ ॥ आत्मनः स्वस्य संदर्शनेन य ॥ आह्लादस्तेन विकसन्मुखपंकजं यस्याः

ततोनिःक्रम्य लंकाया यातुधान्यः सहस्रशः ॥ मंदोदर्या समं तस्मिन् प्ररुदंत्य उपाद्रवन् ॥ २४ ॥ स्वान् स्वान् बंधून् परिष्वज्य
लक्ष्मणेषुभिरर्दितान् ॥ रुरुदुः सुस्वरं दीना घ्नंत्य आत्मानमात्मना ॥ २५ ॥ हा हताः स्म वयं नाथ लोकरावण रावण ॥ कं याया
च्छरणं लंका त्वद्विहीना परार्दिता ॥ २६ ॥ नवै वेद महाभाग भवान् कामवशं गतः ॥ तेजोनुभावं सीताया येन नीतो दशामि
मां ॥ २७ ॥ कृतैषा विधवा लंका वयं च कुलनंदन ॥ देहः कृतोन्नं गृध्राणामात्मा नरकहेतवे ॥ २८ ॥ श्रीशुक उवाच ॥
स्वानां विभीषणश्चक्रे कोशलेशानुमोदितः ॥ पितृमेधविधानेन यदुक्तं सांपरायिकं ॥ २९ ॥ ततो ददर्श भगवानशोकव
निकाश्रमे ॥ क्षामां स्वविरहव्याधिं शिंशपामूलमास्थितां ॥ ३० ॥ रामः प्रियतमां भार्यां दीनां वीक्ष्यान्वकंपत ॥ आत्म
संदर्शनाह्लादविकसन्मुखपंकजां ॥ ३१ ॥ आरोप्यारुरुहे यानं भ्रातृभ्यां हनुमद्युतः ॥ विभीषणाय भगवान् दत्वा रक्षोग
णेशतां ॥ ३२ ॥ लंकामायुश्च कल्पांतं ययौ चीर्णव्रतः पुरीं ॥ अवकीर्यमाणः कुसुमैर्लोकपालार्पितैः पथि ॥ ३३ ॥ उपगी
यमानचरितः शतधृत्यादिभिर्मुदा ॥ गोमूत्रयावकं श्रुत्वा भ्रातरं वल्कलांबरं ॥ ३४ ॥ महाकारुणिकोतप्यत् जटिलं स्थंडिले
शयं भरतः प्राप्तमाकर्ण्य पौरामात्यपुरोहितैः ॥ ३५ ॥ पादुके शिरसि न्यस्य रामं प्रत्युद्यतोग्रजम् ॥ ३६ ॥

तां ॥ ३१ ॥ यानं पुष्पकं भ्रातृभ्यां सुग्रीवलक्ष्मणाभ्यां ॥ ३२ ॥ आयुश्च दत्वा तेनापि सहैव ययौ ॥ ३३ ॥ गोमूत्रपक्वयवान्नभोजिनं भ्रातरम् ॥ ३६ ॥

स्वस्ति विरातरामं विनायोध्यामप्रविश्य ॥ स्वस्यवासं यत्र निर्मितवान तस्मात्सकाशात् गीतादिभिर्युक्तो रामं प्रत्युद्यतो निर्मुखं ययौ ब्रह्मघो
षेणपठद्भिः ॥ ३६ ॥ स्वर्णेरसाक्ताः कल्लोः प्रांतायासां ताभिः पताकाभिः हैमैरितिचत्वारिरथ विशेषणानि ॥ ३७ ॥ पारमेष्ट्यानि राज्ञा हि ग्नि
छत्रचामरादीनि प्रेम्णाप्रश्लिनं हृदयमीक्षणे चनेत्रेयस्य ॥ ३८ ॥ नेत्रजैर्जलैः स्नापयिन्नाश्लिष्य ॥ ३९ ॥ ये हे सतमाः कुलवृद्धाः तेभ्यो

नंदिग्रामात्स्वस्तिविरातगीतवादित्रनिः स्वनैः ॥ ब्रह्मघोषेण च मुहुः पठद्भिर्ब्रह्मवादिभिः ॥ ३६ ॥ स्वर्णकक्षपताकाभिर्हैमैः चित्र
ध्वजैः रथैः सदश्वैः रुक्मसन्नाहैर्भटैः पुरटवर्मभिः ॥ ३७ ॥ श्रेणीभिर्वारमुख्याभिर्भृत्यैश्चैव पदानुगैः ॥ पारमेष्ठ्यान्युपादाय एषा
पण्यान्युच्चावचानि च ॥ ३८ ॥ पादयोर्न्यपतत्प्रेम्णा प्रक्लिन्नहृदयेक्षणः ॥ ३९ ॥ पादुके न्यस्य पुरतः प्रांजलिर्बाष्पलोचनः ॥ ३९ ॥
तमाश्लिष्य चिरं दोर्भ्यां स्नापयन्नेत्रजैर्जलैः ॥ ४० ॥ रामो लक्ष्मणसीताभ्यां विप्रेभ्यो ये ऽर्हसत्तमाः ॥ तेभ्यः स्वयं नमश्चक्रे प्रजा
भिश्च नमस्कृतः ॥ ४१ ॥ धुन्वन्त उत्तरासंगान्पतिं वीक्ष्य चिरागतं ॥ उत्तराः कोशला माल्यैः किरंतो ननृतुर्मुदा ॥ ४२ ॥ पादुके भर
तो गृह्णात् चामरव्यजनोत्तमे ॥ विभीषणः ससुग्रीवः श्वेतं छत्रं मरुत्सुतः ॥ ४२ ॥ धनुर्निषंगाञ्छत्रुघ्नः सीता तीर्थकमंडलुं ॥ अ
बिभ्रदंगदः खड्गं हैमं चर्मर्क्षराण्नृप ॥ ४३ ॥ पुष्पकस्थोऽन्वितः स्त्रीभिः स्तूयमानश्च वंदिभिः ॥ विरेजे भगवान् राजन् ग्रहैश्चन्द्र
इवोदितः ॥ ४४ ॥ भ्रातृभिर्नंदितः सोऽपि सोत्सवां प्राविशत्पुरीं ॥ प्रविश्य राजभवनं गुरुपत्नीः स्वमातरं ॥ ४५ ॥ गुरून्वयस्या
वरजान्पूजितः प्रत्यपूजयत् ॥ वैदेही लक्ष्मणश्चैव यथावत्समुपेयतुः ॥ ४६ ॥ पुत्रान्स्वमातरस्तास्तु प्राणांस्तन्व इवोत्थि
ताः ॥ आरोप्यांकेऽभिषिंचंत्यो बाष्पौघैर्विजहुः शुचः ॥ ४७ ॥

पिनमतं च के ४ अयोध्याप्रवेशप्रकारमाह ॥ पादुके इति सार्धैः त्रिभिः ॥ ४२ ॥ धनुश्च निषंगौ च तान् ऋक्षराट् जांबवान गुरुपत्नीः कैके
यी ॥ ४५ ॥ वयस्यान वरजांश्च ॥ ४६ ॥ बाष्पौघैरभिषिंचंत्यः शुचः शोकान् विजहुः शोषं स्पर्शं ॥ ४७ ॥

भा०न० इतिनवमेदशमः ॥ ततस्त्वैकादशोयोध्यामावसन्ननुडैःसह ॥ यज्ञादियञ्चकारेशोरामस्तदनुवर्ण्यते ॥ १ ॥ तदंतरातासांदिशांमध्ये
२४ जटानिमुच्यविधिवत्कुलवृद्धैःसमंगुरुः ॥ अभ्यषिंचद्यथैवेंद्रंचतुःसिंधुजलादिभिः ॥ ४९ ॥ एवंकृतशिरःस्नानःसुवा
साःस्रग्व्यलंकृतःस्वलंकृतैःस्ववासोभिःभ्रातृभिर्मंत्रिभिर्बभौ ॥ ५० ॥ अग्रहीदासनंभ्रात्राप्रणिपत्यप्रसादितः प्रजाः
स्वधर्म्मनिरतावर्णाश्रमगुणान्विता ॥ ५१ ॥ जुगोपपितृवद्रामोमेनिरेपितरंचतं ॥ त्रेतायांवर्त्तमानायांकालःकृतसमोभव
त् ॥ ५२ ॥ रामेराजनिधर्म्मज्ञेसर्वभूतसुखावहे ॥ वनानिनद्योगिरयोवर्षाणिद्वीपसिंधव ॥ ५३ ॥ सर्वेकामदुघाआसन्
प्रजानांभरतर्षभनाधिव्या ॥ धिजराग्लानिदुःखशोकभयक्लमाः ॥ ५४ ॥ मृत्युश्चनेच्छतांनासीद्रामेराजन्यधोक्षजे ॥ प्रेम्णानुवृत्त्याशीले
नप्रश्रयावनतासती ॥ ५६ ॥ धियाह्रियाचभावज्ञाभर्त्तुःसीताहरन्मनः ॥ ६ ॥ इतिश्रीभागवतेमहापुराणेनवमस्कंधे
श्रीरामानुचरितेदशमोध्यायः ॥ १० ॥ श्रीशुकउवाच ॥ भगवानात्मनात्मानंराममुत्तमकल्पकैः ॥ सर्वदेवमयंदे
वंईजेआचार्यवान्मखैः ॥ १ ॥ होत्रेददादिशंप्राचींब्रह्मणेदक्षिणांप्रभुः ॥ अध्वर्यवेप्रतीचींचउदीचींसामगायसः
॥ २ ॥ आचार्यायददौशेषायावतीभूस्तदंतरा ॥ मन्यमानइदंकृत्स्नंब्राह्मणोर्हतिनिस्पृहः ॥ ३ ॥ इत्ययंतदलंकारवा
सोभ्यामवशेषितः ॥ तथाराज्ञपिवैदेहीसौमंगल्यावशेषिता ॥ ४ ॥ तेतुब्रह्मण्यदेवस्यवात्सल्यंवीक्ष्यसंस्तुतं ॥ प्रीताःक्लिन्न
धियस्तस्मैप्रत्यर्प्येदंबभाषिरे ॥ ५ ॥

+स्वान्निवृत्तांनासीत्रामेराजन्यधोक्षजे एकपत्नीव्रतधरोराजर्षिचरितःशुचि ॥ ५५ ॥ स्वधर्म्मंगृहमेधीयंशि+ मूलत्रुटी+

यावतीभूःताब्राह्मणएवार्हतीतिमन्यमानः ३ अयंश्रीरामःतत्तदासौमंगल्यमाभरणादिकंतावन्मात्रमवशेषितंयस्यास्तद्यति [illegible] ॥ ७ ॥ २४

अप्रतं किं अदत्तं सर्वं दत्तमित्यर्थः। विप्रप्रविप्र ।६॥ न्यस्तदंडैर्मुनिभिरर्पितौचितेन्यस्ताबंघ्रीय स्पतस्मैतेष्वर्पिताबंघ्रीयेनेतिवा ।७। अ
संविदः अज्ञानप्राचेतसो वाल्मीकिः ॥ तस्याश्रमपदामा ।१०॥ अंतर्वत्नी गर्भिणी क्रियाजातकर्माद्याः ।२१। ईश्वरोपि प्रचोरोहुं नाशक्तो

वाप्स ग्रा क चु: ॥ अप्रतं नः त्वया किं तु भगवान्भुवनेश्वरः ॥ यन्नोंतर्हृदयं विप्रपतमोहंसिस्वरोचिषा ॥ ६ ॥ नमो ब्रह्मण्यपदेवाय परा
मायाकुंठमेधसे उत्तमश्लोक धुर्याय न्यस्तदंडार्पितांघ्रये ।७। कदाचिल्लोकजिज्ञासुर्गूढोरात्र्यामलक्षितः ॥ चरन्वाचो श्र
णोद्रामो भार्यामुद्दिश्य कस्यचित् ॥ ८ नाहं बिभर्मि त्वां दुष्टामसतीं परवेश्मगां ॥ स्त्रीलोभी बिभृयात्सीतां रामो नाहं भजे पु
नः ॥९॥ इति लोकाद्बहुमुखाद्दुराराध्याद्संविदः ॥ पत्या भीतेन सा त्यक्ता प्राप [illegible] प्राचेतसाश्रमं ॥१०॥ अंतर्वैस्यात्मजौ स्मृतौ
तक्षः पुष्कल इत्यास्तां भरतस्य महीपते ॥१२॥ सुबाहुः श्रुतसेनश्च शत्रुघ्नस्य बभूवतुः । [illegible] गंधर्वान्कोटिशो जघ्ने भरतो विज
ये दिशां ॥१३॥ तदीयं धनमानीय सर्वं राज्ञे न्यवेदयत् ॥ शत्रुघ्नश्च मधोः पुत्रं लवणं नाम राक्षसं ॥१४॥ हत्वा मधुवने चक्रे
मथुरां नाम वै पुरीं ॥ मुनौ निःक्षिप्य तनयौ सीता भर्त्रा विवासिता ।१५। ध्यायती रामचरणौ विवरं प्रविवेश ह । ततः श्रुत्वा भग
वान्रामो रुंधन्नपि धिया शुचः ॥१६॥ स्मरंस्तस्या गुणांस्तांस्तान्नाशक्नोद्रोद्धुमीश्वरः ॥ स्त्रीपुंप्रसंग एतादृक सर्वत्रैव भयाव
हः अपीश्वराणां किमुत ग्राम्यस्य गृहचेतस ॥१७। तत ऊर्ध्वं ब्रह्मचर्यं धारयन्नजुहोत्प्रभुः । त्रयोदशाब्दसाहस्रमग्निहोत्रम
खंडितं ।१८॥

तेन चातिचित्रमेतदपीत्याह । स्त्रीपुंसोः प्रसंगः आसक्तिः त्रासमावहतीति तथा विभक्तेस्तु गार्थः ॥ पाठांतरं सुगमं । किमुत इति ग्रासंगि
कोक्तिः ॥१७॥ अग्निहोत्रमजुहोत् ॥ १८ ॥

त्मागते काले यमौ सा सुषुवे सुतौ ॥ कुशो लव इति ख्यातौ तयो
श्चक्रे क्रियां मुनिः ।२१। अंगदश्चित्रकेतुश्च लक्ष्मण + ॐ

आत्मज्योतिर्निजं धाम ॥ १८ ॥ जलबंधनमस्य युगे स्वरतसां वधइतीदं कविभिराश्चर्यमिव वर्णितमपि यशः स्तुतिर्न भवति तत्र हेतुः ॥ अ
धिकसाम्याभ्यां विमुक्तं धाम प्रभावो यस्य किं कपयः सहायाः अतः सुग्रीवाद्याश्रयं एवमपि आली लामात्रं तथैवेदमपि मुक्तं वैतदिलाहे
॥ सुराणां यांचया आत्ता स्वीकृता लीला यो तनुर्येन ॥ तस्यैवंविधलीला प्रयोजनं दर्शयन्नुपाकरणमति । यस्य यशः नृपाणां बुधिष्ठि
राद्दीनां सद्दस्सु ऋषयो मार्कंडेयाद्द्योगायंति दिगिभेन्द्राणां यद्दृवद्धानरणात् रूपतत्त्वं व्याप्तमित्यर्थः । नाकपालादेवाः वसुपा

स्मरतां हृदि विन्यस्य विद्धं दंडककंटकैः ॥ स्वपादपल्लवं राम आत्मज्योतिरगात्ततः ॥ १८ ॥ नेदं यशो रघुपतेः सुरया
च्ञयात्तलीलातनोरधिकसाम्यविमुक्तधाम्नः ॥ रक्षोवधो जलधिबंधनमस्त्रपूगैः ॥ किं तस्य शत्रुहनने कपयः सहा
याः ॥ १९ ॥ यस्यामलं नृपसदस्सु यशोधुनापि गायंत्यघघ्नमृषयो दिगिभेन्द्रपट्टं ॥ तन्नाकपालवसुपालकिरीटजु
ष्टपादांबुजं रघुपतेः शरणं प्रपद्ये ॥ २० ॥ यैः स्पृष्टोभिदृष्टो वा संविष्टोनुगतोपि वा । कौसलास्ते ययुः स्थानं यत्र गच्छंति
योगिनः ॥ २१ ॥ पुरुषो रामचरितं श्रवणैरुपधारयन् ॥ आनृशंस्यपरो राजन् कर्मबंधैर्विमुच्यते ॥ २२ ॥ राजोवाच ॥
कथं स भगवान् रामो भ्रातृन्वा स्वयमात्मनः ॥ तस्मिन्वा ते न्ववर्त्तंत प्रजाः पौराश्च ईश्वरे ॥ २३ ॥ ॥ श्री ॥

लाश्चते षां किरीटैर्जुष्टं पादांबुजं यस्य तं रघुपतिं । पाठांतरे तत् ॥ तस्य रघुपतेर्जुष्टं पादांबुजं प्रपद्य इत्यर्थः ॥ २० ॥ स रामः संविष्टः उप
वेशितः ॥ अनुगतो वा ॥ यैः ते कौशलादेशवासिनः । सर्वेपि यत्र योगिनो गच्छंति तत्तत्स्थानं ययुः । २१ ॥ आनृशंस्यपरः नृपशमनिरतः स
न विमुच्यते । २२ । स रामः स्वयं कथमवर्त्तत भ्रातृन् प्रति वा कथमवर्त्तत कथंभूतान् ॥ आत्मनः आत्मांशभूतान् तस्मिन्वा ईश्वरे ते
प्राज्ञादयः ॥ अनु अनंतरं कथमवर्त्तंतेति प्रश्नत्रयं ॥ २३ ॥

तत्र श्रीरामस्य भ्रात्रादिषु प्रवृत्तिप्रकारमाह ॥ अथेति ॥ अनेनैव भ्रातॄन् रामयितुं तदाज्ञानुसारितया प्रवृत्तिरुक्ता अथ सिंहासनस्वीकारानं
तरं ॥ २४ पुरीं च वर्णयति त्रिभिः ॥ गंधोदकैर्मदविंदुभिश्च आसिक्ता मार्गा यस्यां सुतरां मत्तामिव समृद्धां चेति वितर्के पाठांतरे वा

बादरायणिरुवाच ॥ अथादिशन् दिग्विजये भ्रातॄंस्त्रिभुवनेश्वरः ॥ आत्मानं दर्शयन् स्वानां पुरीमैक्षत सानुगः २४ ॥
आसिक्तमार्गां गंधोदैः करिणां मदशीकरैः ॥ स्वामिनं प्राप्तमालोक्य मत्तां वा सुतरामिव ॥ २५ ॥ प्रासादगोपुरसभा
चैत्यदेवगृहादिषु ॥ विन्यस्तहेमकलशैः पताकाभिश्च मंडितां ॥ २६ ॥ पूगैः सवृंतै रंभाभिः पट्टिकाभिः सुवाससं
आदर्शैरंशुकैः स्रग्भिः कृतकौतुकतोरणां ॥ २७ ॥ तमुपेयुस्तत्र तत्र पौरा अर्हणपाणयः ॥ आशिषो युयुजुर्दे
व पाहीमां प्राक् त्वयोद्धृतां ॥ २८ ॥ ततः प्रजा वीक्ष्य पतिं चिरागतं दिदृक्षयोत्सृष्टगृहाः स्त्रियो नराः ॥ आरुह्य हर्म्या
ण्यरविंदलोचनमतृप्तनेत्राः कुसुमैरवाकिरन् ॥ २९ ॥ अथ प्रविष्टः स्वगृहं जुष्टं स्वैः पूर्वराजभिः ॥ अनंताखि
लकोशाढ्यमनर्घ्योरुपरिच्छदं ॥ ३० ॥

सितरां कामोन्मत्तां गामिवेत्यर्थः ॥ २५ ॥ पौराणां तस्मिन् वृत्तिमाह ॥ तमुपेयुरिति वराहरूपेण त्वयोद्धृतामिमां पृथ्वीं पाहीति ॥ २८ ॥
प्रजानां तस्मिन् वृत्तिमाह ॥ ततः प्रजा इति ॥ २९ ॥ स्वयं कथमवर्तत तत्राह ॥ अथेति ॥ यावत्समाप्ति स्वगृहे प्रविष्टः
सन् तस्मिन् रेमे इति पंचमेनान्वयः ॥ गृहं वर्णयति सार्द्धैस्त्रिभिः अनंता येऽखिला रत्नादीनां कोशास्तैराढ्यं अनर्घ्यो उरु
वः परिच्छदो यस्मिन् ॥ ३० ॥

भा० न० विद्रुमममयाउडुंबराद्देहल्यो येषु तैर्द्वारैः स्वच्छैः स्थूलैः॥ तृतीयांतानां मंडितमिति लिंगविपरिणामेनान्वयः॥३१॥ वाससां मणिगणानां च अंशुकैः
२६ दीप्तिभिः॥ चितं चैतन्यत्तद्वदुल्लासे उज्वलैः॥ युद्वा चिदिति क्वचित् वैडूर्य्यस्तंभादिषु युद्याङ्गोभमुज्वलैर्मुक्ताफलैः मंडितमित्यर्थः
कांताः कमनीयाः॥ कांतोपयत्तयो भोगसाधनानि ताभिः भूषणानां भूषणं नांभूषणोनां भूषणभूतैः॥३३॥ नृणां मध्ये यद्धा नृणां

विद्रुमोदुंबरद्वारैः वैडूर्यस्तंभपंक्तिभिः॥ स्थले मारकतैः स्वच्छैर्भ्राजत्स्फाटिकभित्तिभिः॥३१॥ चित्रस्रग्भिः पट्टिकाभिर्वा
सोमणिगणांशुकैः॥ मुक्ताफलैः चिदुल्लासैः कांतकामोपपत्तिभिः॥३२॥ धूपदीपैः सुरभिभिर्मंडितं पुष्पमंडनैः
॥ स्त्रीपुंभिः सुरसंकाशैर्जुष्टं भूषणभूषणैः॥३३॥ तस्मिन्स भगवान् रामः स्निग्धया प्रिययेष्टया॥ रेमे स्वारामधीरा- ५५
णामृषभः सीतया किल॥३४॥ बुभुजे च यथाकालं कामान्धर्ममपीडयन्॥ वर्षपूगान्बहून्नृणामभिध्यातांघ्रिपल्ल-
वः॥३५॥ इति श्रीभागवते महापुराणे नवमस्कंधे श्रीरामोपाख्याने एकादशोध्यायः॥ श्रीशुक उवाच॥
कुशस्य चातिथिस्तस्मान्निषधस्तत्सुतो नभः॥ पुंडरीकोथ तत्पुत्रः क्षेमधन्वाभवत्ततः॥१॥ देवानीकस्ततोनीहः पारिपा-
त्रोथ तत्सुतः॥ ततो बलस्थलस्तस्माद्वज्रनाभोर्कसंभवः॥२॥ खगणस्तत्सुतस्तस्माद्विधृतिश्चाभवत्सुतः॥ ततो हिरण्य
नाभोभूत् योगाचार्यस्तु जैमिनेः॥३॥

व नृभिरभिध्यातमंघ्रिपल्लवं यस्येति॥३५॥ नवमे एकादशोध्यायः॥ द्वादशे रामपुत्रस्य कुशस्यान्वय उच्यते॥ रावमिक्ष्वाकुपुत्रस्य शशादस्येरि-
तोन्वयः॥ कुशस्य रामपुत्रस्यातिथिः सुतोभूत्॥१॥ अर्कसंभवः अर्कस्यांशात्संभूतः॥२॥ हिरण्यनाभः कथंभूतः जैमिनेः शिष्यो २६
योगाचार्यः॥३॥

तदाह । यतः सकाशात् कौशल्यो याज्ञवल्क्य ऋषिः अध्यात्मं योगमधगात् महांतं उदयाः सिद्धयो यस्मिन् तं हृदयग्रंथेर्भेदकं च ॥ ४ ॥ म
रुं विद्धि नरेंद्र ॥ योसावित्ति पुनर्भावयिता भावयिष्यति ॥ पित्राक्षितिमन्वुना ॥ ८ ॥ ततस्मात् दमित्रजित् ॥ १२ ॥ निशावंशस्य स्थितिस्तस्यात्र्यंत ॥

शिष्याः कौशल्यस्त्वाध्यात्मं याज्ञवल्क्यो ध्यगात्ततः ॥ योगं महोदयमृषिर्हृदयग्रंथिभेदकं ॥ ४ ॥ पुष्यो हिरण्यनाभस्य ध्रुवसं
धिस्ततो भवत् ॥ सुदर्शनोग्निवर्णश्च शीघ्रस्तस्य मरुः सुतः ॥ ५ ॥ सुतः ॥ ५ ॥ योसावास्ते योगसिद्धः कलापग्रामवासिभिः ॥
कलेरंते सूर्यवंशं ७ वंशं नष्टं भावयिता पुनः ॥ ६ ॥ तस्मात्प्रसुश्रुतस्तस्य संधिस्तस्याप्यमर्षणः ॥ महस्वांस्तत्सुतस्तस्मात्
विश्वसाह्वोन्वजायत ॥ ७ ॥ ततः प्रसेनजित्तस्मात्तक्षको भविता पुनः ॥ ततो बृहद्बलो यस्तु पित्रा ते समरे हतः ॥ एते हीक्ष्वा
कुभूपाला अतीताः शृण्वनागतान् ॥ ८ ॥ बृहद्बलस्य भविता पुत्रो नाम बृहद्रणः ॥ उरुक्रियस्ततस्तस्य वत्सवृद्धो भविष्यति
९ ॥ प्रतिव्योमस्ततो भानुर्दिवाको वाहिनीपतिः ॥ सहदेवस्ततो वीरो बृहदश्वोथ भानुमान् ॥ १० प्रतीकाश्वो भानुमतः सुप्र
तीकोथ तत्सुत ॥ भविता मरुदेवोथ सुनक्षत्रोथ तत्सुतः ॥ ११ ॥ तस्मात् तरिक्षः तत्पुत्रः सुतपास्तदमित्रजित् ॥ बृहद्राजस्तु त
स्यापि बर्हिस्तस्मात् कृतंजयः ॥ १२ ॥ रणंजयस्तस्य सुतः संजयस्तस्य सुतः संजयो भविता ततः ॥ तस्माच्छाक्योथ शुद्धोदो
लांगलिस्तत्सुतः स्मृत ॥ १३ ॥ ततः प्रसेनजित्तस्मात् क्षुद्रको भविता ततः ॥ रणको भविता तस्मात् सुरथस्तनयस्ततः ॥ १४ ॥
सुमित्रो नाम निष्ठांत एते वार्हद्बलान्वयाः ॥ इक्ष्वाकूणामयं वंशः सुमित्रांतो न विष्यति ॥ १५ ॥ यतस्तं प्राप्य राजानः संस्थां
प्राप्स्यंति वै कलौ ॥ इति श्रीभागवते महापुराणे नवमस्कंधे श्रीरामचरितवर्णनं नाम द्वादशोध्यायः ॥ १२ ॥

तदेवाह इक्ष्वाकूणामिति ॥ इति नवमे द्वादशः ॥ इक्ष्वाकोरेव पुत्रस्य निमेर्वंशस्त्रयोदशे ॥ वर्ण्यंते यत्र जज्ञिरे यत्र ब्रह्मज्ञा जनकादयः ॥ १ ॥ श्री

भा० न०
२७

निमेर्गौरसः पुत्रो नाभूदिति निर्शयन् कथामाह । निमिरित्येकादशभिः । सत्रमारभ्य वसिष्ठं ऋत्विजं अवृत वव्रे १ तं शक्रस्य मखं निर्वर्त्य प्र-
तिपालय प्रतीक्षस्वेति गृहपतिर्निमि ॥ २ ॥ इदं जीवितं चलं अस्थिरं विद्वान् । ३ ॥ इंद्रस्य मखं निर्वर्त्यागतो गुरुः शिष्यस्य व्यतिक्रमं अन्याय्यं म
प वीक्ष्य निमेर्देहः पततात्वित्यशपत् ॥ ४ ॥ उर्वश्यां दर्शनात् तस्य रेतस्ताभ्यां कुंभे निषिक्तं तस्मात् प्रपितामहो वसिष्ठोऽजनि इति तदाह । मित्राव-
रुणयोरिति । तथा च श्रुतिः कुंभे रेतः सिषिचतुः समानमिति ॥ ६ ॥ यदि प्रसन्नाः प्रभवः समर्थाश्च तर्हि जीवत्वित्यूचुः । ८ ॥ यस्येहेहस्य

श्री शुक उवाच ॥ निमिरिक्ष्वाकुतनयो वसिष्ठमवृतर्त्विजं ॥ आरभ्य सत्रं सोप्याह शक्रेण प्राग्वृतोस्मि भोः ॥ १ ॥ तं निर्वर्त्यागमि-
ष्यामि तावन्मां प्रतिपालय ॥ तूष्णीमासीत् गृहपतिः सोपींद्रस्याकरोन्मखं ॥ २ ॥ निमिश्चलमिदं विद्वान् सत्रमारभतात्मवान् ॥
ऋत्विग्भिरपरैस्तावान्नागमद्यावता गुरुः ॥ ३ ॥ शिष्यव्यतिक्रमं वीक्ष्य निर्वर्त्य गुरुरागतः ॥ अशपत् पतताद्देहो निमेः पंडितमा-
प निनः ॥ ४ ॥ निमिः प्रतिददौ शापं गुरवेऽधर्मवर्तिने ॥ तवापि पतताद्देहो लोभाद्धर्ममजानतः ॥ ५ ॥ इत्युत्ससर्ज देहं निमिरध्यात्मको- स्वं
विदः ॥ मित्रावरुणयोर्जज्ञे उर्वश्यां प्रपितामहः ॥ ६ ॥ गंधवस्तुषु तद्देहं निधाय मुनिसत्तमाः ॥ समाप्ते सत्रयागेथ देवानूचुः
समागतान् ॥ ७ ॥ राज्ञो जीवतु देहोयं प्रसन्नाः प्रभवो यदि ॥ तथेत्युक्ते निमिः प्राह मा भून्मे देहबंधनं ॥ ८ ॥ यस्य योगं न वांछंति
वियोगभयकातराः ॥ भजंति चरणांभोजं मुनयो हरिमेधसः ॥ ९ ॥ देहं नावरुरुत्सेहं दुःखशोकभयावहं ॥ सर्वत्रास्य यतो मृत्यु-
र्मत्स्यानामुदके यथा ॥ १० ॥ देवा ऊचुः ॥ विदेह उष्यतां कामं लोचनेषु शरीरिणां ॥ उन्मेषणनिमेषाभ्यां लक्षितोध्यात्मसंस्थितः ॥ ११ ॥

योगं न वांछंति अपि तु मोहायैव भजंति ९ निमिर्विदेह एव उष्यतां वसतु कामं यथेच्छं एवं सति युष्माभिः प्रार्थितं जीवितमस्य भविष्यति । न
च देहबंध इति भावः स च अध्यात्मसंस्थितो लोचनयोः स्थितः सन् उन्मेषाभ्यां तस्य वर्तकत्वेन लक्षितो वर्तेत इति शेषः ॥ ११ ॥ २७

तदेवं मृतादपि निमेर्देहाद्वंशप्रवृत्तिं द्रढयति ॥ अराजकभयमिति ॥ १२ ॥ तस्यान्वर्थानि त्रीणि नामान्याह ॥ जन्मनात्वसाधारणेन जनएवजनकः
यदास्वदेहद्वाराजनकत्वात स निमिजनकोऽभूत् इत्यर्थः ॥ मिथिला येन निर्मितेत्यनेन व्युत्पत्यंतरमप्युक्तं ॥ १३ ॥ सुधृतस्सुधृतिः तस्यापि

अराजकभयं नृणां मन्यमाना महर्षयः ॥ देहं ममंथुः स्म निमेः कुमारः समजायत ॥ १२ ॥ जन्मना जनकः सोऽभूद्वैदेहस्तु विदेहजः
मिथिलो मथनाज्जातो मिथिला येन निर्मिता ॥ १३ ॥ तस्मादुदावसुस्तस्य पुत्रोऽभून्नंदिवर्द्धनः ॥ ततः सुकेतुस्तस्यापि देव
रातो महीपते ॥ १४ ॥ तस्माद्बृहद्रथस्तस्य महावीर्यः सुधृत्पिता ॥ सुधृतेर्धृष्टकेतुर्वै हर्यश्वोऽथ मरुस्ततः ॥ १५ ॥ मरोः प्रती
पकस्तस्माज्जातः कृतिरथो यतः ॥ देवमीढस्तस्य सुतो विश्रुतोऽथ महाधृतिः ॥ १६ ॥ कृतिरातस्ततस्तस्मान्महारोमाऽथ तत्सुतः
स्वर्णरोमा सुतस्तस्य ह्रस्वरोमा व्यजायत ॥ १७ ॥ ततः शीरध्वजो जज्ञे यज्ञार्थं कर्षतो महीं ॥ सीता सीराग्रतो जाता तस्मात्सीरध्व
जः स्मृतः ॥ १८ ॥ कुशध्वजस्तस्य पुत्रस्ततो धर्मध्वजो नृप ॥ धर्मध्वजस्य द्वौ पुत्रौ कृतध्वजमितध्वजौ ॥ १९ ॥ कृतध्वजात्केशिध्व
जः खांडिक्यस्तु मितध्वजात् ॥ कृतध्वजसुतो राजन्नात्मविद्याविशारदः ॥ २० ॥ खांडिक्यः कर्मतत्वज्ञो भीतः केशिध्वजाद्द्रुतः ॥ भानु
मांस्तस्य पुत्रोऽभूच्छतद्युम्नस्तु तत्सुतः ॥ २१ ॥ शुचिस्तु तनयस्तस्मात्सनद्वाजस्ततोऽभवत् ॥ ऊर्ध्वकेतुः सनद्वाजादजोऽथ पुरु
जित्सुतः ॥ २२ ॥ अरिष्टनेमिस्तस्यापि श्रुतायुस्तत्सुपार्श्वकः ॥ ततश्चित्ररथो यस्य क्षेमाधिर्मिथिलाधिपः तस्मात्समरथस्तस्य
सुतः सत्यरथस्ततः आसीदुपगुरुस्तस्मादुपगुप्तोऽग्निसंभवः ॥ २४ ॥ वस्वनंतोऽथ तत्पुत्रो युयुधो यत्सुभाषणः श्रुतस्ततो ज
यस्तस्माद्विजयोऽस्मादृतः सुतः शुनकस्तत्सुतो जज्ञे वीतहव्यो धृतिस्ततः बहुलाश्वो धृतेस्तस्य कृतिरस्य महावशी ॥ २६ ॥ एते
वै मैथिला राजन्नात्मविद्याविशारदाः योगेश्वरप्रसादेन द्वंद्वैर्मुक्ता गृहेष्वपि ॥ २७ ॥ इति श्री० नवमस्कंधे त्रयोदशोऽध्यायः ॥ १३ ॥ ॥

ता २४ तस्य केशिध्वजस्य भानुमान् २ ततस्मात्सुपार्श्वकः २२ अग्निसंभवः अग्नेरंशात्संभूतः २४ युयुधस्मात्सुभाषणः २५ योगेश्वरा याज्ञवल्क्यादयः तेषां शुकमुनेन २७ ॥ इति नवमस्कंधे त्रयोदशः ॥ १३ ॥

ना०र० २८

चतुर्दशादिभिः सोमवंशमाह । समापितः । यस्मिन्नैलादयो भूपाः कीर्त्यंते पुण्यकीर्तयः १ चतुर्दशोगुरोः यत्न्योतारायां सोमताद्बुधात् जा
तश्चैलः यदुर्वेश्या मामुमुख्यानदीतनत । २ दृग्भ्यः आनंदाश्रुभ्यः अत एवामृतमयः किलेत्यावृश्रयंपाठांतरे दृशः नेत्रादुह्यमाणदस्य
कारणमाह । विप्रेति ३ सोमस्य पुत्रो बुध इतिकथाद्वारेणाह । पत्नीमिति सार्द्धैस्त्रिभिः ४ । ततत्कृतेतन्निमित्तं ५ । सुराणांदानवा

श्रीशुक उवाच ॥ अथातः श्रूयतां राजन्वंशः सोमस्य पावनः ॥ यस्मिन्नैलादयो भूपाः कीर्त्यंते पुण्यकीर्तयः । १ सहस्र
शिरसः पुंसो नाभिह्रद[illegible] सरोरुहात् ॥ जातस्यासीत्सुतो धातुरत्रिः पितृसमोगुणैः । २ । तस्य दृग्भ्योभवत्पुत्रः सो
मोमृतमयः किल ॥ विप्रौषध्युडुगणानां ब्रह्मणा कल्पितः पतिः ॥ ३ ॥ सोयजद्राजसूयेन विजित्य भुवनत्रयं ॥ पत्नीं
बृहस्पतेर्दर्पात् तारांनामाहरद्बलात् ४ । यदा स देवगुरुणा याचितोभीक्ष्णशो मदात् । नात्यजत्तत्कृते जज्ञे सुरदानव
विग्रहः ५ । शुक्रो बृहस्पतेर्द्वेषात् अग्रहीत्सासुरोडुपं ॥ हरोगुरुसुतं स्नेहात् सर्वभूतगणावृतः । ६ ॥ सर्वदेवगणोपेतो
महेंद्रो गुरुमन्वयात् ॥ सुरासुरविनाशोभूत्समरस्तारकामयः । ७ । निवेदितोथांगिरसा सोमं निर्भर्त्स्य विश्वकृत् तारां स्वभर्त्रे प्रा
यच्छदंतर्वत्नीमवैत्पतिः ॥ ८ ॥

नां च विग्रहे कारणमाह शुक्र इति । असुरैः सहितः उडुपमग्रहीदित्यर्थः । गुरोः सुतं बृहस्पतिमग्रहीत । अंगिरसः सकाशात् । प्राप्तवि
द्यो हर इति हि प्रसिद्धिः ६ निवेदितो विज्ञापित । विश्वकृत् ब्रह्मा अवैत् । [illegible] अबुधात् । ८ ॥ २८

बृहस्पतिराह । त्यजत्यजेति । परैराहितं गर्भं गर्भेत्यक्ते भस्मीकरिष्यतीति बिभ्यतीं प्रत्याह । नाहमिति । सांतानिकः संतानार्थी । सांतानिके इति पा
ठे हे ऽसत्पुत्रे रत्यर्थः । ८ । १० । ११ रहः एकांते १३ । १४ पुरूरवस उर्वश्यामायुः प्रमुखाः षट् पुत्रा जाता इति वक्तुं कथामाह । तस्येत्या-

त्यजात्यजाशु दुःप्रज्ञे मत्क्षेत्रादाहितं परैः । नाहं त्वां भस्मसात्कुर्यां स्त्रियं सांतानिकेऽसति ॥९॥ तत्याज व्रीडिता तारा
कुमारं कनकप्रभं । स्पृहामांगिरसश्चक्रे कुमारे सोम एव च । ममायं न तवेत्युच्चैस्तस्मिन्विवदमानयोः । पप्रच्छुरृषयो देवा नै
वोचे व्रीडिता तु सा ॥११॥ कुमारो मातरं प्राह कुपितोऽलीकलज्जया । किं न वोचस्यसद्वृत्ते आत्मावद्यं वदाशु मे ॥१२॥ ब्रह्मा तां रह
आहूय समप्राक्षीच्च सांत्वयन् । सोमस्येत्याह शनकैः सोमस्तं तावदग्रहीत् ॥१३॥ तस्यात्मयोनिरकृत बुध इत्यभिधां नृप
॥ बुद्ध्या गंभीरया येन पुत्रेणापोडुराण्मुदं ॥१४॥ ततः पुरूरवा जज्ञे इलायां य उदाहृतः ॥१४॥ तस्य रूपगुणौदार्यशी
लद्रविणविक्रमान् ॥१५॥ श्रुत्वोर्वशींद्रभवने गीयमानान्सुरर्षिणा तदंतिकमुपेयाय देवी स्मरशरार्दिता ॥१६॥ मित्रा
वरुणयोः शापादापन्ना नरलोकतां ॥१६॥ निशम्य पुरुषश्रेष्ठं कंदर्पमिव रूपिणं ॥१७॥ धृतिं विष्टभ्य ललना उपतस्थे तदं
तिके ॥१७॥ स तां विलोक्य नृपतिर्हर्षेणोत्फुल्ललोचनः । उवाच श्लक्ष्णया वाचा देवीं हृष्टतनूरुहः ॥१८॥ राजोवाच ॥ स्वागतं
ते वरारोहे आस्यतां करवाम किं ॥ संरमस्व मया साकं रतिर्नौ शाश्वतीः समाः ॥१९॥ उर्वश्युवाच ॥ कस्यास्त्वयि न सज्जेत मनो
दृष्टिश्च सुंदर यदंगांतरमासाद्य च्यवते ह रिरंसया ॥२०॥

दिनायावत्समाप्तिः ॥१५॥ ननु देवी कुतो मनुष्यस्यांतिकमुपगच्छेत् त
त्राह मित्रावरुणयोः शापान्नरलोकतां मनुष्यभावमापन्ना सती ॥१६॥१७॥१८॥ नौ आवयो रतिरस्त्विति ॥१९॥ यस्य तव अंगांतरं व
क्षः आसाद्य रिरंसया रंतुमिच्छया ह स्फुटं न च्यवते नापयाति यद्यस्मादिति वा ॥२०॥

न

मा०न० २५

मापावसानेभायाभं जगमिषेराजिगमिषोस्तस्याभावावंधमाह॥ एतावितिद्वाभ्यां॥ उरराकौमेषोर्नासनिश्चेयरूपोरस्यय: श्लाघ्य: सरा
वस्त्रीणांवरस्मृत: अतोविज्ञातोमलंनदोषइतिभाव:॥ २२॥ हेवीरघृतमेमन्नंस्यात॥ अमृतंवाआद्यमितिश्रुते:॥ देवानांचामृताशि
त्वात्मैथुनादन्यत्रविवाससत्वंनित्यमित्यइतिप्रतिपेदेअंगीकृतवान॥ २२॥ तदेवाह॥ अहोइति॥ २३॥ २४॥ पद्मकिंजल्कस्यगंधइवगं

एतावुररणकौराजननयासौस्तस्वमानद्संरंस्येभवतासाकंश्लाघ्य:स्त्रीणांवर:स्मृत:॥ २१॥ घृतंमेवीरभक्ष्यंस्याततनेक्षेत्वा
न्यत्रमैथुनात॥ विवाससंतत्तथेतिप्रतिपेदेमहामना:॥ २२॥ अहोरूपमहोभावोनरलोकविमोहनं॥ कोनसेवेतमनुजोदेवी
त्वांस्वयमागता॥ २३॥ तयासपुरुषश्रेष्ठोरमयंत्यायथार्हत:॥ रेमेसुरविहारेषुकामंचैत्ररथादिषु॥ २४॥ रममाणस्तया
देव्यापद्मकिंजल्कगंधया॥ तन्मुखामोदमुषितोमुमुदेहर्गणान्बहून॥ २५॥ अपश्यनुर्वशीमिंद्रोगंधर्वान्समचोदयत॥ उ
र्वशीरहितंमह्यमास्थानंनातिशोभते॥ २६॥ तउपेत्यमहारात्रेतमसिप्रत्युपस्थिते॥ उर्वश्याउरणौजह्रुन्यस्तौराजनि
जायया॥ २७॥ निशम्याक्रंदितंदेवीपुत्रयोर्नीयमानयो:॥ हतास्म्यहंकुनाथेननपुंसावीरमानिना॥ २८॥ यद्विस्त्रंभाद
हंनष्टाहृतापत्याचदस्युभि:॥ य:शेतेनिशिसंत्रस्तोयथानारीदिवापुमान॥ इतिवाक्सायकैर्विद्ध:प्रतोत्रैरिवकुंजर:
निशिनिस्त्रिंशमादायविवस्त्रोभ्यद्रवद्रुषा॥ ३०॥ तेविसृज्योरणौतत्रव्यद्योततस्मविद्युत:॥ आदायमेषावायांतंनग्नमैक्ष
तसापति॥ ३१॥

धोयस्या:तस्यामुखामोदेनमुषित:प्रलोभित:सन॥ २५॥ मह्यंममइंद्रमहारात्रेमध्यरात्रेमहानिशाद्वेघटिकेरात्रौमध्यम
यारितिस्मृते:॥ २७॥ जिगमिषोस्तस्या:परुषोक्तिमाह॥ हतास्मीतिसार्द्धेन॥ नपुंसानपुंसकेन॥ २८॥ यथानारीतथासंत्रस्त:शेते॥ २९॥ ३०॥
विद्युत:विशिष्टद्युतिमंत:अद्योतंतदादीप्तिमकुर्वत:ऽयद्वातदेवतडित:प्राकाशंतेत्यर्थ:॥ नग्नमैक्षत॥ अतोभावाभंगान्निर्जगामे

मार्कं० २५

३२ तस्याः सखी श्रयं चवीक्ष्य सक्तं शोभनं वचनं अयेजायेइत्यादि ॥ ३३ तदेवार्थं तआह ॥ अहोइतिद्वाभ्यां ॥ अनिर्वर्त्यमतहक्तांनिर्वर्तिमप्राप्य
पाठं तरेमांनिर्वर्तिमगमयित्वा ॥ मंत्रानतुक्तेतिवा ॥ वचांसिकृणवावहै गोरीक ख्यावहै ॥ ३४ ॥ सुदेहो अतिकमनीयो यममदेहः ॥ ३५ ॥ पुरू
रवोमामृथाइत्यादितस्याः ॥ सूक्तं तदप्यर्थं तआह ॥ मामृथाइतिचतुर्भिः ॥ माम्रियस्वपुरूरवोसि ॥ अतोधैर्यमावहेतिभावः ॥ हमेरकाः शसि

एलोपिशयनेजायामपश्यन्विमनाइव ॥ तच्चितोविकलःशोचन्बुभ्रामोन्मत्तवन्महीं ॥ ३२ ॥ सतांवीक्ष्यकुरुक्षेत्रे सरस्युत्पां
चतत्सखीः ॥ पंचप्रहृष्टवदनाः प्राहसूक्तं पुरूरवाः ॥ ३३ ॥ अहोजायेतिष्ठतिष्ठघोरेनत्यक्तुमर्हसि ॥ मांत्वमद्याप्यनिर्वर्त्य
वचांसिकृणवावहै ॥ ३४ ॥ सुदेहोयंपतत्यत्रदेविदूरंहृतस्त्वया ॥ खादंत्येनंवृकागृध्रास्त्वत्प्रसादस्यनास्पदं ॥ ३५ ॥ ऊ र्व
शु वा च ॥ मामृथाःपुरुषोसित्वंमास्मत्वाद्युर्वृकाइमे ॥ क्वापिसख्यंनवैस्त्रीणांवृकाणांहृदयंयथा ॥ ३६ ॥ स्त्रियोह्यकरु
णाःक्रूरादुर्मर्षाःप्रियसाहसाः ॥ घ्नंत्यल्पार्थेपिविश्रब्धंपतिंभ्रातरमप्युत ॥ ३७ ॥ विधायालीकविश्रंभमज्ञेषुत्यक्तसौहृ
दाः ॥ नवंनवमभीप्संत्यःपुंश्चल्यःस्वैरवृत्तयः ॥ ३८ ॥ संवत्सरांतेहिभवानेकरात्रंमयेश्वरः ॥ वत्स्यत्यपत्यानिचतेभविष्यंत्य
पराणिभोः ॥ ३९ ॥ अंतर्वत्नीमुपालक्ष्यदेवींसप्रययौपुरं ॥ पुनस्तत्रगतोब्दांतेउर्वशींवीरमातरं ॥ ४१ ॥ तस्यसस्नुवसन्ते उपल
भ्यमुदायुक्तःसमुवासतयानिशां ॥ ४० ॥ अथैनमुर्वशीप्राहकृपणंविरहातुरं ॥ गंधर्वानुपधावेमांतुभ्यंदास्यंतिमामिति ॥ ४२ ॥ त
स्यसंस्तुवतस्तुष्टाअग्निस्थालींददुर्नृप ॥ उर्वशींमन्यमानस्तांसोबुध्यतचरन्वने ॥ ४३ ॥

हाः इडियाणिवात्वाइतित्वांमास्मअद्यः वृकयेयुः इडियवत्रोमाभवेत्यर्थः ॥ ३६ ॥ प्रियेनिमितेसाहसंयासां ॥ ३७ ॥ ३८ ॥ तंसांत्वयति
संवत् ॥ सरांतइति ॥ अपराणीतिवचनादंतर्वत्नीमुपलक्ष्यज्ञात्वा ॥ ४० ॥ अनेनाग्निनाकर्मकृत्वातद्द्वाराउर्वशींप्राप्स्यतीत्यभिप्रायेणाग्नि
स्थालींददुः सतुतांस्थालीमेवोर्वशीमन्यमानः तयासहितोवनेविचरन्नेयमुर्वशीकिंत्वग्निस्थालीत्यबुध्यत ॥ ४२ ॥

भा० न०
३०

ततश्च तां स्थालीं वने स्थापयित्वा गृहान् गत्वा निशि नित्यं तामेवाध्यायतस्तस्य मनसि त्रेतायां त्रयीप्रवर्तत कर्मबोधकं वेदत्रयं प्रादुरभूत ॥ ४३ ॥
ततः स्थालीस्थानं गतः सन् शम्या गर्भे जातमश्वत्थं विलक्ष्य अस्मिन् सावग्निरस्तीति विशेषेण लक्षयित्वा तेनाश्वत्थेन द्वे अरणी कृत्वा
अग्निं मंथयेति शेषः शमीगर्भादग्निं मंथतीति श्रुतेः ॥ ४४ ॥ मंथनप्रकारमाह ॥ अधरारणिमुर्वशीं ध्यायन्नुत्तरारणिमात्मानं ध्यायन्
उभयोर्मध्ये यत्काष्ठं तत्प्रजननं पुत्रं ध्यायन ॥ तथा च मंत्रः ॥ उर्वश्यामुरसि पुरूरवा इति ॥ ४५ ॥ तस्य तेन कृतान्निर्मथनात् विभावसुः

स्थालीं न्यस्य वने गत्वा गृहानाध्यायतो निशि त्रेतायां संप्रवृत्तायां मनसि त्रय्यवर्त्तत ॥ ४३ ॥ स्थालीस्थानं गतोऽश्वत्थं शमीगर्भं
विलक्ष्य सः ॥ तेन द्वे अरणी कृत्वा उर्वशीलोककाम्यया ॥ ४४ ॥ उर्वशीं मंत्रतो ध्यायन्नधरारणिमुत्तरां ॥ आत्मानमुभयोर्म
ध्ये यत्तत्प्रजननं प्रभुः ॥ ४५ ॥ तस्य निर्मंथनाज्जातो जातवेदा विभावसुः त्रय्या स विद्यया राज्ञा पुत्रत्वे कल्पितस्त्रिवृत् ॥ ४
६ ॥ तेनाऽयजत यज्ञेशं भगवंतमधोक्षजं ॥ उर्वशीलोकमन्विच्छन् सर्वदेवमयं हरिं ॥ ४७ ॥ एक एव पुरा वेदः प्रणवः सर्व
वाङ्मयः ॥ देवो नारायणो नान्य एकोऽग्निर्वर्ण एव च ॥ ४८ ॥

रग्निर्जातः ॥ कथंभूतः ॥ जातवेदो धनं भोग्यं यस्मात् स च त्रय्या विद्यया विहितेनाधानसंस्कारेण त्रिवृत् ॥ आहवनीयादिरूपः
सन् राज्ञा पुरूरवसा पुत्रत्वे कल्पितः ॥ पुण्यलोकप्रापकत्वात् ॥ ४६ ॥ तदाह तेनेति ॥ ४७ ॥ नन्वनादिर्वेद बोधितो ब्राह्मणादीनां
मिज्याद्यनेकदेवयजनेन स्वर्गप्राप्तिहेतुः कर्ममार्गः कथं सादिरिव वर्ण्यते तत्राह ॥ एक एवेति द्वाभ्यां पुरा कृतयुगे सर्ववाङ्मयः सर्वासां
वाचां बीजभूतः प्रणव एक एव वेदः ॥ देवश्च नारायण एव ॥ अग्निश्चैक एव लौकिकः ॥ वर्णश्चैक एव हंसो नाम ॥ ४८ ॥ ३०

वेदत्रयीपुरूरवसः सकाशादासीत् एपिवात्प्राप अयंभावः कृतयुगेसत्वप्राधान्यात्प्रायशः सर्वेपिध्याननिष्ठाः रजः प्रधानेतुत्रेतायुगेवेदादिविभागेनकर्ममार्गः प्रकटोबभूवेति ॥ ४९ ॥ इतिनवमेचतुर्दशोध्यायः ॥ १४ ॥ ततः पंचदशेगाधिरैलपुत्रान्वयेऽजनि यद्दौहित्रसुतोरामः कार्त्तवीर्यमहन्नृपा ॥ १ ॥ सुतषट्कत्वायोरित्यादिक्रमेणाश्रुतायुप्रभृतीनांपुराणांवंशानाह ॥ श्रुतायोरित्यादिना एकः एकस्सूनुः अमितस्तत्संज्ञः ॥ २ ॥ ३ ॥ जह्नोः पुत्रः तस्यवलाकः तस्याजकः ॥ ४ ॥ गाधेः पुत्रोविश्वामित्रोब्रह्मर्षिरभूदित्युत्तराध्याये

पुरूरवसएवासीत्त्रयीत्रेतामुखेनृप ॥ अग्निनाप्रजयाराजालोकंगांधर्वमेयिवान् ॥ ४९ ॥ इतिश्रीभागवतेमहापुराणेनवमस्कंधेचतुर्दशोध्यायः ॥ १४ ॥ श्रीशुकउवाच ॥ ऐलस्यचोर्वशीगर्भात्षडासन्नात्मजान्नृप आयुः श्रुतायुः सत्यायुर्रयोथविजयोजयः ॥ १ ॥ श्रुतायोर्वसुमान्पुत्रः सत्यायोश्चश्रुतंजयः ॥ रयस्यसुतएकश्चजयस्यतनयोऽमितः ॥ २ ॥ भीमस्तुविजयस्याथकांचनोहोत्रकस्ततः ॥ तस्यजह्नुः सुतोगंगांगंडूषीकृत्ययोऽपिवत् ॥ ३ ॥ जह्नोस्तुपुरुस्तस्यपुत्रोवलाकश्चात्मजोऽजकः ॥ ततः कुशः कुशस्यापिकुशांवुर्मूर्त्तिजोवसुः ॥ कुशनाभश्चचत्वारोगाधिरासीत्कुशांबुजः ॥ ४ ॥ तस्यसत्यवतींकन्यामृचीकोऽयाचतद्विजः ॥ वरंविसदृशंमत्वागाधिर्भार्गवमब्रवीत् ॥ ५ ॥ एकतः श्यामकर्णानांहयानांचंद्रवर्चसां सहस्रंदीयतांशुल्कंकन्यायाः कुशिकावयं ॥ ६ ॥ इत्युक्तस्तन्मतंज्ञात्वागतः सवरुणांतिकं आनीयदत्वातानश्वानुपयेमेवराननां ॥ ७ ॥

वक्ष्यति गाधेरभून्महातेजाइत्यादिना तत्रतावदुपोद्घाततवेनभृगुवंशभवस्यऋचीकस्यचरितंप्रसक्तानुप्रसक्तेनचपरशुरामावतारस्यचरितमाह तस्यसत्यवतीमित्यादिना विसदृशमननुरूपं भार्गवमृचीकंद्विरेणवामयोरेकतः श्यामकर्णायेषांसर्वेस्मिन्नंगेचंद्रस्येववर्च

भा० टी० ९ स्कं० ६२

भा०न० ३१ उभयैर्मंत्रैः ॥ पत्न्यै ब्राह्मणैर्मंत्रैः श्वश्र्वै तु क्षात्रैरित्यर्थः ॥ ८ ॥ यावत्स्नात्वा मुनिर्नागतः तावज्जायायां भर्तृस्नेहाधिक्यात् सत्यवत्याश्चरुं
श्रेष्ठं मत्वा तया मात्रा सत्यवती याचिता सती ब्रह्ममंत्राभिमंत्रितं स्वचरुं मात्रे प्रायच्छत प्रादात ॥ मातुश्चरुं क्षात्रमंत्राभिमंत्रितं स्वयं
अदत्त ॥ ९ ॥ कष्टं जुगुप्सितं ॥ तदेवाह ते पुत्रो घोरो भविष्यति भ्राता तु ब्रह्मवित्तमो भविष्यतीति ॥ १० ॥ एवं माभूदिति प्रसादितो भार्गो

महर्षिः प्रार्थितः पत्न्या श्वश्र्वा चापत्यकाम्यया श्रपयित्वोभयैर्मंत्रैश्चरुं स्नातुं गतो मुनिः ॥ ८ ॥ तावत्सत्यवती मात्रा स्वचरुं
याचिता सती श्रेष्ठं मत्वा तयायच्छत् मात्रे मातुरदत्स्वयं ॥ ९ ॥ तद्विज्ञाय मुनिः प्राह पत्नीं कष्टमकारषीः ॥ घोरो दंडधरः पु
त्रो भ्राता ते ब्रह्मवित्तमः ॥ १० ॥ प्रसादितः सत्यवत्या मैवं भूदिति भार्गवः ॥ अथ तर्हि भवेत्पौत्रो जमदग्निस्ततोऽभवत् ॥ ११ ॥ सा
चाभूत्सुमहत्पुण्या कौशिकी लोकपावनी ॥ रेणोः सुतां रेणुकां वै जमदग्निरुवाह यां ॥ १२ ॥ तस्यां वै भार्गवऋषेः सुता व
सुमदादयः यवीयान् जज्ञ एतेषां राम इत्यभिविश्रुतः ॥ १३ ॥ यमाहुर्वासुदेवांशं हैहयानां कुलांतकं ॥ त्रिःसप्तकृत्वो य
इमां चक्रे निःक्षत्रियां महीं ॥ १४ ॥ दृप्तं क्षत्रं भुवो भारमब्रह्मण्यमनीनशत् ॥ रजस्तमोवृतमहन् फल्गुन्यपि कृतेंहसि ॥ १५
राजोवाच ॥ किं तदंहो भगवतो राजन्यैरजितात्मभिः ॥ कृतं येन कुलं नष्टं क्षत्रियाणामभीक्ष्णशः ॥ १६ ॥ श्रीबादरायणिरु
वाच ॥ हैहयानामधिपतिरर्जुनः क्षत्रियर्षभः ॥ दत्तं नारायणांशांशमाराध्य परिकर्मभिः ॥ १७ ॥ श्री ॥ श्री ॥

वश्चाह ॥ अथ तर्हि पौत्रो घोरो भविष्यति ॥ जमदग्निः पुत्रो न भवेदित्यर्थः ११ सा च सत्यवती कौशिकी नद्यभूत ॥ १२ ॥ भार्गवर्षेर्जमदग्नेः सु
ताः १३ ॥ १४ ॥ अनीनशत् नाशयामास ॥ तदेवाह रजस्तमोवृतमिति ॥ पाठांतरं सुगमं ॥ १५ ॥ १६ ॥ कार्तवीर्यार्जुनेन कृतमपराधं वक्तुं ३१
तस्य दर्पहेतुमैश्वर्यादिकमाह ॥ हैहयानामिति ॥ षड्भिः परिकर्मभिः परिचर्याभिः दत्तं दत्तात्रेयमाराध्य ॥ १७ ॥

अव्याहतमिंद्रियादि कंचलेभे ॥१८॥ यत्र यस्मिन्नैश्वर्ये अणिमादयो गुणाः ॥१९॥ रेवांभसि नर्मदाजले सरितं नर्मदां ॥२०॥ रावणो दिग्विजये
माहिष्मत्याः समीपे नर्मदायां देवपूजां कुर्वन् तेन प्रवाहस्यावरोधात् प्रतिस्रोतसः सत्याः तस्याः सरितो जले विप्लावित स्वशिबिर मालस्य तस्य
तद्वीर्यं नसेहे ॥२२॥ ततश्च कृतकिल्बिषः क्रीडंतमभिभवितुं प्रवृत्तयः सन् गृहीतः माहिष्मत्यां स्वपुर्यां कपिरिव संनिरुद्धश्च पुनश्चाव

वाहून् दशशतं लेभे दुर्द्धर्षत्वमरातिषु ॥ अव्याहतेंद्रियौजः श्रीतेजोवीर्ययशोबलं ॥१८॥ योगेश्वरत्वमैश्वर्यं गुणा यत्राणि
मादयः ॥ चचाराव्याहतगतिर्लोकेषु पवनो यथा ॥१९॥ स्त्रीरत्नैरावृतः क्रीडन् रेवांभसि मदोत्कटः ॥ वैजयंतीं स्रजं बिभ्रद्
रोधसरितं भुजैः ॥२०॥ विप्लावितं स्वशिबिरं प्रतिस्रोतःसरिज्जलैः नामृष्यत्तस्य तद्वीर्यं वीरमानी दशाननः ॥२१॥ गृहीतो ली^
लया स्त्रीणां समक्षं कृतकिल्बिषः ॥ माहिष्मत्यां संनिरुद्धो मुक्तो येन कपिर्यथा ॥२२॥ स एकदा तु मृगयां विचरन्विजने वने ॥ यदृ^ पि
छयाश्रमपदं जमदग्नेरुपाविशत् ॥२३॥ तस्मै स नरदेवाय मुनिरर्हणमाहरत् ॥ स सैन्यामात्यवाहाय हविष्मत्या तपोधनः
॥२४॥ स वीरस्तत्र तद्दृष्ट्वा आत्मैश्वर्यातिशायनं ॥ तन्नाद्रियताग्निहोत्र्यां साभिलाषः सहैहयः ॥२५॥ हविर्धानीमृषेर्दर्पान्नरान्ह
र्तुमचोदयत् ॥ ते च माहिष्मतीं निन्युः सवत्सां क्रंदतीं बलात् ॥२६॥ अथ राजनि निर्याते राम आश्रम आगतः ॥ श्रुत्वा तत्तस्य दौरा
त्म्यं चुक्रोधाहिरिवाहतः ॥२७॥

ज्ञया पेन [illegible] मुक्तः ॥२१॥ इदानीं तत्कृतमपराधं दर्शयं न्नाह ॥ स एकदेत्यादिना ॥२३॥ अर्हणमातिथ्यादि
हविष्मत्या कामधेन्वा ॥२४॥ ततश्चार्हणं नाद्रियत तस्मिन्नादृतवान् ॥ यतो ग्निहोत्र्यां होमधेनौ साभिलाषः ॥ सहैहयः हैहयैः सहवर्त्त
मानः ॥२५॥ दर्पाद्धेतोः ऋषेर्हविर्धानीं अग्निहोत्रधेनुं हर्तुं नरानचोदयत् ॥२६॥ ॥२७॥

मा०न०
३२

सतूणं कार्मुकं चर्म्मवाराय २८ रेणोपंच मेतत्स्माङ्रिनुमंवरं यस्य ।२९ ॥ प्रहरन्परस्य धोयस्य ॥ मनुष्यश्चनिलस्त्वतयोरिवोद्धोवीर्यंयस्यप
रेषांचक्रसैन्यस्तरयतीतितथा ॥ छिन्नाभुजाकुरवःकधराश्चयेषांहताःस्तुतावाहनानिचयेषांतेवीरानिपेतुः ॥ ३१ ॥ विरुकरणःचर्मोद

घोरमादायपरश्चुंसतूणंचिमेकार्मुकं ॥ अन्वधावतदुर्मर्षोमृगेंद्रइवयूथपं ॥ २८ ॥ तमापतंतंभृगुवर्योमोऽसाधनुर्द्धरं
वाणपरश्वधायुधं ॥ ऐणयवर्मोवरमक्रेधामभियुतंजलामिवृद्दृश्यपुरींविशन् ॥ २९ ॥ अचोदयद्धस्तिरथाश्वपतिभिर्गदा
सिवाणर्ष्टिशतघ्नीशक्तिभिः ॥ अक्षौहिणीःसप्तदशातिभीषणास्तारामएकोभगवानऽसूदयत ॥ ३० ॥ यतोयतो
सौप्रहरत्परश्वधोमनोनिलौजाःपरचक्रसूदनः ॥ ततस्ततःछिन्नभुजोरुकंधरानिपेतुरुर्व्यांहतसूतवाहनाः ॥ ३१ ॥
दृष्ट्वास्वसैन्यंरुधिरौघकर्द्दमेरणाजिरेरामकुठारसायकैः ॥ विवृक्णचर्म्मध्वजचापविग्रहंनिपातितंहैहयआपतद्रुषा ॥ ३२ ॥ अथार्जुनःपंचशतेषुबाहुभिःधनुःषुवाणानयुगपत्ससंदधे ॥ रामायरामोस्त्रभृतांसमग्रणीस्ता
न्येकधन्वेषुभिराछिनत्समं ॥ ३३ ॥ पुनःस्वहस्तैरचलान्मृधेघ्रिपानुत्क्षिप्यवेगादभिधावतोयुधिभुजानकुठारेणक
ठोरनेमिनाचिच्छेदरामःप्रसभंत्वहेरिव ॥ ३४ ॥ कृत्तबाहोःशिरस्तस्यगिरेःशृंगमिवाहरत ॥ हतेपितरितत्पुत्राअयु
तंदुद्रुवुर्भयात ॥ ३५ ॥ अग्निहोत्रीमुपावर्त्यसवत्सांपरवीरहा ॥ समुपेत्याश्रमंपित्रेपरिक्लिष्टांसमर्पयत ॥ ३६ ॥

योयस्य ॥ ३१ ॥ पंचशतेषुधनुःषुसोर्ज्जुनःरामायसंदधे ॥ एकमेवधनुर्येस्यसःपाठांतरे ॥ एककएववधःसंधातुयेषांतैरिषुभिःतानि ३२
धनूंषिसमंसहतत्क्षणमेवाछिनत ॥ ३३ ॥ मृधेसाधनभृतानचलानंघ्रिपाश्चोर्क्षिप्यामिधावतस्तस्यभुजान्विछेद ॥ अहेःफणानिव

३७ ॥ ३८ ॥ अहिंसतां पुरुपतं ॥ ३९ ॥ सौरीस्तत्त्वयेस्य प्रभवेच ॥ ४० ॥ तीर्थसंसेवयाचकारातयमनियमैश्च ॥ अच्युतेचेतनाचित्तंयस्यसः ॥ ४१ ॥
नवमेपंचदशः षोडशेयाजैतस्तुतेज्ञोमद्ग्नोहतेमुकुः ॥ रामात्क्षत्रवधः प्रोक्तोविश्वामित्रस्यचान्वयः ॥ १ ॥ १ ॥ २ ॥ किंचितइयतचित्ररथे
स्वकर्मेतत्कृतरामः पित्रेभ्रातृभ्यएवच ॥ वर्णयामासतच्छ्रुत्वाजमदग्निरभाषत ॥ ३७ ॥ रामरामहावाहोभगवानपापमकारिषीत् ॥
अवधन्नरदेवंयत्सर्वदेवमयंवृथा ॥ ३८ ॥ वयंहिब्राह्मणास्तातक्षमयार्हणतांगताः ॥ ययालोकगुरुर्देवःपारमेष्ठ्यमगात्पदं ॥ ३९ ॥
क्षमयारोचतेलक्ष्मीर्ब्राह्मीसौरीयथाप्रभा ॥ क्षमिणामाशुभगवांस्तुष्यतेहरिरीश्वरः ॥ ४० ॥ राज्ञोमूर्द्धाभिषि
क्तस्यवधोब्रह्मवधाद्गुरुः ॥ तीर्थसंसेवयावांऽहोजह्यंगाच्युतचेतन ॥ ४१ ॥ इतिश्रीभागवतेमहापुराणेनवमस्कंधेपर
शुरामचरितेहैहयार्जुनवधःपंचदशोध्यायः ॥ १५ ॥ श्रीशुकउवाच ॥ पित्रोपशिक्षितोरामस्तथेतिकुरुनंदन
॥ संवत्सरंतीर्थयात्रांचरित्वाश्रममाव्रजत् ॥ १ ॥ कदाचिद्रेणुकायातागंगायांपद्ममालिनं ॥ गंधर्वराजंक्रीडंतमप्सरोभि
रपश्यत ॥ २ ॥ विलोकयंतीक्रीडंतमुदकार्थंनदींगता ॥ होमवेलांनसस्मारकिंचिच्चित्ररथस्पृहा ॥ ३ ॥ कालात्ययंतंविलोक्य
मुनेः शापविशंकिता ॥ आगत्यकलशंतस्थौपुरोधायकृतांजलिः ॥ ४ ॥ व्यभिचारंमुनिर्ज्ञात्वापत्न्याःप्रकुपितोब्रवीत् ॥
घ्नतेनांपुत्रकाः पापामित्युक्तास्तेनचक्रिरे ॥ ५ ॥ रामःसंचोदितःपित्राभ्रातृन्मात्रासहावधीत् ॥ प्रभावज्ञोमुनेःसम्यक्समा
धेस्तपसश्चसः ॥ ६ ॥
गंधर्वराजेस्पृहायस्याःसाकिंचिन्नसस्मारेतिवा ॥ ३ ॥ कलशंपुरोधा यअग्रेनिधाय ॥ ४ ॥ व्यभिचारिमानसंज्ञात्वा ॥ ५ ॥ आ
ज्ञातिलंघिनांभ्रातॄणांमातश्चवधेसंचोदितः ॥ सनमुनेर्यः समाधिस्तपश्चतयोःप्रभावज्ञः यदिनहन्यांतर्हिमामपित्रासुसमर्थः ॥ यद्वित्

हन्यांतर्हिमयिसंतुष्टःसनतानपिजीवयितुंसमर्थइतिज्ञान
न्नित्यर्थः ॥ ६ ॥

भा० नं०
३३

७ नत्वत्तिनिंदितं कथं कृतवास्तत्राहयितुर्विद्यानिति ॥ सर्वोक्त एवाभिप्रायः ॥ ८ ॥ सर्वक्षत्रियवधे कारणं वक्तुमाहयेतुनस्पतुता इत्यादिना
॥ १० भगवत्यावेशिताधीर्येनत ॥ ११ ॥ १२ ॥ १४ ॥ दुःखदीनावेगेनविमोहितः ॥ १५ ॥ १६ ॥ ब्रह्मघ्नैर्विहतान्वीर्यैस्यातां हेराजन ॥ सरामस्तेषां
शीर्षाणि वरेणच्छेदयामासप्रीतः सत्यवतीसुतः ॥ ब्रह्महतानां रामोपि द्रावितं चास्मृतिवधे ॥ ७ ॥ उतस्युस्तेकुशालिनोनिशापायखां
डसांपितुर्विद्यांतयोवीर्येरामश्चक्रे सुहृद्वधं ॥ ८ ॥ येऽर्जुनस्यसुताराजन्स्मरंतःस्वपितुर्वधं ॥ रामवीर्यपराभूतालेभिरेशर्म
नक्वचित् ॥ ९ ॥ एकदाश्रममतोरामेसभ्रातरिवनंगते ॥ वैरंसिसाधयिषवोलब्धच्छिद्राउपागमन ॥ १० ॥ दृष्ट्वाग्न्यगारआ
सीनमावेशितधियंमुनिं ॥ भगवत्युत्तमश्लोकेजघ्नुस्तेपापनिश्चयाः ॥ ११ ॥ याच्यमानाः कृपणयारामभ्रात्रातिदारुणाः
प्रसह्यशिरउत्कृत्यनिन्युस्तेक्षत्रबंधवः ॥ १२ ॥ रेणुकादुःखशोकार्त्तानिघ्नंत्यात्मानमात्मना ॥ रामरामेतितातेतिवि
चुक्रोशोच्चकैःसती ॥ १३ ॥ तदुपश्रुत्यदूरस्थौहारामेत्यार्तवत्स्वनं ॥ त्वरयाश्रममासाद्यददृशुःपितरंहतं ॥ १४ ॥
ततदुःखरोषामर्षार्तिशोकवेगविमोहितः ॥ हातातसाधोधर्मिष्ठत्यक्त्वास्मान्स्वर्गतोभवान् ॥ १५ ॥ विलप्यैवंपितुर्देहंनि
धायभ्रातृषुस्वयं ॥ प्रगृह्यपरशुंरामःक्षत्रांतायमनोदधे ॥ १६ ॥ गत्वामाहिष्मतींरामोब्रह्मघ्नविहतश्रियं ॥ तेषांसशी
र्षभीराजन्मध्येचक्रेमहागिरिं ॥ १७ ॥ तद्रक्तेननदींघोरामब्रह्मण्यभयावहां ॥ हेतुंकृत्वापितृवधंक्षत्रेमंगलकारिणि ॥ १८ ॥
त्रिःसप्तकृत्वःपृथिवींकृत्वानिःक्षत्रियांप्रभुः ॥ स्यमंतपंचकेचक्रेशोणितोदान्ह्रदान्नव ॥ १९ ॥

शीर्षैर्निर्माहिष्मत्यांमध्येमहांतंगिरिंचक्रे ॥ १७ ॥ तेषांरक्तेन ॥ अब्रह्मण्यानांभयावहांघोरांनदींचक्रे ॥ तथापिसर्वक्षत्रियवधेकिंकारणं।
तदाहहेतुंकृतेसाईन ॥ अमंगलकारिणिअन्यायवर्त्तिनिसति ॥ १८ ॥ त्रिःसप्तकृत्वोरेणुकयादुःखावेशादुदरताडनंकृतंततोराम ३३

तावत्कृत्वः क्षत्रसमूलमहितत्वा नितिपवर्गिकाः ॥ १९ ॥

२० ॥ २२ ॥ संज्ञातं स्मृतिः । तद्देवूलक्षणांचिह्नंयस्य तं स्वदेहं लब्ध्वा सत्तर्षीणां मंडले सप्तमऋषिरभूत् ॥ २४ ॥ वृहत ब्रह्मवेदं वेदप्रवर्त्तकेषु
सप्तर्षिषु एकतमो भविष्यतीत्यर्थः ॥ २५ ॥ २६ ॥ नुवेलारमाहत ॥ भारते वाह नृपानिति ॥ २७ ॥ तद्देवं प्रसक्तानुप्रसक्तं समाप्य प्रस्तुतमाह गाधेरिति ॥ महा
तेजा विश्वामित्रः ॥ २८ ॥ ते सर्वे लिंगसमवायन्यायेन प्राणभृत उपदधातीतिवन्मधुच्छंदस एवोच्यंते ॥ तथा च श्रुतिः ॥ तस्य ह विश्वामित्रस्य

पितुः कायेन संधाय शिर आदाय वर्हिषि ॥ सर्वदेवमयं देवमात्मानमयजन्मखैः ॥ २० ॥ ददौ प्राचीं दिशं होत्रे ब्रह्मणे दक्षिणां दिशं
अध्वर्यवे प्रतीचीं वै उद्गात्रे उत्तरां दिशं ॥ २१ ॥ अन्येभ्योऽवांतरदिशः कश्यपाय च मध्यमां ॥ आर्यावर्त्तमुपद्रष्ट्रे सदस्येभ्यस्ततः
परं ॥ २२ ॥ ततश्चावभृथस्नानविधूताशेषकिल्बिषः ॥ सरस्वत्यां ब्रह्मनद्यां रेजे व्यभ्र इवांशुमान् ॥ २३ ॥ स्वदेहं जमदग्निस्तु ल
ब्ध्वा संज्ञानलक्षणं ॥ ऋषीणां मंडले सोऽभूत्सप्तमो रामपूजितः ॥ २४ ॥ जामदग्न्योऽपि भगवान्रामः ॥ कमललोचनः ॥ आगामि
न्यंतरे राजन्वर्त्तयिष्यति वै बृहत् ॥ २५ ॥ आस्तेऽद्यापि महेंद्राद्रौ न्यस्तदंडः प्रशांतधीः ॥ उपगीयमानचरितः सिद्धगंधर्वचारणैः
॥ २६ ॥ एवं भृगुषु विश्वात्मा भगवान्हरिरीश्वरः ॥ अवतीर्य परं भारं भुवोऽहन्बहुशो नृपान् ॥ २७ ॥ गाधेरभून्महातेजाः समि
द्ध इव पावकः ॥ तपसा क्षात्रमुत्सृज्य योऽलभेद्ब्रह्मवर्चसं ॥ २८ ॥ विश्वामित्रस्य चैवासन्पुत्रा एकशतं नृप ॥ मध्यमस्तु मधुच्छंदाः
मधुच्छंदस एव ते ॥ २९ ॥

एकशतं पुत्रा आसुः पंचाशत्कनीयांस इत्यादिः । तत्र विश्वामित्रपुत्रेषु भार्गवस्याजीगर्तस्य देवरातस्य शुनःशेपत्वमवगा
म्यते ॥ तथा आश्वलायनबौधायनादिभिः कौशिकानां देवरातप्रवरत्वमुक्तं प्रवरश्च तस्मिन्नेव वंशेऽवांतरभेदः ॥ ननु वंशांतरं ॥ तथा च स्मृ
तिः एक एव ऋषिर्यावत्प्रवरेष्वनुवर्त्तते ॥ तावत्समानगोत्रत्वं विना भृग्वंगिरोगणादिति ॥ २९ ॥

ज्व

मा० त०
३४

तत्कुतोभृगुवंशभवस्यदेवरातस्यकौशिकप्रवरत्वमित्याशंक्यतदुपपादयन्नाहपुत्रंकृत्वेत्यादियावत्समाप्ति।सर्वमजीगर्तसुतत्वेनमध्यम
त्वेनपितृभ्यांसमतांविहायविक्रीतत्वात्तस्यकृपयासुतानाहज्येष्ठ्येएव।प्रकल्प्यतामिति॥३०॥एतेदेवस्यस्थापयितुंतंविशिनष्टियइतिद्वा।
भ्यां॥सुमुचेश्चमुच्यते॥३१॥नागावोपिगाधिषुगाधेर्वंशजेषुदेवरातइतिख्यातः॥३१॥ततस्तस्यज्येष्ठत्वंकुशलाननमेनिरेमध्यमस्यातथा

पुत्रंकृत्वाशुनःशेपंदेवरातंचभार्गवं॥आजीगर्तःसुतानाहज्येष्ठएवप्रकल्प्यतां॥३०॥योवैहरिश्चंद्रमखेविक्रीतः
पुरुषःपशुःस्तुत्वादेवान्प्रजेशादीन्मुमुचेयाशवंधनात्॥३१॥योरातोदेवयज्ञेनेदेवैर्गाधिषुतापसः॥देवरातइ
तिख्यातःशुनःशेपस्तुभार्गवः॥३१॥येमधुच्छंदसोज्येष्ठाःकुशलंमेनिरेनतत्॥अशपतान्मुनिःक्रुद्धोम्लेच्छाभवत
दुर्जनाः॥३२॥सहोवाचमधुच्छंदाःसार्धंपंचाशतातततः॥यन्नोभवान्संजानीतेतस्मिंस्तिष्ठामहेवयं॥३४॥ज्येष्ठंमंत्रदृ
शंचक्रुस्त्वामन्वंचोवयंस्महि॥विश्वामित्रःसुतानाहवीरवंतोभविष्यथ॥येमानंमेनुगृह्णंतोवीरवंतमकर्तमां॥३५॥

वहत्वंदृष्ट्वानांगीकृतवंतः॥मुनिर्विश्वामित्रः।३३॥पंचाशताकनिष्ठैःसाकंसमध्यमोमधुच्छंदाउवाच॥नोस्माकंयत्ज्येष्ठत्वंकनिष्ठत्वं
वाभवान्पितासंजानीतेमन्यतेतस्मिन्वयंतिष्ठामेति।३४।एवमुक्त्वामंत्रदृशंकस्यनूनंकतमस्यामृतानामित्यादिमंत्राणांद्रष्टारंशुनःशे
पंज्येष्ठंचक्रुः।कथंचक्रुःतदाह।वयंसर्वेत्वामन्वंचःस्महि॥अनुगंतारःकनिष्ठाःस्मइत्यर्थः।ततःप्रसन्नोविश्वामित्रस्तान्सुतानाह।वी
रवंतःपुत्रवंतोभविष्यथयेयूयंमेमानंज्येष्ठत्वमनुगृह्णतः।अनुवर्तमानाःसंतःमांवीरवंतंपुत्रवंतंअकर्तअकृतवंतइत्यर्थः॥३५॥

३४

हेकुशिका एषदेवरातः वोयष्मदीयः कौशिकएव यतः वीरः मत्पुत्रः तमेतं अन्वितम् अनुगाछत । अन्येवाष्टकादयस्तस्यसुता आसन ॥ ३६ ॥
उपसंहरति एवमिति ॥ एके शप्ताः एके अनुगृहीताः अन्यस्तु पुत्रत्वेन स्वीकृत इत्येवं कौशिकगोत्रं पृथग्विधं नानाप्रकारं जातं तत्र प्रवरांत
रमापन्नं प्राप्तं हि यस्मात् एष देवरातः ज्यैष्ठत्वेन तत्र कल्पितं ॥ ३७ ॥ इति नवमे षोडशः ॥ आयोः सप्तदशे त्वैलस्य पुत्रस्य पंचमसु । सुतेषु
क्षत्रवृद्धादिचतुर्णां वंशवर्णनं ॥ १ ॥ इह श्रीकृष्णावतारप्रस्तावाय वंशानुक्रमणं अमलादिक्रमेणोपक्रांतमिति ॥ यस्य वंशे कृष्णाचता

एषवः कुशिका वीरो देवरातस्तमन्वित ॥ अन्ये चाष्टकहारीतजयक्रतुमदादयः ॥ ३६ ॥ एवं कौशिकगोत्रं तु वैश्वामित्रैः
पृथग्विधं ॥ प्रवरान्तरमापन्नं तद्धि चैवं विकल्पितं ॥ ३७ ॥ इति श्रीभागवते महापुराणे नवमस्कंधे परशुरामचरिते षो
डशोऽध्यायः ॥ १६ ॥ श्रीबादरायणिरुवाच ॥ यः पुरूरवसः पुत्र आयुस्तस्याभवन्सुताः ॥ नहुषः क्षत्रवृद्धश्च रजी रंभश्च वी
र्यवान् ॥ १ ॥ अनेना इति राजेंद्र शृणु क्षत्रवृधोन्वयं ॥ १ ॥ क्षत्रवृद्धसुतस्यासन्सुहोत्रस्यात्मजास्त्रयः ॥ २ ॥ काश्यः कुशो गृत्समद
इति गृत्समदादभूत ॥ शुनकः शौनको यस्य बह्वृचः प्रवरो मुनिः ॥ ३ ॥ काश्यस्य काशिस्तत्पुत्रो राष्ट्रो दीर्घतमः पिता ॥ धन्वंत
रिर्दीर्घतमस आयुर्वेदप्रवर्तकः ॥ यज्ञभुग्वासुदेवांशः स्मृतमात्रार्तिनाशनः ॥ ४ ॥ तत्पुत्रः केतुमानस्य जज्ञे भीमरथस्ततः ॥ दिवो
दासो द्युमांस्तस्मात्प्रतर्दन इति स्मृतः ॥ ५ ॥ स एव शत्रुजिद्वत्स ऋतध्वज इतीरितः ॥ तथा कुवलयाश्वेति प्रोक्तो लर्कादयस्ततः ॥ ६ ॥

रस्तस्य वंशोऽतिविततत्वादंते निरूप्यते ॥ अतः पुरूरवसः पुत्राणां पंचानां कनिष्ठानां वंशानुक्त्वेदानीं प्रथमस्य वंशमाह य इति । एवं नहुषययाति
यदुप्रभृतिष्वपि द्रष्टव्यं ॥ १ ॥ क्षत्रवृधः क्षत्रवृद्धस्य ॥ १ ॥ २ ॥ ३ ॥ दीर्घतमसः पितास्य तमात्रः सर्वार्त्तिरोगदुःखं नाशयतीति तथा ॥ ४ ॥ ५ ॥ ततः प्रतर्दनादि
शत्रुवाचात घ्नमतः सकाशादलर्कादयः ॥ ६ ॥

भा०न० ७ संततिसंज्ञः ८ सत्यकेतोः धृष्टकेतुः तस्मात्सुकुमारस्तस्माद्वीतिहोत्रः तस्य भर्गः अतो भर्गात् भार्गभूमिः ९ काशयः काशेर्वंश्याः का
३५ शेः प्रपितामहस्य क्षत्रवृद्धस्यान्वयं अवतेयांतीति तथा १० ततः अनेनसः सुद्धोजज्ञे कृतकृत्यः सः यतः आत्मवान् ज्ञानी अतः पुत्रो॰

षष्टिंवर्षसहस्राणिषष्टिंवर्षशतानिच ॥ नालर्कादपरोराजन्बुभुजेमेदिनींयुवा ७ ॥ अलर्कात्संततिस्तस्मात्सुनीथोऽथसु
केतनः ॥ धर्मकेतुःसुतस्तस्मात्सत्यकेतुरजायत ॥ ८ ॥ धृष्टकेतुपितातस्मात्सुकुमारःक्षितीश्वरः ॥ वीतिहोत्रस्यभर्गोतोभा
र्गभूमिरभून्नृप ॥ ९ ॥ इतीमेकाशयोभूपाःक्षत्रवृद्धान्वयायिनः ॥ रभस्यरभसःपुत्रोगंभीरश्चाऽक्रियस्ततः ॥ १० ॥ तस्यक्षे
त्रेब्रह्मजज्ञेशृणुवंशमनेनसः ॥ शुद्धस्ततःशुचिस्तस्माच्चित्रकृद्धर्मसारथिः ॥ ततःशांतरयोजज्ञेकृतकृत्यःसआत्मवा
न् ॥ ११ ॥ रजेःपंचशतान्यासन्पुत्राणाममितौजसां ॥ देवैरभ्यर्थितोदैत्यान्हत्वेंद्रायाददाद्दिवं ॥ १२ ॥ इंद्रस्तस्मैपुनर्दत्वा
गृहीत्वाचरणौरजेः ॥ आत्मानमर्पयामासप्रह्लादाद्यरिशंकितः ॥ १३ ॥ पितर्युपरतेपुत्रायाचमानायनोददुः ॥ त्रि
विष्टपंमहेंद्राययज्ञभागान्समाददुः ॥ १४ ॥ गुरुणाहूयमानेग्नौबलभित्तनयान्रजेः ॥ अवधीद्भ्रंशितान्मार्गान्नकश्चि
दवशेषितः ॥ १५ ॥ कुशात्प्रतिःक्षात्रवृद्धात्संजयस्तत्सुतोजयः ॥ ततःकृतःकृतस्यापिजज्ञेहर्यबलोनृपः ॥ १६ ॥
त सहदेवस्ततोहीनोजयसेनस्तुतत्सुतः ॥ संकृतिस्तस्यचजयःक्षत्रधर्मामहारथः ॥ क्षत्रवृद्धान्वयाभूपाइमेशृण्वथनाहु
षान् ॥ १७ ॥ इतिश्रीभागवते०नव०सप्तदशोध्यायः ॥ १७ ॥

त्वादनंनकृतवानित्यर्थः ११ १४ तेषां मतिभ्रंशायगुरुणाबृ
हस्पतिनाभिचारविधानेनाग्नौहूयमानेसति १५ सिंहावलोकनेनाह क्षात्रवृद्धात्क्षत्रवृद्धपौत्रात्कुशात्प्रतिः प्रतेःसंजयः १६ ३५
इतिनवमेसप्तदशोध्यायः १७

अथाष्टादशेऽध्याये तेस्त्वनाहुषस्य कथोच्यते ॥ यस्य पंच सुतेष्वेषु कनीयान् गृहीतवरं ॥ १ ॥ तस्य राज्यस्य परिणामं संक्षेपतो वहत्वं वेतीतितथा तत्र हे-
तुः यत्रेति ॥ २ ॥ स्थानात् स्वर्गात् द्विजैरगस्त्यादिभिः ॥ ३ ॥ यवीयसो भ्रातॄनादिशत् ॥ काव्यस्य शुक्रस्य वृषपर्वणश्च कन्याभ्यां कृतदारः सन्-
॥ ४ ॥ ५ ॥ न प्रतिलोमता द्वीयः ॥ ईश्वरघटनादिति दर्शयन् कथामाह एकदेत्यादिना ॥ प्रतिज्ञामाह तद्वच इत्यतेन ॥ गुरोः शुक्रस्य पुत्र्या देवया-

श्री शु क उ वा च ॥ यतिर्ययातिः संयातिरायतिर्वियतिः कृतिः ॥ षडिमे नहुषस्यासन्निंद्रियाणीव देहिनः ॥ १ ॥ राज्यं नैच्छद्यतिः
पित्रा दत्तं तत्परिणामवित् ॥ यत्र प्रविष्टः पुरुष आत्मानं नावबुध्यते ॥ २ ॥ पितरि भ्रंशिते स्थानादिंद्राण्या धर्षणाद्द्विजैः ॥ प्रापिते
ऽजगरत्वं वै ययातिरभवन्नृपः ॥ ३ ॥ चतसृष्वादिशद्दिक्षु भ्रातॄन्भ्राता यवीयसः ॥ कृतदारो जुगोपोर्वीं काव्यस्य वृषपर्वणः ॥ ४ ॥
श्री रा जो वा च ॥ ब्रह्मर्षिर्भगवान्काव्यः क्षत्रबंधुश्च नाहुषः ॥ राजन्यविप्रयोः कस्माद्विवाहः प्रतिलोमकः ॥ ५ ॥ श्री शु क उ वा
च ॥ एकदा दानवेंद्रस्य शर्मिष्ठा नाम कन्यका ॥ सखीसहस्रसंयुक्ता गुरुपुत्र्या च भामिनी ॥ ६ ॥ देवयान्या पुरोद्याने पुष्पित-
द्रुमसंकुले ॥ व्यचरत्कलगीतालिनलिनीपुलिनेऽबला ॥ ७ ॥ ता जलाशयमासाद्य कन्याः कमललोचनाः ॥ तीरे न्यस्य दुकू-
लानि विजह्रुः सिंचतीर्मिथः ॥ ८ ॥ वीक्ष्य व्रजंतं गिरिशं सह देव्या वृषस्थितं ॥ सहसोत्तीर्य वासांसि पर्यधुर्व्रीडिताः स्त्रियः ॥
॥ ९ ॥ शर्मिष्ठाऽजानती वासो गुरुपुत्र्याः समव्ययत् ॥ स्वीयं मत्वा प्रकुपिता देवयानीदमब्रवीत् ॥ १० ॥ अहो निरीक्ष्यता-
मस्या दास्याः कर्म ह्यसांप्रतं ॥ अस्मद्धार्यं धृतवती शुनीव हविरध्वरे ॥ ११ ॥

न्या च व्यचरदिति द्वयोरन्वयः ॥ ६ ॥ कलगीता अलयो येषु तानि नलिनानि यस्मिन् तस्मिन् पुरोद्याने ॥ अबलाः स्त्रियः ॥ ७ ॥ सिंचंताः सिं-
चंताः ॥ ८ ॥ ९ ॥ अजानती च ॥ यं मत्वा गुरुपुत्र्या वासः समव्ययत् परिदधात् ॥ १० ॥ असांप्रतमन्याय्यं ॥ ११ ॥

भा॰ न॰
३६

अन्वयमेवब्राह्मणोत्कर्षवर्णनेन। व्यनक्तियैरितित्रिभिः येब्राह्मणाःपरस्यपुंसोमुखंमुखादुत्पन्नत्वेनतद्रूपाहरत्वेनचश्रेष्ठाइत्यर्थः
ज्योतिर्ब्रह्मपंथावेदमार्गः १२ १३ तदेवंब्राह्मणमात्रमेवतावत्स्तुत्यंतत्रापिवयंभृगवोऽस्यास्त्वपितानःशिष्यः एवंसत्यपिअस्माभिर्धा
र्यंवासःइयमसतीधृतवती १४ १५ १६ निषिद्धोयंप्रातिलोमसंबंधइतिचेतत्राहएषइति। २१ ब्राह्मणमेवत्वंवृणीहिकिमनेनायहे

यैरिदंतपसासृष्टंमुखंपुंसःपरस्यये॥धार्यतेयैरिहज्योतिःशिवःपंथाःप्रदर्शितः॥१२॥यान्वंदंत्युपतिष्ठंतेलोकनाथाःसु
रेश्वराः॥ भगवानपिविश्वात्मापावनःश्रीनिकेतनः॥१३॥वयंतत्रापिभृगवःशिष्योस्यानःपिताऽसुरः॥अस्मद्धार्यंधृतव
तीशूद्रोवेदमिवासती॥१४॥एवंक्षिपंतींशर्मिष्ठागुरुपुत्रीमभाषत॥रुषाश्वसंत्युरंगीवधर्षितादष्टदच्छदा॥१५॥आ
त्मवृत्तमविज्ञायकत्थसेबहुभिक्षुकि॥किंनप्रतीक्षसेस्माकंगृहान्बलिभुजोयथा॥१६॥एवंविधैःसुपरुषैःक्षिप्त्वाचार्य
सुतांसतीं॥शर्मिष्ठाप्राक्षिपत्कूपेवासश्चादायमन्युना॥१७॥तस्यांगतायांस्वगृहंययातिर्मृगयांचरन्॥प्राप्तोयदृ
च्छयाकूपेजलार्थीतांददर्शह॥१८॥दत्वास्वमुत्तरंवासस्तस्यैराजाविवाससे॥गृहीत्वापाणिनापाणिमुज्जहारदयापरः
॥१९॥तंवीरमाहौशनसीप्रेमनिर्भरयागिरा॥राजंस्त्वयागृहीतोमेपाणिःपरपुरंजय॥२०॥हस्तग्राहोपरोमाभूद्गृही
तायास्त्वयाहिमे॥एषईशकृतोवीरसंबंधोनोनपौरुषः॥२१॥यदिदंकूपलग्नायाभवतोदर्शनंमम॥नब्राह्मणोमे
भविताहस्तग्राहोमहाभुजकचस्यबार्हस्पत्यस्यशापाद्यमशपंपुरा॥२२॥ ॥

रोतिचेतत्राहनब्राह्मणइति। बृहस्पतेःपुत्रःकचःशुक्रान्मृतसंजीविनींविद्यामध्यगात्तदाचदेवयानीतंपतिंचकमेसचगुरुपुत्री
ममपूज्येतिनतामुद्वहत्ततःक्रुद्धाकुपितासतीत्वयेयंविद्यानिःफलाभवत्वितितंशशापसचत्वद्ब्राह्मणःपतिर्नभवेदितितांशशापतदे

[illegible]॥२२॥

३६

अशास्त्रीयत्वात् अनभिप्रेतमपि दैवेनोपनतं प्रापितं वुध्वा । तदुक्तं तस्यां सकामं स्वं मनश्च वुद्ध्वा न ह्यधर्मे मदीयं मनः प्रविशेदिति । तस्या वचः प्रतिज
ग्राह अंगीकृतवान् । २३ । शर्मिष्ठासंवंधोपि दैववशादेवाभवदिति दर्शयन्नाह गते राजनीति नवभिः । उक्तं मिह्यु कीत्यादि कृतं कूपपतनरूपादि
। २४ । कापोतीमुञ्छवृत्तिं । २५ । प्रत्यनीका दैवास्ते विवक्षिताः । इयं प्रापणीया इत्यनभिप्रेतं यस्य तथाभूतं ज्ञात्वा प्रत्यनीकानां विवक्षितमिति

तु ययातिरनभिप्रेतं दैवोपहृतमात्मनः । मनस्तु तद्गतं वुध्वा प्रतिजग्राह तद्वचः । २३ ॥ गते राजनि सा वीरे तत्र स्म क्षत्री पितुः न्य
वेदयत्ततः सर्वं मुक्तं शर्मिष्ठया कृतं । २४ ॥ दुर्मना भगवान्काव्यः पौरोहित्यं विगर्हयन् ॥ स्तुवन्वृत्तिं च कापोतीं दुहित्रा स य
यौ पुरात् ॥ २५ ॥ वृषपर्वा तमाज्ञाय प्रत्यनीकविवक्षितं ॥ गुरुं प्रसादयन्मूर्ध्ना पादयोः पतितः पथि । २६ ॥ क्षणार्द्धम
न्युर्भगवान्शिष्यं व्याचष्ट भार्गवः ॥ कामोस्याः क्रियतां राजन्नैनां त्यक्तुमिहोत्सहे ॥ २७ ॥ तथेत्यवस्थिते प्राह देवयानी म
नोगतं ॥ पित्रा दत्ता यतो यास्ये सानुगा यामि मामनु ॥ २८ ॥ स्वानां तत्संकटं वीक्ष्य तदर्थस्य गौरवं । देवयानीं पर्यचरत्स्त्रीस च
हस्रेण दासवत् ॥ २९ ॥ नाहुषाय सुतां दत्वा सह शर्मिष्ठयोशना । तमाह राजञ्छर्मिष्ठामाधास्तल्पे न कर्हिचित् ॥ ३० ॥
विलोक्यौशनसीं राजञ्छर्मिष्ठा सुप्रजां क्वचित् । तमेव वव्रे रहसि सख्याः पतिमृतौ सती ॥ ३१ । राजपुत्र्यार्थितोऽपत्ये धर्मं
चावेक्ष्य धर्मवित् ॥ स्मरन्शुक्रवचः काले दिष्टमेवाभ्यपद्यत ॥ ३२ ॥

वा । २६ । २७ । सानुगा सखीसहिता शर्मिष्ठा मामनुयात्विति ॥ २८ तत्र स्वस्मिन्निर्गते तातः शुक्रात्संकटं वीक्ष्य तत्तस्मादवस्थितात् दर्थस्य प्रयो
जनस्य गौरवं च वीक्ष्य । २९ । तल्पे नाधाः नोपगच्छ इत्यर्थः । ३० ॥ ३१ । अपत्यार्थे कालेऽप्रार्थनात्तस्याः । कामपूरणं धर्ममवेक्ष्य शुक्रस्य व
वचः स्मरेन दिष्टं दैवप्रापितमेव तत्संगममभ्यपद्यत न च कामत इत्यर्थः ॥ ३२ ॥

ना०त० ३७

३३ आसुर्याः शर्मिष्ठायाः भर्त्तुः सकाशात् उपमंत्रयन्प्रसादयन् ३५ विकृतं रूपं करोतीति तथा ३६ ते दुहितरि कामैरघायात्त्वं सोस्मि
कामानां भोगैरितिवा शुक्र आह तर्हि योभिधास्यति अभितो धारयिष्यतीति स्ववयसा कामं व्यत्ययं यायात् व्यत्ययं नीयतामितिवा यद्वा व्य
त्यस्येति छेदः तां जरां व्यत्या संगमयेत्यर्थः ३७ इति लब्धव्यवस्थानं जराव्यवस्थितिर्येन सः ३८ ४० यतो न धर्मज्ञाः अनित्ये च

यदुं च तुर्वसुं चैव देवयानी व्यजायत ॥ ३ द्रुह्युं चानुं च पूरुं च शर्मिष्ठा वार्षपर्वणी ॥ ३३ ॥ गर्भसंभवमासुर्या भर्त्तुर्विज्ञाय मानिनी
॥ देवयानी पितुर्गेहं ययौ क्रोधविमूर्छिता ॥ ३४ ॥ प्रियामनुगतः कामी वचोभिरुपमंत्रयन् ॥ न प्रसादयितुं शेके पादसंवा
हनादिभिः ॥ ३५ ॥ शुक्रस्तमाह कुपितः स्त्रीकामानृतपूरुष ॥ त्वां जरा विशतां मंद विरूपकरणी नृणां ॥ ३६ ॥ ययाति
रुवाच ॥ अतृप्तोस्म्यद्य कामानां ब्रह्मन्दुहितरि स्म ते ॥ व्यत्यस्यतां यथाकामं वयसा योभिधास्यति ॥ ३७ ॥ इति ल
ब्धव्यवस्थानः ॥ पुत्रं ज्येष्ठमयाचत ॥ यदो तात प्रतीच्छेमां जरां देहि निजं वयः ॥ ३८ ॥ मातामहकृतां वत्स न तृप्तो वि
षयेष्वहं ॥ वयसा भवदीयेन रंस्ये कतिपयाः समाः ॥ ३९ ॥ यदुरुवाच ॥ नोत्सहे जरया स्थातुमंतरा प्राप्तया तव ॥ अवि
दित्वा सुखं ग्राम्यं वैतृष्ण्यं नैति पूरुषः ॥ ४० ॥ तुर्वसुश्चोदितः पित्रा द्रुह्युश्चानुश्च भारत ॥ प्रत्याचख्युरधर्मज्ञा ह्यनित्ये
नित्यबुद्धयः ॥ ४१ ॥ अपृच्छत्तनयं पूरुं वयसोनं गुणाधिकं ॥ न त्वमग्रजवद्वत्स मां प्रत्याख्यातुमर्हसि ॥ ४२ ॥ पूरुरु
वाच ॥ को नु लोके मनुष्येंद्र पितुरात्मकृतः पुमान् ॥ प्रतिकर्त्तुं क्षमो यस्य प्रसादाद्विंदते परं ॥ ४३ ॥ उत्तमश्चिंतिति
तं कु कुर्यात्प्रोक्तकारी च मध्यमः ॥ अधमोश्रद्धया कुर्यादकर्त्तोच्चरितं पितुः ॥ ४४ ॥

यौवने नित्यबुद्धयः ४१ त्वं जरां किं गृहाण्यमिदृत्यपृच्छेत प्रत्याख्यातुं मा कथा इत्याह त्वमिति ४२ आत्मकृतः स्वदेहकर्त्तुः प्रत्युप
कारं कर्त्तुं को नु क्षमः तथापि पितुर्यच्चिंतितं कुर्यात्स उत्तमः यस्तु प्रोक्तकारी स मध्यमः यस्त्वश्रद्धया कुर्यात्सोधमः अकर्त्तापि

ह्यनित्येनित्यबुद्धयः ॥ ४१

राम

ज्ञाज्ञाबुसेवितवान् ॥ ६५ ॥ यथोपजोषं यथा प्रीतिज्जुज्जुषे ॥ ६६ ॥ ६७ ॥ नानेव भाति यावदिंद्रीयप्रवृत्तिः तदुपरमे नाभाति स्वप्नमायाभ्यां स
हितो मनोरथ इवेत्यर्थः ॥ ६९ ॥ ५० ॥ मनः सुखं कामभोगकदिंद्रियैः कुत्सितैः पराङ्मुखैरिंद्रियैः ॥ ५१ ॥ इति नवमे ऽष्टादशः ॥ ऊनविंशे ययातिः
स्वचेष्टितं तत्वनीयमं देवयानी समाश्राव्य विरक्तो मुक्तिमाप्तवान् ॥ १ ॥ मुक्तभोगामंगां हास्यन्नुत्ते वेद्धृत्तमात्मनः ॥ विदं वयन् प्रियमाह निर्वे

इति प्रमुदितः पूरुः प्रत्यगृह्णाज्जरां पितुः सोपि तद्वयसा कामान्यथावज्जुजुषे नृप ॥ ६५ ॥ सप्तद्वीपपतिः सम्यक्पितृ
वत्पालयन्प्रजाः ॥ यथोपजोषं विषयान्जुजुषेऽव्याहतेंद्रियः ॥ ६६ ॥ देवयान्यप्यनुदिनं मनोवाग्देहवस्तुभिः ॥ प्रेयसः
परमां प्रीतिमुवाह प्रेयसी रहः ॥ ६७ ॥ अयजद्यज्ञपुरुषं क्रतुभिर्भूरिदक्षिणैः ॥ सर्ववेदमयं देवं सर्वदेवमयं हरिं ॥ ६८ ॥
यस्मिन्निदं विरचितं व्योम्नीव जलदावलिः ॥ नानेव भाति नाभाति स्वप्नमायामनोरथः ॥ ६९ ॥ तमेव हृदि विन्यस्य वासुदेवं
गुहाशयं ॥ नारायणमणीयांसं निराशीरयजत्प्रभुं ॥ ५० ॥ एवं वर्षसहस्राणि मनः षष्ठैर्मनःसुखं ॥ विदधानोपि नातृ
प्यत्सार्वभौमः कदिंद्रियैः ॥ ५१ ॥ इति श्रीभागवते महापुराणे नवमस्कंधे ययातिनामाष्टादशोध्यायः ॥ १८ ॥ श्री
शुक उवाच ॥ स इत्थमाचरन्कामान्स्त्रैणोपह्नवमात्मनः ॥ बुद्ध्वा प्रियायै निर्विण्णो गाथामेतामगायत ॥ १ ॥ शृणु
भार्गव्यमूं गाथां मद्विधाचरितां भुवि ॥ धीरा यस्यानुशोचंति वने ग्रामनिवासिनः ॥ २ ॥ बस्त एको वने कश्चिद्विचिन्वन्प्रि
यमात्मनः ॥ ददर्श कूपे पतितां स्वकर्मवशगामजां ॥ ३ ॥

दर्शयितुमात्मवान् ॥ २ ॥ कामानाचरन्नुपभुंजानः गाथामितिहासं ॥ १ ॥ मद्विधेन मत्सदृशेनाचरितामनुष्ठितां मद्विधस्याचरितं यस्यामिति वा
यस्य ग्रामनिवासिनः कामिनो मद्विधस्याचरितं वने स्थिता धीराः शोचंति तस्य गाथां शृणु ॥ २ ॥ आत्मानमालक्ष्याह बस्त इति वनेसंसा

[illegible] ॥ १९ ॥

ए

वि

ना०न०
३८

रोधसितटे विषाणाग्रेण मृदादिकमुद्धृत्य तीर्थं निर्गमोपायमार्गं व्यधत्त ॥४॥ बह्व्य इति शृङ्गिराप्रमुखाः कामयामासुः ॥ कान्तं प्रतिकामि-
नीः कामवत्यः ॥ पीवानं पुष्टं श्मश्रुलं श्मश्रुवद्बहुलं रतिसमर्थमित्यर्थः । मीढ्वांसं रेतःसेक्तारं याभकोविदं ॥५॥ अतएव प्रेष्ठं श्मश्रुभिङ्गं ना-
वबुध्यत ॥६॥ स्वामिनमिति स्त्रुजाभिप्रायेणाह ॥८॥ इडविडाकारं वत्सजातिशब्दं ॥ संधितुं प्रसादयितुं ॥९॥ वृषणं मुष्कं छिन्नं लंबर

तस्या उद्धरणोपायं बस्तः कामी विचिंतयन् ॥ व्यधत्त तीर्थमुद्धृत्य विषाणाग्रेण रोधसि ॥४॥ सोत्तीर्य कूपात् सुश्रोणी
तमेव चकमे किल ॥ तया वृतं समुद्वीक्ष्य बह्व्योऽजाः कान्तकामिनीः ॥ पीवानं श्मश्रुलं प्रेष्ठं मीढ्वांसं याभकोविदं
॥५॥ स एकोऽजवृषस्तासां बह्वीनां रतिवर्द्धनः ॥ रेमे कामग्रहग्रस्त आत्मानं नावबुध्यत ॥६॥ तमेव प्रेष्ठतमया रममाणम
जान्यया ॥ विलोक्य कूपसंविग्ना नामृष्यद्बस्तकर्म तत ॥७॥ तं दुर्हृदं सुहृद्रूपं कामिनं क्षणसौहृदं ॥ इंद्रियाराममु
त्सृज्य स्वामिनं दुःखिता ययौ ॥८॥ सोपि चानुगतः स्त्रैणः कृपणस्तां प्रसादितुं ॥ कुर्वन्निडविडाकारं नाशक्नोत्पथि सं-
धितुं ॥९॥ तस्य तत्र द्विजः कश्चिदजास्वाम्यच्छिनद्रुषा लंबंतं वृषणं भूयः संदधेऽर्थाय योगवित् ॥१०॥ संबद्धवृषणः सो
पि ह्यजया कूपलब्धया ॥ कालं बहुतिथं भद्रे कामैर्नाद्यापि तुष्यति ॥११॥ तथाहं कृपणः सुभ्रु भवत्याः प्रेमयंत्रितः ॥ आत्मा
नं नाभिजानामि मोहितस्तव मायया ॥१२॥ यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः ॥ न दुह्यंति मनःप्रीतिं पुंसः कामहतस्य ते
॥१३॥ न जातु कामः कामानामुपभोगेन शाम्यति ॥ हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते ॥१४॥

यासंभोगेसमर्थमकरोत् ॥ अर्थाय स्वपुत्र्याः कामभोगायायोगवित् उपायज्ञः ॥ जरावत्या सेन रतिशक्तिं दत्वा वितुष्टः ॥१०॥ कूपलब्धयास ३८
हकामैः सेव्यमानैस्तुष्यति ॥११॥ ननु तर्हि पुनरपि बहवो विषयाः सन्त्येव ततो मनसि प्रीते सति कामो पशान्त्या मोहो निवर्त्तेतेति चेत्तत्राह यत्

तर्हि कदा केनोपायेन वा मनसः संसरणोपरतिः स्यात् यदा कामोपशमः स्यादित्यत आह यदेति षड्भिः ॥ असंगलं भावं रागद्वेषादिवैषम्ये ॥१५॥ दुःखा
नि नितरां वहतीति तथा तां ॥१६॥ स्त्रीसंनिधानं तु सर्वथा त्याज्यमित्याह मात्रेति ॥ अविविक्तं संकीर्णमासनं यस्य सः ॥ कर्षतीति आकर्षति ॥१७॥
॥१९॥ ननु त्यक्त्वा त्यागस्यापि दुःकरत्वात् कथं ब्रह्मणि मनस आधानं स्यात् तत्राह दृष्टमिति ॥ यो नानुध्यायेत् ॥ न संदिशेन्न तच्चोपभुंजीत ॥ तु

यदा न कुरुते भावं सर्वभूतेष्वमंगलं ॥ समदृष्टेस्तदा पुंसः सर्वाः सुखमया दिशः ॥१५॥ या दुस्त्यजा दुर्मतिभिर्जीर्यतो या न
जीर्यते ॥ तां तृष्णां दुःखनिवहां शर्मकामो द्रुतं त्यजेत् ॥१६॥ मात्रा स्वस्रा दुहित्रा वा नाविविक्तासनो भवेत् ॥ बलवानिंद्रिय
ग्रामो विद्वांसमपि कर्षति ॥१७॥ पूर्णं वर्षसहस्रं मे विषयान्सेवतोऽसकृत् ॥ तथापि चानुसवनं तृष्णा तेषूपजायते
॥१८॥ तस्मादेतामहं त्यक्त्वा ब्रह्मण्याधाय मानसं ॥ निर्द्वंद्वो निरहंकारश्चरिष्यामि मृगैः सह ॥१९॥ दृष्टं श्रुतमसद्बुद्ध्वा
नानुध्यायेन्न संदिशेत् ॥ संसृतिं चात्मनाशं च तत्र विद्वान्स आत्मदृक् ॥२०॥ इत्युक्त्वा नाहुषो जायां तदीयं पूरवे वयः ॥ द
ज त्वा स्वजरसं तस्मादाददे विगतस्पृहः ॥२१॥ दिशि दक्षिणपूर्वस्यां द्रुह्युं दक्षिणतो यदुं ॥ प्रतीच्यां तुर्वसुं चक्र उदीच्यामनुम
नुमीश्वरं ॥२२॥ भूमंडलस्य सर्वस्य पूरुमर्हत्तमं विशां ॥ अभिषिच्याग्रजांस्तस्य वशे स्थाप्य वनं ययौ ॥२३॥ आसेवितं व
र्षपूगान् षड्वर्गं विषयेषु सः ॥ क्षणेन मुमुचे नीडं जातपक्ष इव द्विजः ॥२४॥ स तत्र निर्मुक्तसमस्तसंग आत्मानुभूत्या वि
धुतत्रिलिंगः ॥ परेऽमले ब्रह्मणि वासुदेवे लेभे गतिं भागवतीं प्रतीतः ॥२५॥

यद्दृष्टश्रुतयोरनुध्यानादौ स आत्मदृग्भवति ॥२०॥२१॥ तस्य पूरोर्वशे ज्येष्ठान्स्थापयित्वा ॥२३॥ विषयेषु शब्दादिषु आसेवितं षड्वर्गं षडिंद्रियसुखं
मुमुचे त्यक्तवान् ॥ यद्वा विषयेषु आसेवितं सेवाकारितं षण्णामिंद्रियाणां वर्गं मुमुचे उपेक्षितवानित्यर्थः ॥२४॥ विधुतं निरस्तं त्रिगुणात्मकं लिंगं येन ॥ प्रतीतः प्रख्यातः ॥२५॥

प्रस्तोभमेवाहयरिहासमिवेति यद्दा प्रस्तोभंनिरंतिमार्गेप्रोत्साहनंनमेने ॥ २६ ॥ २८ ॥ कथंसमावेश्यतदाहनमइति नुमनादिभिः ॥ समावेश्ये त्यर्थः ॥
शुकोवानमस्वरोति ॥ २९ ॥ न ॥ मे ॥ को ॥ न ॥ वि ॥ श ॥ २२ ॥ विश्नोपितप्रसादाम्सराज्ञासनमहोन्नतेः पुरोर्वंशोतदौष्यंतेर्भरतस्येयेतेयज्ञाः ॥ १ ॥ १ ॥ २ ॥
तत्सुतः अहंयातःसुतः ॥ ३ ॥ धर्मेयुश्चसत्येयुश्चव्रतेयुश्च ॥ धर्मसत्यव्रतेयवः ॥ ४ ॥ वनेयुश्चावमःस्मृतः ॥ एवंदशोतेऽरुतेयुप्रमुखा

श्रुत्वागाथांदेवयानीमेनेप्रस्तोभमात्मनः ॥ स्त्रीपुंसोःस्नेहवैक्लव्यात्परिहासमिवेरितं ॥ २६ ॥ सासंनिवासंसुहृदांप्रपाया
मिवगच्छतां ॥ विज्ञायेश्वरतंत्राणांमायाविरचितंप्रभोः ॥ २७ ॥ सर्वत्रसंगमुत्सृज्यस्वप्नौपम्येनभार्गवी ॥ कृष्णेमनःसमावेश्य
व्यधुनोल्लिंगमात्मनः ॥ २८ ॥ नमस्तुभ्यंभगवतेवासुदेवायवेधसे ॥ सर्वभूताधिवासायशांतायबृहतेनमः ॥ २९ ॥ इतिश्रीभा
गवतेमहापुराणेनवमस्कंधेययातिनामएकोनविंशतितमोध्यायः ॥ १९ ॥ श्रीशुकउवाच ॥ पुरोर्वंशंप्रवक्ष्यामि
यत्रजातोसिभारत ॥ यत्रराजर्षयोवंश्याब्रह्मवंश्याश्चजज्ञिरे ॥ १ ॥ जनमेजयोह्यभूत्पूरोःप्रचिन्वांस्तत्सुतःस्ततः ॥ प्रवीरोथ
मनस्युर्वैतस्माच्चारुपदोभवत् ॥ २ ॥ तस्यसुद्युरभूत्पुत्रस्तस्माद्बहुगवस्ततः ॥ संयातिस्तस्याहंयातीरौद्राश्वस्तुसुतः ॥
स्मृतः ॥ ३ ॥ ऋतेयुस्तस्यकक्षेयुःस्थंडिलेयुःकृतेयुकः ॥ जलेयुःसंततेयुश्चधर्मसत्यव्रतेयवः ॥ ४ ॥ दशैतेप्सरसःपुत्रा
वनेयुश्चावमःस्मृतः ॥ घृताच्यामिंद्रियाणीवमुख्यस्यजगदात्मनः ॥ ५ ॥ ऋतेयोरंतिभारोभूत्त्रयस्तस्यात्मजानृप ॥ स
मतिःध्रुवोऽप्रतिरथःकण्वोप्रतिरथात्मजः ॥ ६ ॥ तस्यमेधातिथिस्तस्मात्प्रस्कण्वाद्याद्विजातयः ॥ पुत्रोभूत्सुमतेरे
भिःदुष्यंतस्तत्सुतोमतः ॥ ७ ॥ दुष्यंतोमृगयांयातःकण्वाश्रमपदंगतः ॥ तत्रासीनांस्वप्रभयामंडयंतींरमामिव ॥ विलोक्यसद्यो
मुमुहेदेवमायामिवस्त्रियं ॥ ८ ॥
स्तस्यरौद्राश्वस्यघृताच्यामप्सरसिपुत्राजातात्राः ॥ अप्स
रसइतियष्ठीसप्तम्यर्थोवशवर्तित्वेदृष्टांतः ॥ ज
गदात्मनःजगतआत्मभूतस्यमुख्यस्यप्राणस्येंद्रियाणीव ॥ ५ ॥ ७ ॥ दुष्यंतस्यशकुंतलायाभरतःपुत्रोभवदितिकथाद्वारेणाहदुष्यंतो

[illegible] ॥ ८ ॥ ३५

तस्माद्दर्शनेनप्रमुदितःअतएवसन्निवृत्तःपरिश्रमोयस्य॥ १९॥ २१॥ पौरवाणांचेतोनह्यधर्मेरमते॥ अतोमच्चेतसःत्वयिरमणादेवाहंत्वांराजन्य
तनयांवेद्मि॥ २१॥ विश्वामित्रस्यात्मजाहंमेनकायांजातातयाचस्वर्गंगच्छत्यात्रत्यक्तातोराजन्यैकेवाहमित्यर्थः॥ २२॥ २३॥ किंकरवाम्यत्यादिवाक्यं

बभासेतांवरारोहांभर्तैःकतिपयैर्वृतः॥ तद्दर्शनप्रमुदितःसंनिवृत्तपरिश्रमः॥ १९॥ पप्रच्छकामसंतप्तःप्रहसन्श्लक्ष्णयागि
रा॥ कात्वंकमलपत्राक्षिकस्यासिहृदयंगमे॥ २०॥ किंवाचिकीर्षितंत्वत्रभवत्यानिर्जनेवने॥ व्यक्तंराजन्यतनयांवेद्म्यहंत्वां
सुमध्यमे॥ नहिचेतःपौरवाणामधर्मेरमतेक्वचित्॥ २१॥ शकुंतलोवाच॥ विश्वामित्रात्मजैवाहंत्यक्तामेनकयावने॥ वेदै
तद्भगवान्कण्वोवीरकिंकरवाणिते॥ २२॥ आस्यतांह्यरविंदाक्षगृह्यतामर्हणंचनः॥ भुज्यातांसंतिनीवाराउष्यतांयदि
रोचते॥ २३॥ दुष्यंतउवाच॥ उपपन्नमिदंसुभ्रुजातायाःकुशिकान्वये॥ स्वयंहिवृणुतेराज्ञःकन्यकासदृशंवरं॥ २४॥
ॐमित्युक्तेययाधर्मेणुपयेमेशकुंतलां॥ गांधर्वविधिनाराजादेशकालविधानवित्॥ २५॥ अमोघवीर्योराजर्षिर्मे
हिष्यावीर्यमादधे॥ श्वोभूतेस्वपुरंयातःकालेनासूतसासुतं॥ २६॥ कण्वःकुमारस्यवनेचक्रेसमुचिताःक्रियाः॥
बध्वामृगेंद्रान्तरसाक्रीडतिस्मसबालकः॥ २७॥ तंदुरत्ययविक्रांतमादायप्रमदोत्तमा॥ हरेरंशांशसंभूतंभर्तुरं
तिकमागमत्॥ २८॥ यदानजगृहेराजाभार्यापुत्रावनिंदितौ॥ शृण्वतांसर्वभूतानांखेवागाहाशरीरिणी॥ २९॥ माता
भस्त्रापितुःपुत्रोयेनजातःसएवसः॥ भरस्वपुत्रंदुष्यंतमावमंस्थाःशकुंतलां॥ ३०॥

तदभिप्रायंज्ञात्वाह॥ उपपन्नमिति॥ २४॥ गांधर्वविधिनामिथःसमयपूर्वकेण॥ २५॥ २७॥ दुरत्ययंविक्रांतंविक्रमणंयस्य॥ २८॥ २९॥ भस्त्रा
चर्मपात्रंतद्वत्माताआधारमात्रंपितुरेवतुपुत्रः॥ तत्रहेतुःयेनेति॥ आत्मावैपुत्रनामासीतिश्रुते॥ भरस्वपुषाण॥ अनेनभरतनामनिरुक्तं॥ ३०॥

भा॰न॰ किंरेतोधाः रेतःसेक्ता वंशकृत्पुत्रोयमह्वयात्पितरं यतितारयति तथाच स्मृतिः । पुन्नाम्नोनरकाद्यस्मात्पितरं त्रायते सुतः । तस्मात्पुत्र इति प्रो
८० क्तः स्वयमेव स्वयंभुवेति । पाठांतरे मातापित्रोः पुत्रं प्रति विवादे यमह्वयात धर्मेति ऐतुः । यमस्य भ[illegible]य[illegible] सकाशात् रेतोधा रेतः । सेक्ता पितैव धर्मे
णाविडित्य पुत्रं नयनि नयति नतु मातेत्यर्थः ततश्च भार्यापुत्रौ स्वीकृतवानिति ज्ञेयं ॥ २१ ॥ चक्रवर्त्ती वभूवेति शेषः तस्य महिमा गीयते । तदुच्यते
श्लोकाश्च अभिगीता इत्यादि वक्ष्यमाणत्वाह ॥ हरेरंशभुवः अंशात् जातस्य ॥ २२ ॥ तत्र लिंगमाह चक्रमिति ॥ २३ ॥ गंगायां अनु[illegible]लोमं पंचपंचा
शताः वाजिभिः राडे ॥ पुरोधाय पुरोहितं कृत्वा ॥ यमुनामनु च यमुनायाश्चानुलोमं त्र्यधिक सप्ततिमेध्यान् अश्वानववंध किं कुर्वन वसुधनं
क श्रेणादद्दत ॥ २४ ॥ साचीगुणे प्रकृष्ट गुण एव तिष्ठेद्देशे अग्निः चितोभूत् । यस्मिन्नग्निचयते देशे वा सहस्रं ब्राह्मणाः भरतेन भूरिदानेन द

रेतोधाः पुत्रो नयति नरदेव यमह्वयात् ॥ त्वं चास्य धाता गर्भस्य सत्यमाह शकुंतला ॥ २१ ॥ पितर्युपरते सोपि चक्रवर्त्ती म
हायशाः ॥ महिमा गीयते तस्य हरेरंशभुवो भुवि ॥ २२ ॥ चक्रं दक्षिणहस्तेस्य पद्मकोशोस्य पादयोः ॥ ईडे महाभिषेकेण सो
भिषिक्तोधिराड्विभुः ॥ २३ ॥ पंचपंचाशता मेध्यैर्गंगायामनु वाजिभिः ॥ मामतेयं पुरोधाय यमुनायामनु प्रभुः ॥ २४ ॥ अष्ट
सप्ततिमेध्याश्वान् ववंध प्रददद्वसु ॥ भरतस्य हि दौष्यंतेरग्निः साचीगुणे चितः ॥ सहस्रं वद्वशो यस्मिन्ब्राह्मणा गा विभेडि
रे ॥ २५ ॥

ज
ताः गाः वद्वशः प्रत्येके वद्वं वद्वं विभेजिरे ॥ विमड्यगृह्णुः । चतुरशीत्यधिके त्रयोदशसहस्रैरेकं वद्वं भवति तथाहि हिरण्येन परिवृतान् कृष्णा
न्शुक्लदतो मृगानम स्नारे भरतो ऽदाच्छतं वद्वानि सप्त चेति स्कन्दोक्तानि सप्ताधिकशतं वद्वानि श्रीम्शुकेनोत्तर श्लोके चतुर्दशलक्ष कृ स
त्वेन संगृहीतानि अदात्कर्मणि मस्नारे नियुतानि चतुर्दशेति । एवं च चतुर्दशलक्षाणां सप्ताधिकशतभागो वद्वमित्युक्तं ॥ इयं च वद्वसंख्या ८०
श्लोके न संगृह्यते । चतुर्दशानां लक्षाणां सप्ताधिकशतांशकः । वद्वं चतुरशीत्यग्रसहस्राणि त्रयोदश ॥ २५ ॥

देवानामपिमायांवैभवंअत्यगात। अत्यजीत यतः गुरुंसर्वस्यहरिंआययौप्राप्तस्तदंशभवत्वात्। मायत्तरइतिपाठे ऽरूखं अकृत्यनुसारेणमाया
वतांश्रेष्ठोहरेवासावित्यर्थः २६ मृगान्श्वेतदन्तान् नष्टमंडमृगाद्वयोगडजातिभेदा। मष्णारइत्यस्यअतिपदस्यव्याख्यानंकर्म्मणीति। क
स्मिंश्चित्कर्म्मविशेषेकेचित्तुमष्णारइतितीर्थेइतिव्याचक्षते २७॥ २८॥ २९॥ पुरादेवानृजित्वायेसुरारसौकांसिरसातलादिस्थानानिभेजि
रेतैः प्राणिभिर्बलिभिर्देवस्त्रियोरसातलंनीताःसतीःपुनराहरत्तदौष्यंतिः। आनिन्ये प्राणिभिरन्यैर्मनुष्यादिभिःसहनीताइतिवा प्राणिभि

त्रयस्त्रिंशच्छतंह्यश्वान्बध्वाविस्मापयन्नृपान्। दौष्यंतिरत्यगान्मायांदेवानांगुरुमाययौ॥ २६। मृगान्शुक्लदतःकृष्णा
न्हिरण्येनपरीवृतान्॥ अदात्कर्म्मणिमष्णारेनियुतानिचतुर्द्दश॥ २७॥ भरतस्यमहत्कर्म्मनपूर्वेनापरेन्नृपाः॥ नैवाधुर्नैव
प्राप्स्यंतिबाहुभ्यांत्रिदिवंयथा॥ किरातहूणान्यवनान्पौंड्रान्कंकान्खशांछकान्॥ अब्रह्मण्यान्नृपांश्चाहन्म्ले॥ च्छा
न्दिग्विजयेखिलान्॥ २९॥ जित्वापुराऽसुरादेवान्येरसौकांसिभेजिरे॥ देवस्त्रियोरसांनीताःप्राणिभिःपुनराहरे
त्॥ ३०॥ सर्वेकामान्दुदुहतुः॥ प्रजानांतस्यरोदसी॥ समास्त्रिनवसाहस्रीर्दिक्षुचक्रमवर्त्तयत्॥ ३१॥ ससम्राट्।
लोकपालाख्यमैश्वर्यमधिराट्श्रियं॥ चक्रंचास्खलितंप्राणान्मृषेत्युपरराम ह॥ ३२॥ तस्यासन्नृपवैदर्भ्यःपत्न्यस्ति
स्रःसुसंमताः॥ जघ्नुस्त्यागभयात्पुत्रान्नानुरूपाइतीरिते॥ ३३॥ तस्यैवंवितथेवंशेतदर्थंयजतःसुतं॥ मरुत्स्तोमेनमरुतोभर

रितिपाठे। प्राणयोसुरास्तैर्नीताःमतीः यद्वाप्राणयोहृता द्वाजमुपाददुः॥ ३४॥ स्तैःहृतान्प्रत्यस्थ्याहरदित्यर्थः॥ ३०॥ त्रिनवसाहस्रीः
समाः सप्तविंशतिसहस्रंवत्सरान्। चक्रंसेनाआज्ञावा॥ ३१॥ तस्यवैराग्येणमोक्षप्रकारमाहसइति। मृषेतिविचार्योत्तिष्ठसुः॥ ३२॥ नानु
रूपाःमत्सदृशानभवंतीतिभर्त्राइरितेसतिव्यभिचारशंकयाऽस्मांस्त्यक्ष्यतीतिभयात्पुत्रान्जघ्नुःपुनःपुनःपुत्राणांदर्शनेवैसादृश्या
नुसंधानेनतपडेतनान्यथेत्याशयेनहतवत्यः॥ ३३॥ वितथेव्यर्थेसतितदर्थंपुत्रार्थंमरुत्स्तोमेनयागेनयजतस्तस्यप्रसन्ना सं

येनयजतस्तस्यप्रसन्नाः॥ संतो मरुतो भरद्वाजंनामपुत्रमनुयादकुः समर्पयामासुः॥३४॥ मरुतां भरद्वाजागमप्रकारं दर्शयन्नाह॥ अंतर्वत्न्या
मिति चतुर्भिः॥ अंतर्वत्न्यां गर्भिण्यां भ्रातुरुतथ्यस्य पत्न्यां ममतायां वीर्येण मैथुनायकदाचित्प्रवृत्तो बृहस्पतिस्तदा द्वितीयगर्भस्या
वकाशाभावादाक्रोशपूर्वकं गर्भस्थेन वारितस्ततः क्रुद्धो बृहस्पतिरंधो भवेदिति तं गर्भं शप्त्वा बलात्वीर्यं न्यषिंचत्॥ ततो बृहस्पतेः
शापादुतथ्योदीर्घतमानंधो बभूव॥ तेन वतदीर्येपाष्णिप्रहारेणयोनेर्बहिर्निःसारितंभूमौपतितंसद्य एवकुमारोभवत्॥३५
तं च परवीर्यजं भर्तुस्त्यागाद्विशंकितासतीत्यक्तुकामांममतांप्रतिसुराः॥ एतद् बृहस्पतेर्ममतायाश्चविवादरूपंश्लोकंजगुः

अंतर्वत्न्यां भ्रातृपत्न्यां मैथुनाय बृहस्पतिः॥ प्रवृत्तो वारितो गर्भं शप्त्वा वीर्यमवासृजत्॥३५॥ तं त्यक्तुकामां मम
मतां भर्तुस्त्यागविशंकितां॥ नामनिर्वचनं तस्य श्लोकमेनं सुरा जगुः॥३६॥ मूढे भरद्वाजमिमं भरद्वाजं बृहस्पते
यातौ यदुक्त्वा पितरौ भरद्वाजस्ततस्त्वयं॥३७॥ चोद्यमाना सुरैरेवं मत्वा वितथमात्मजं॥ व्यसृजन्मरुतो बिभ्रत्
दत्तोयं वितथेन्वये॥३८॥

किमर्थं जगुः अत आह॥ तस्य नामनिरुच्यते ये नतं॥ तन्नामनिर्वचनेनैव भर्तुस्त्यागशंकामपाकर्तुमि
त्यर्थः॥३६॥ तत्र पुत्रं त्यक्तुं यांतीं ममतां बृहस्पतिराह॥ हे मूढे इमं पुत्रं भरपुषाण॥ भर्तुर्बिभेमीति चेत्तत्राह॥ द्वाजं एकस्य क्षेत्रे अन्य
स्य बीजादित्येवं द्वाभ्यां जातं॥ अतस्त्वमस्यापि पुत्र इति॥ न तस्मात् भयशंकेत्यर्थः॥ एवमुक्ता सती तत्राह॥ हे बृहस्पते त्वमिमं भ
र यतः द्वाजं द्वाभ्यां मा वावाभ्यामुत्पादितो जातं॥ अतो नाहमेकाकिनी भरामीत्यर्थः॥ यतः यस्मादेवमुक्त्वा पितरौ ममता बृहस्पती विव
दमानौ पुत्रं परित्यज्य यातौ ततो हेतोरयं भरद्वाज इति॥ पाठांतरे॥ यस्य पुत्रस्य त्यागदुःखात् पितरौ याताविति त्यर्थः॥३७॥ वितथं व्यभिचारसं
भवात् तमात्मजं वितथं निष्फलं मत्वा ममतायास्तत्याज॥ पाठांतरे॥ आदिजं प्रथमजं भर्तुर्बीजाज्जातमेमुख्यमात्मजं मत्वा बृहस्पतेर्जातं
तत्याजेत्यर्थः एवं तयोत्सृष्टं मरुतो बिभ्रन् अबिभरुः तदेवं मरुद्भिः
प्राप्तोयं भरतस्यान्वये वितथे सति दत्तः॥३८॥

सगुणायस्वरूपसहिताय ७ ८ उच्छेषं उर्वरितं एकमेवतर्पयतीतितथा ॥ १० परदुःखासहिष्णुतापासर्वेषां दुःखंस्वयंभोक्तुमाशा
स्तेनेति ॥ अणिमाद्यष्टसमृद्धियुक्तां ॥ गतिमपिमोक्षमपिवाहनकामये तर्हिकिंकामयसेतत्राह ॥ अखिलदेहभाजांमार्तिंदुःखंतत्तज्जो
क्तृरूपेणांतःस्थितःसन्नहंप्रपद्येप्राप्नुयामित्येवंकामये ॥ येनतद्दुःखं ॥ मोक्ष्यमाहेतुभूतेनतेसर्वेऽदुःखाभवंति ॥ ११ ॥ ननुदुःखंक्वि कुं

याते श्रइतमन्योगादतिथिःश्वभिरावृतः ॥ राजन्मेदीयतामन्नंसगणायबुभुक्षते ॥ ७ ॥ सआहृत्यावशिष्टंयद्बहु
मानपुरस्कृतं ॥ तच्चदत्त्वानमश्चक्रेश्वभ्यःश्वपतयेविभुः ॥ ८ ॥ पानीयमात्रमुच्छेषंतच्चैकपरितर्पणं ॥ पास्यतःपुल्क
शोभ्यागाद्देहिशुभस्यमे ॥ ९ ॥ तस्यतांकरुणांवाचंनिशम्यविपुलश्रमां ॥ कृपयाभृशसंतप्तइदमाहामृतंवचः ॥
॥ १० ॥ नकामयेहंगतिमीश्वरात्परामष्टर्द्धियुक्तामपुनर्भवंवा ॥ आर्तिंप्रपद्येखिलदेहभाजामंतःस्थितोयेनभवंत्य
दुःखाः ॥ ११ ॥ क्षुत्तृट्श्रमोगात्रपरिभ्रमश्चदैन्यंक्लमःशोकविषादमोहाः ॥ सर्वेनिवृत्ताःकृपणस्यजंतोर्जिजीवि
षोर्जीवजलार्पणान्मे ॥ १२ ॥ एवंप्रभाष्यपानीयंम्रियमाणःपिपासया ॥ पुल्कशायाददाद्धीरोनिसर्गकरुणोनृपः
॥ १३ ॥ तस्यत्रिभुवनाधीशाःफलदाःफलमिच्छतां ॥ आत्मानंदर्शयांचक्रुर्मायाविष्णुविनिर्मिताः ॥ १४ ॥ सवैतेभ्योनमस्कृत्य
निःसंगोविगतस्पृहः ॥ वासुदेवेभगवतिभक्त्याचक्रेमनःपरं ॥ १५ ॥

मितिप्रार्थयसेपरदुःखनिवृत्त्यैवममस सर्वदुःखनिवृत्तिरि
त्याह क्षुत्तृडिति ॥ कृपणस्यजंतोर्जीवनहेतोःजलस्यार्पणान्मेसर्वेक्षुत्तृडादयोनिवृत्ताः ॥ १२ इत्येवंसंभाष्य ॥ १३ ॥ त्रिभुवनाधी
शाब्रह्मादयःमायाःतदीयधैर्यपरीक्षार्थंप्रथमंमाययावृषलादिरूपेणप्रतीताःसंतइत्यर्थः ॥ १४ ॥ परंकेवलंवासुदेवभक्त्यान
मश्चक्रेनतुतान्किमपियाचितवान् ॥ १५ ॥ ६२

नवमे विंशोध्यायः ॥ २० ॥ एकविंशे तु दौष्यंतेः सुतस्यान्वय उच्यते ॥ रंतिदेवादमीढाद्यैर्यत्र कीर्त्तिः प्रतन्यते ॥ १ ॥ भरतस्यान्वये वितथे सति दत्तत्वाद्वित
थसंज्ञो भरद्वाजः स च ब्राह्मणोपि भरतस्य दत्तपुत्रो जात इति तद्वंशोनुक्रम्यते ॥ वितथस्य सुतो मन्युस्तस्माद्बृहत्क्षत्रजयमहावीर्यनरगर्गाः

॥ इति श्रीभागवते महापुराणे नवमस्कंधे कुरुवंशानुकीर्तनं विंशोध्यायः ॥ २० ॥ श्रीशुक उवाच ॥ वितथस्य सुता
न्मन्योर्बृहत्क्षत्रो जयस्ततः ॥ महावीर्यो नरो गर्गः संकृतिस्तु नरात्मजः ॥ १ ॥ गुरुश्च रंतिदेवश्च संकृतेः पांडुनंदन ॥
रंतिदेवस्य हि यश इहामुत्र च गीयते ॥ वियद्वित्तस्य ददतो लब्धं लब्धं बुभुक्षतः ॥ २ ॥ निःकिंचनस्य धीरस्य सकु
टुंबस्य सीदतः ॥ व्यतीयुरष्टचत्वारिंशदहान्यपिबतः किल ॥ ३ ॥ घृतपायससंयावं तोयं प्रातरुपस्थितं कृच्छ्रप्रा
प्तकुटुंबस्य क्षुत्तृड्भ्यां जातवेपथोः ॥ ४ ॥ अतिथिर्ब्राह्मणः काले भोक्तुकामस्य चागमत् ॥ तस्मै संव्यभजत्सोन्न
मादृत्य श्रद्धयान्वितः ॥ हरिं सर्वत्र संपश्यन् स भुक्त्वा प्रययौ द्विजः ॥ ५ ॥ अथान्यो भोक्ष्यमाणस्य विभक्तस्य महीप
तेः ॥ विभक्तं व्यभजत्तस्मै वृषलाय हरिं स्मरन् ॥ ६ ॥

पंच पुत्रा बभूवुः ॥ १ ॥ वियद्वित्तस्य वियतो गगनाद्दैवात् विना उद्यमं दैवादुपस्थितमेव वित्तं भोग्यं यस्य ॥ यद्वा वियद्व्ययं प्राप्नुवद्वित्तं भोग्यं य
स्य तदेवाह बुभुक्षितोपि सतो लब्धं लब्धं ददतः ॥ २ ॥ तत्र पंच यतिनिः ॥ किंचनस्येत्यादि सार्द्धः ॥ पंचदशभिः अपिबतो जलपानमप्यकु
र्वतः ॥ ३ ॥ घृतादित्रयाणां द्वंद्वैक्यं तोयं च ॥ ४ ॥ ५ ॥ अथान्यो वृषलो तिथिरागमत् ॥ विभक्तस्य कुटुंबार्थं मन्नादिकं विभाजितवतः ॥ ६ ॥

अनन्यराधस ईश्वरातिरिक्तफलांतरानपेक्षस्य । प्रत्यलीयत आत्मन्येव लीना बभूव ॥ २६ ॥ २७ । मन्युसुतस्य नरस्य वंशमुक्त्वा तत्सु-
तस्यैव गार्ग्यस्य वंशमाह गर्गादिति ॥ महावीर्यस्य वंशमाह । दुरितक्षयः तस्य त्रय्यारुणिः कविः पुष्करारुणिश्चेति त्रयः । पुत्रा ये त्र-
यस्तत्र वंशे ब्राह्मगतिं ब्राह्मणरूपतां गतास्ते ॥ २८ । मन्युपुत्राणां पंचानां ज्येष्ठस्य वंशमाह बृहत्क्षत्रस्येति ॥ यतयेन हस्तिनापुरं
कृतमित्यर्थः ॥ अजमीढादयस्त्रयो हस्तिनः पुत्राः ॥ २९ ॥ अजमीढाद्देवान्यः पुत्रो बृहदिषुर्नामाभवत । २० । २१ । पारस्य तनयो नीपः नाप-
स्य पुत्रशतं । २२ । स एव कृत्वी संज्ञायां शुककन्यायां ब्रह्मदत्तं च जनयामास । तदुक्तं हरिवंशादिषु । पराशरकुलोत्पन्नः शुको नाम महाय-

ईश्वरालंबनं चित्तं कुर्वतोऽनन्यराधसः ॥ मायागुणमयी राजन्स्वप्नवत्प्रत्यलीयत ॥ २६ ॥ तत्प्रसंगानुभावेन रंतिदेवानुवर्त्तिनः
अभवन्योगिनः सर्वे नारायणपरायणाः ॥ २७ ॥ गर्गाच्छिनिस्ततो गार्ग्यः क्षत्राद्ब्रह्म ह्यवर्त्तत ॥ दुरितक्षयो महावीर्यात्तस्य त्रय्या-
रुणिः कविः ॥ पुष्करारुणिरित्यत्र ये ब्राह्मणगतिं गताः ॥ २८ ॥ बृहत्क्षत्रस्य पुत्रोऽभूद्धस्ती यद्धस्तिनापुरं ॥ अजमीढो द्विमी-
ढश्च पुरुमीढश्च हस्तिनः । अजमीढस्य वंश्याः स्युः प्रियमेधादयो द्विजाः ॥ २९ । अजमीढाद्बृहदिषुस्तस्य पुत्रो बृह-
द्धनुः ॥ बृहत्कायस्ततस्तस्य पुत्र आसीज्जयद्रथः ॥ २० ॥ तत्सुतो विशदस्तस्य सेनजित्समजायत ॥ रुचिराश्वो दृढह-
नुः काश्यो वत्सश्च तत्सुताः ॥ २२ ॥ रुचिराश्वसुतः पारः पृथुसेनस्तदात्मजः ॥ पारस्य तनयो नीपस्तस्य पुत्रशतं ह्यभूत ॥ २२ ॥
क सकृत्व्यां शुककन्यायां ब्रह्मदत्तमजीजनत ॥ स योगी गविभार्यायां विष्वक्सेनमधात्सुतं ॥ २३ ॥

शाः व्यासादरण्यां संभूतो विधूमोऽग्निरिव ज्वलन ॥ स तस्यां पितृकन्यायां वीरिण्यां जनयिष्यति । कृष्णं गौरं प्रभुं शंभुं तथा भूरिश्रुतं जयं ॥
कन्यां कीर्तिमयीं यष्टीं योगिनीं योगिमातरं ॥ ब्रह्मदत्तस्य जननीं महिषीमणुहस्य चेति ॥ यद्यपि शुक उत्पत्त्यैव विमुक्तसंगो निर्गतः तथा-
पि विरहातुरं व्यासमनुयांतं दृष्ट्वा छायाशुकं निर्माय गतवान् तदभिप्रायेणैव गार्हस्थ्यादिव्यवहार इत्यविरोधः स च ब्रह्मदत्तो योगी गवि-

भा०न० नरवयोगतंत्रंचकार। बार्हद्रीषवाः रहादिशोर्वंशपाइमे दार्घमार्धे॥२४॥ सुपार्श्वेकृत सुपार्श्वस्यपिता। २५ प्राच्यसाम्नांषट् संहि
६३ ताङगौ विभज्याध्यापितवान। २६। २७। अजमीढस्यवंश्याः प्रियमेधादयः केचिद्ब्राह्मणावभूवुः। रहदिषुप्रभृतयः क्षत्रियाश्चे

तेगीषव्योपदेशेनयोगतंत्रंचकारह॥ उग्रसेनस्ततस्तस्माद्भल्लाटोबार्हदीषवाः॥२४॥ यवीनरोद्विमीढस्यकृतिमांस्तु
ततःस्मृतः॥ नाम्नासत्यधृतिर्यस्यदृढनेमिः सुपार्श्वकृत॥२५॥ सुपार्श्वात्सुमतिस्तस्यपुत्रःसंनतिमांस्ततः कृतीहि
रण्यनाभाद्योयोगंप्राप्यजगौस्मषट्संहिताः प्राच्यसाम्नांवैनीपोह्युग्रायुधस्ततः॥२६॥ तस्यक्षेम्यःसुवीरोथसु
वीरस्यरिपुंजयः॥ ततोबहुरथोनामपुरमीढोऽप्रजोभवत॥२७॥ नलिन्यामजमीढस्यनीलःशांतिस्तुतत्सुतः॥ शांतेः
सुशांतिस्तत्पुत्रःपुरुजोकस्ततोभवत॥२८॥ भर्म्याश्वस्तनयस्तस्यपंचासन्मुद्गलादयः॥ यवीनरोबृहदिषुःकांपिल्यः
संजयःसुताः॥३०॥ भर्म्याश्वःप्राहपुत्रामेपंचानांरक्षणायहि॥ विषयाणामलमिमेइतिपंचालसंज्ञिताः॥ मुद्गलाद्ब्रह्मनि
र्वृत्तंगोत्रंमौद्गल्यसंज्ञितं॥ मिथुनंमुद्गलाद्भार्म्याद्दिवोदासःपुमानभूत॥ अहल्याकन्यकायस्यांशतानंदस्तुगौतमात॥ न
३१ तस्यसत्यधृतिःपुत्रोधनुर्वेदविशारदः॥ शरद्वांस्तत्सुतोयस्मादुर्वशीदर्शनात्किल॥ शरस्तंबेपतद्रेतोमिथुनंत
दभूच्छुभं॥३२॥ तदृष्ट्वाकृपयागृह्णात्शांतनुर्मृगयांचरन॥ कुमारःकन्याचद्रोणपत्न्यभवत्कृपी॥३३॥ इति

श्रीभागवतेमहापु० नवमस्कंधेएकविंशतितमोध्यायः॥२१

तिकंशोध्ययुक्तं। तस्यैववंशांतरमाहनलिन्यामितिपावत्समाप्तिः॥२८॥ मुद्गलएकः यवीनरादयश्चत्वारइत्येवंपंच॥ ३१॥ ३०॥ भा
र्म्यात्भर्म्याश्वपुत्रान्मिथुनंचाभूत। तदेवाह॥ दिवोदासः पुमानहल्याचन्यकेति॥३२॥३३॥ इतिनवमेएकविंशः॥ ६३

द्वाविंशेतुदिवोदासवंशमुक्त्वाथवर्णिताः ऋक्षवंशेजरासंधपार्थदुर्योधनादयः।१।।१।तस्यसोमकस्यपुत्राणांशतंवभूवतेषां
जंतुर्ज्येष्ठःपवीयान्पृषदः।२।ऋक्षअजमीढस्यवंशांतरमाहयइति।ततःसंवरणात्कुरुः।३।तस्यकृतितःउपरिचरोवसुःततोवृ

श्रीशुकउवाच॥मित्रायुश्चदिवोदासाच्च्यवनस्तत्सुतोनृप॥सुदासःसहदेवोऽथसोमकोजंतुजन्मकृत्॥१
तस्यपुत्रशतंतेषांयवीयान्पृषदस्ततः॥द्रुपदोद्रौपदीतस्यधृष्टद्युम्नादयःसुताः॥धृष्टद्युम्नाद्धृष्टकेतुर्भार्म्याः
पांचालकाइमे।२।योऽजमीढसुतोह्यन्यऋक्षःसंवरणस्ततः॥तपत्यांसूर्यकन्यायांकुरुक्षेत्रपतिःकुरुः।परीक्षि
त्सुधनुर्जह्नुर्निषधश्चकुरोःसुताः॥३॥सुहोत्रोऽभूत्सुधनुषश्च्यवनोऽथततःकृती।वसुस्तस्योपरिचरोवृहद्रथ
मुखास्ततः॥कुशांबमत्स्यप्रत्यग्रचेदिपाद्याश्चचेदिपाः॥४॥वृहद्रथात्कुशाग्रोऽभूदृषभस्तस्यतत्सुतः॥जज्ञेस
त्यहितोपत्यंपुष्पवांस्तत्सुतोजहुः॥५॥अन्यस्यामपिभार्यायांशकलेद्वेवृहद्रथात् येमात्रावहिरुत्सृष्टेजरयाचाभिसं
धिते॥६॥जीवजीवेतिक्रीडंत्याजरासंधोभवत्सुतः॥६॥ततश्चसहदेवोभूत्सोमापिर्यच्छ्रुतश्रवाः॥परीक्षिदनपत्योभू
त्सुरथोनामजाह्नवः।७।ततोविदूरथस्तस्मात्सार्वभौमस्ततोभवत्।जयसेनस्तत्तनयोराधिकोऽतोऽयुतोह्यभूत॥८॥
ततश्चाक्रोधनस्तस्माद्देवातिथिरमुष्यच॥ऋष्यस्तस्यदिलीपोभूत्प्रतीपस्तस्यचात्मजः॥९॥देवापिःशांतनुस्तस्यवाह्लीक
इतिचात्मजाः॥पितृराज्यंपरित्यज्यदेवापिस्तुवनंगतः॥१०॥

सोःवृहद्रथोमुखंआदिर्येषां।तानेवाहकु शांबेति।४।तत्सुतःपुष्प
वान्जह्नुःतस्यापत्यंहितइतियोज्यं।५।जरयाराक्षस्या।६।पतयस्मात्सोमापेःश्रुतश्रवाःकुरोःपरीक्षिदनपत्यः।जाह्नवःजह्नोःपुत्रः।७
अतोराधिकादयुतोऽभूदित्यर्थः।८।९।तस्यप्रतीपस्यदेवापिशांतनुवाह्लीकाः।१०॥

ना०न०
५५

प्राक्पूर्वजन्मनि महाभिष इति संज्ञा यस्य सः ॥ ११ ॥ यदा देवो न ववर्ष तदा शंतनुस्तत्कारणं ब्राह्मणान् पप्रच्छ ॥ ब्राह्मणैश्चैवमुक्तं त्वदा
ग्रजाग्निहोत्रसंयोगं कुरुते योग्रजोस्थिते ॥ परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वज इति स्मृतेः ॥ योग्रभुक्तनुव मग्रतोभुनक्ति अयं त्वाद्
व ग्रोपि परिवेत्तैव भवति ॥ अतस्तद्दोषपरिहाराय राज्यमग्रजाय देहि ॥ १२ ॥ ततोऽश्मभिर्विध्यतीत्येवमुक्तः शंतनुर्वनं गत्वा ग्रजं छंदयां
मास ॥ राज्ञः प्रजापालनादिः परो धर्मः अतस्त्वं राज्यं स्वीकुर्विति प्रार्थितवान् ॥ ततः पूर्वमेव तस्य मंत्रिणाश्मरावसंज्ञेन देवापिंपा

अभवच्छंतनू राजा प्राग्महाभिषसंज्ञितः ॥ यं यं कराभ्यां स्पृशति जीर्णं यौवनमेष्यति ॥ शांतिमाप्नोति चैवाग्र्यां कर्म
णा तेन शांतनुः ॥ ११ ॥ समा द्वादश तद्राज्ये न ववर्ष यदा विभुः ॥ शंतनुर्ब्राह्मणैरुक्तः परिवेत्तायमग्रभुक् ॥ राज्यं देह्य
ग्रजायाशु पुरराष्ट्रविवृद्धये ॥ १२ ॥ एवमुक्तो द्विजैर्ज्येष्ठं छंदयामास सोऽब्रवीत् ॥ तन्मंत्रिप्रहितैर्विप्रैर्वेदाद्विभ्रंशितो गि
रा ॥ वेदवादातिवादान्वै तदा देवो ववर्ष ह ॥ १३ ॥ देवापिर्योगमास्थाय कलापग्राममाश्रितः ॥ सोमवंशे कलौ नष्टे कृता
भूरि दौ स्थापयिष्यति ॥ १४ ॥ बाह्लीकात्सोमदत्तोऽभूद्भूरिर्भूरिश्रवास्ततः ॥ शलश्च शंतनोरासीद्गंगायां भीष्म आत्मवान् ॥ १५ ॥
सर्वधर्मविदां श्रेष्ठो महाभागवतः कविः ॥ वीरयूथाग्रणीर्येन रामोऽपि युधि तोषितः ॥ १६ ॥ शंतनोर्दासकन्यायां ज
ज्ञे चित्रांगदः सुत ॥

षंडीकृत्य राज्यानर्हेणं कर्तुं यं प्रहिताः विप्रास्तैः पाषंडमता अथ यया गिरा वेदाद्विभ्रंशितः सन्वेदवादस्या
तिवादान्निंदावचनानि सोऽब्रवीत् ॥ ततस्तस्य पातित्येन राज्यानर्हत्वे जाते शंतनोर्दोषाभावात् देवो ववर्षेत्यर्थः ॥ १३ ॥ १४ ॥ ततः सोमदत्ता ५५
द्भूरिर्भूरिश्रवाः शलश्चेति त्रयः ॥ १५ ॥ रामो जामदग्न्यः ॥ १६ ॥ दाशकन्यायामिति उपरिचरस्य वसोर्वीर्येण मत्स्यगर्भादुत्पन्ना दाशैः पा
लितातो दाशकन्येति [illegible] सत्यवत्यां ॥

नाम्नातत्समानन्नाम्नाचित्रांगदेनगंधर्वेणयुद्धेहतः।२७। यस्यांसत्यवत्यांशंतनुपरिग्रहात्पूर्वमेवबेदगुप्तायेन। यतोऽहंजातः इदं
श्रीभागवतंवाध्यगां अधिगतवानस्मि।२८।२९। स्वयंवरात्भीष्मेणबलादुपानीते।३०। मात्रासत्यवत्याउक्तइतिनिषेधाभावमाह। अ
पतिरपत्यलिप्सुर्देवराकुरुप्रयुक्तात्स्तुमतीत्यादिवचनात।३१। दुःशलानामकन्यकावडंजो।३२। अरण्येमृगशापान्मैथुनेकृतस्य

विचित्रवीर्यश्चावरजोनाम्नाचित्रांगदोहतः।२७। यस्यांपराशरात्साक्षादवतीर्णोहरेःकला।२१। वेदगुप्तोमुनिःकृ
ष्णोयतोहमिदमध्यगां। हित्वास्वशिष्यान्पैलादीन्भगवान्बादरायणः। मह्यंपुत्रायशांतायपरंगुह्यमिदंजगौ।२२। विचित्र
वीर्योथोवाहकाशिराजसुतेबलात्। स्वयंवरादुपानीतेअंबिकांबालिकेउभे। तयोरासक्तहृदयोगृहीतोयक्ष्मणामृत।२०।
क्षेत्रेऽप्रजस्यवैभ्रातुर्मात्रोक्तोबादरायणः। धृतराष्ट्रंचपांडुंचविदुरंचाप्यजीजनत्।२१। गांधार्यांधृतराष्ट्रस्यजज्ञेपुत्रशतंनृ
प। तत्रदुर्योधनोज्येष्ठोदुःशलाचापिकन्यका।२२। शापान्मैथुनरुद्धस्यपांडोःकुंत्यांमहारथाः। जाताधर्मानिलेंद्रेभ्योयु
धिष्ठिरमुखास्त्रयः। नकुलःसहदेवश्चमाद्र्यांनासत्यदस्रयोः।२३। द्रौपद्यांपंचपंचभ्यःपुत्रास्तेपितरोभवन्। युधिष्ठिरात्प्र
तिविंध्यःश्रुतसेनोवृकोदरात्।२४। अर्जुनाच्छ्रुतकीर्तिस्तुशतानीकस्तुनाकुलिः। सहदेवसुतोराजन्श्रुतकर्मातथापरे
।२५। युधिष्ठिरात्तुपौरव्यांदेवकोथघटोत्कचः। भीमसेनाद्धिडिंबायांकाल्यांसर्वगतस्ततः। सहदेवात्सुहोत्रंतुविजयासू २६
तपार्वती।२६। करेणुमत्यांनकुलोनिरमित्रंतथार्जुनः।२७। इरावंतमुलूप्यांवैसुतायांबभ्रुवाहनं। मणिपूरपतेःसो
पितत्पुत्रःपुत्रिकासुतः।२८।

तिबुद्धस्य। नासत्यदस्राताभ्यामश्विभ्यां २३। पंचभ्योयुधिष्ठिरादिभ्यःपंचाभवन्।२४। तथापरेबभार्यैति
रेषु।२५। कालीचान्याभीमस्यभार्यातस्यांततोभीमात्सर्वगतोनामपुत्रोऽभवदित्यर्थः।२६।२७। उलूप्यांनागकन्यायां। मणिपूरपतेःसु
तायांपुत्रिकाधर्मेणदत्तायांबभ्रुवाहनमसूतअतस्तत्पुत्रःसन्नपिसःपुत्रिकासुतमातामहसुतइत्यर्थः।२६।

भा० न० २९ ॥ ३२ ॥ तुरसंज्ञं पुरोहितं कृत्वा ॥ ३३ ॥ भविष्यानाह तस्य पुत्र इति यावत्समाप्तिः । याज्ञवल्क्यात् क्रियाज्ञानं ॥ परंत्वात्मज्ञानं शौनकात् प्रा
६५ प्स्यति ॥ अत्रास्त्रज्ञानं शौनकाच्चकृपाचार्यादिति द्रष्टव्यं ॥ याज्ञवल्क्यात्त्रयीमधीत्य कृपादस्त्राण्यवाप्स्यतीति वैशंपायनोक्तेः ॥ क्वचित्तु अस्त्रज्ञानं

ततस्तातः सुभद्रायामभिमन्युरजायत ॥ सर्वातिरथजिद्वीर उत्तरायां ततो भवान् ॥ २९ ॥ परिक्षीणेषु कुरुषु द्रौणेर्ब्रह्मास्त्र
तेजसा ॥ त्वं च कृष्णानुभावेन सजीवो मोचितोऽन्तकात् ॥ ३० ॥ तवेमे तनयास्तात जनमेजयपूर्वकाः ॥ श्रुतसेनो भीमसे
न उग्रसेनश्च वीर्यवान् ॥ ३१ ॥ जनमेजयस्त्वां विदित्वा तक्षकान्निधनं गतं ॥ सर्पान्वै सर्पयागाग्नौ स होष्यति रुषान्वितः
॥ ३२ ॥ कावषेयं पुरोधाय तुरं तुरगमेधयाट् ॥ समंतात्पृथिवीं सर्वां जित्वा यक्ष्यति चाध्वरैः ॥ ३३ ॥ तस्य पुत्रः शतानीको या
ज्ञवल्क्यात्त्रयीं पठन् ॥ अस्त्रज्ञानं क्रियाज्ञानं शौनकात्परमेष्यति ॥ ३४ ॥ सहस्रानीकस्तत्पुत्रस्ततश्चैवाश्वमेधजः ॥ असी श्व
सीमकृष्णस्तस्यापि नेमिचक्रस्तु तत्सुतः ॥ ३५ ॥ गजाह्वये हृते नद्यां कौशांब्यां साधु वत्स्यति ॥ उक्तस्ततश्चित्ररथस्त
स्माच्छुचिरथः सुतः ॥ ३६ ॥ तस्माच्च वृष्टिमांस्तस्य सुषेणोऽथ महीपतिः ॥ सुनीथस्तस्य भविता नृचक्षुर्यत्सुखीन
लः ॥ ३७ ॥ पारिप्लवः सुतस्तस्मान्मेधावी सुनयात्मजः ॥ नृपंजयस्ततो दूर्वस्तिमिस्तस्माज्जनिष्यति ॥ ३८ ॥ तिमेर्बृहद्
रथस्तस्माच्छतानीकः सुदासजः ॥ शतानीकाद्दुर्दमनस्तस्यापत्यं वहीनरः ॥ दंडपाणिर्निमिस्तस्य क्षेमको भविता नृपः ॥ ३९

च कृपाचार्यादित्येव पाठः ॥ ३४ ॥ ३७ ॥ यद्यस्मात्सुखीनलः पुत्रः तस्मात्पारिप्लवात्सुनयः ॥ यस्यात्मजो मेधावीत्यर्थः ॥ ३८ ॥ ६५
तस्मात्सुदासः ततः शतानीक इत्यर्थः ॥ ३९ ॥

४० बृहद्रथस्य जरासंधः तस्य सहदेवः तस्य मार्जारिः यस्मान्मार्जारेः श्रुतश्रवाः ॥ ४२ ॥ ४३ ॥ सहस्रसंवत्सरमेते भविष्यालाः ततः
२ ॥ परं भाव्यान् द्वादशस्कंधे वक्ष्यति ॥ ४५ ॥ इति नवमे द्वाविंशः त्रयोविंशे त्वनोस्तुर्वसोश्चान्वयः क्रमात् ॥ यदोश्च वंशोऽनुक्रान्तो यावद्यामघसं

भूतस्तत्रस्य वैधोक्त वंशो देवर्षिसत्कृतः ॥ क्षेमकं प्राप्य राजानं संस्थां प्राप्स्यति वै कलौ ॥ ४१ ॥ अथ मागधराजानो भवि
तारो वदामि ते ॥ भविता सहदेवस्य मार्जारिर्यच्छ्रुतश्रवाः ॥ ४२ ॥ ततोऽयुतायुतस्यापि निरमित्रोऽथ तत्सुतः ॥ सुनक्ष
त्रः सुनक्षत्राद्बृहत्सेनोऽथ कर्मजित् ॥ ४२ ॥ ततः श्रुतंजयाद्विप्रः शुचिस्तस्य भविष्यति ॥ क्षेमोऽथ सुव्रतस्तस्माद्ध
र्मसूत्रः शमस्ततः ॥ ४३ ॥ वृहत्सेनोथ सुमतिः सुबलो जनिता ततः ॥ सुनीथः सत्यजिदथ विश्वजिद्यद्रिपुंजयः ॥ बा
र्हद्रथाश्च भूपाला भाव्याः साहस्रवत्सरं ॥ ४४ ॥ इति श्रीभागवते महापुराणे नवमस्कंधे द्वाविंशोऽध्यायः ॥
श्रीशुक उवाच ॥ अनोः सभानरश्चक्षुः परेक्षुश्च त्रयः सुताः ॥ सभानरात्कालनरः संजयस्तत्सुतस्ततः ॥ १ ॥ ज
नमेजयस्तस्य पुत्रो महाशीलो महामनाः ॥ उशीनरस्तितिक्षुश्च महामनस आत्मजौ ॥ शिबिर्वनः शमिर्दक्षश्च
त्वारोशीनरात्मजाः ॥ २ ॥ वृषदर्भः सुवीरश्च मद्रः कैकय आत्मजाः ॥ शिबेश्चत्वार एवासंस्तितिक्षोश्च रुशद्रथः ॥ ३ ॥
ततो हेमोऽथ सुतपा बलिः सुतपसोऽभवत् ॥ अंगवंगकलिंगाद्याः सुह्मपुंड्रोड्रसंज्ञिताः ॥ ४ ॥ जज्ञिरे दीर्घतमसो ब
लेः क्षेत्रे महीक्षितः ॥ चक्रुः स्वनाम्ना विषयान् षडिमान् प्राच्यकांश्च ते ॥ ५ ॥

भवः ॥ २ ॥ तदेवं ययातेः पुत्राणां पंचमस्य पूरोर्वंशोऽनुक्रान्तः इदानीं चतुर्थस्य वंशमनुक्रामति अनोरिति कर्णस्य जगतीपतेरित्यंते
न ॥ २ ॥ तस्य जनमेजयस्य महाशीलः तस्य महामनाः चत्वार उशीनरात्मजाः ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

द्दे ॥ १६ ॥ सदुष्मंतः स्ववंशं पौरववंशं ॥ १७ ॥ १८ ॥ प्रथमस्य सहस्त्रजित आत्मजः ॥ २० ॥ कुंतेः सोहंजिः सोहंजेर्महिष्मान् ॥ महिष्मतो भ
खनपानोंगतोऽङ्गे तस्माद्दिविरथस्ततः ॥ सुतो धर्मरथो यस्य जज्ञे चित्ररथोऽप्रजः ॥ ६ ॥ रोमपाद इति ख्यातस्तस्मै
ना०न० दशरथः सखा ॥ शांतां स्वकन्यां प्रायच्छदृष्यशृंग उवहितां ॥ ७ ॥ देवेऽवर्षति यं रामा आनिन्युर्हरिणीसुतं ॥ नाट्यसंगीत
९६ वादित्रैर्विभ्रमालिंगनार्हणैः ॥ ८ ॥ स तु राज्ञोऽनपत्यस्य निरूप्येष्टिं मरुत्वतः ॥ प्रजामदाद्दशरथो येन लेभेऽप्रजः प्रजाः ॥ ९ ॥
चतुरंगो रोमपादात्पृथुलाक्षस्तु तत्सुतः ॥ बृहद्रथो बृहत्कर्मा बृहद्भानुश्च तत्सुताः ॥ १० ॥ आद्याद्बृहन्मनास्तस्माज्जयद्रथ उदा
हृतः ॥ विजयस्तस्य संभूत्यां ततो धृतिरजायत ॥ ११ ॥ ततो धृतव्रतस्तस्य सत्कर्माधिरथस्ततः ॥ यो सौ गंगातटे क्रीडन्मंजूषांत
र्गतं शिशुं ॥ कुंत्यापविद्धं कानीनमनपत्योऽकरोत्सुतं ॥ १२ ॥ वृषसेनः सुतस्तस्य कर्णस्य जगतीपते ॥ १३ ॥ द्रुह्योश्च तनयो
बभ्रुः सेतुस्तस्यात्मजस्ततः ॥ आरब्धस्तस्य गांधारस्तस्य धर्मस्ततो धृतः ॥ १४ ॥ धृतस्य दुर्मदस्तस्मात्प्रचेताः प्राचेतसं शतं
म्लेच्छाधिपतयोऽभवन्नुदीचीं दिशमाश्रिताः ॥ १५ ॥ तुर्वसोश्च सुतो वह्निर्वह्नेर्भर्गोऽथ भानुमान् ॥ त्रिभानुस्तत्सुतोऽस्यापि
करंधम उदारधीः ॥ १६ ॥ मरुतस्तत्सुतोऽपुत्रः पुत्रं पौरवमन्वभूत् ॥ दुष्मंतः स पुनर्भेजे स्ववंशं राज्यकामुकः ॥ १७ ॥ ययातेर्ज्ये
ष्ठपुत्रस्य यदोर्वंशं नरर्षभ ॥ वर्णयामि महापुण्यं सर्वपापहरं नृणां ॥ १८ ॥ यदोर्वंशं नरः श्रुत्वा सर्वपापैः प्रमुच्यते ॥ यत्रावती
र्णो भगवान्परमात्मा नराकृतिः ॥ १९ ॥ यदोः सहस्त्रजित्क्रोष्टा नलो रिपुरिति श्रुताः ॥ चत्वारः सूनवस्तत्र शतजित्प्रथमा
त्मजः ॥ २० ॥ महाहयो वेणुहयो हैहयश्चेति तत्सुताः ॥ धर्मस्तु हैहयसुतो नेत्रः कुंतेः पिता ततः ॥ २१ ॥ सोहंजिरभवत्कुंतेः
व महिष्मान्भद्रसेनकः दुर्मदो भद्रसेनस्य धनकः ॥ कृतवीर्यभूः कृताग्निः कृतवर्मा च कृतौजा धनकात्मजाः ॥ २२ ॥ ९६
द्रसेनकः ॥ तस्य दुर्मदो धनकश्चेति द्वौ पुत्रौ ॥ कृतवीर्यस्य तनक ॥ कृतवीर्यादयश्चत्वारो धनकस्यात्मजा इत्यर्थः ॥ २२

अनष्टमविनाशं वित्तं येन तथाविधं स्मरणं यस्य सः ॥ अव्ययं षड्वसु षडिंद्रियविषयं बुभुजे ॥ २५ ॥ और्वस्य तेजसा सगरेणोपसंहृतमित्यर्थः २६
तेषां तालजंघपुत्राणां जेष्ठः । तस्य मधोः पुत्रशतं । वृष्णिर्ज्येष्ठो येषु । यतो मधोर्वृष्णेर्यदोश्च हेतोः इह कुलं । २८ । २९ ॥ चतुर्दश महारत्ना
नि तज्ज्ञातिश्रेष्ठानि यस्य सः ॥ तानि च मार्कंडेयपुराणे वर्णितानि ॥ गजवाजिरथस्त्रीषुनिधिमाल्यांबरद्रुमाः शक्तिपाशमणिच्छत्रविमाना

अर्जुनः कृतवीर्यस्य स सप्तद्वीपेश्वरोऽभवत् । दत्तात्रेयाद्धरेरंशात्प्राप्तयोगमहागुणः ॥ २३ ॥ न नूनं कार्तवीर्यस्य गतिं यास्यं
ति पार्थिवाः यज्ञदानतपोयोगैः कृतवीर्यजयादिभिः ॥ २४ ॥ पंचाशीतिसहस्राणि ह्यव्याहतबलः समाः अनष्टवित्ता-
स्मरणो बुभुजेऽव्ययषड्वसु । २५ । तस्य पुत्रसहस्रस्य पंचैवोर्वरिता मृधे ॥ जयध्वजः शूरसेनो वृषभो मधुरूर्जितः ॥ २६ ॥ जय
ध्वजात्तालजंघस्तस्य पुत्रशतं त्वभूत् । तज्जं तत्तालजंघाख्यमौर्वतेजोपसंहृतं ॥ २७ । तेषां ज्येष्ठो वीतिहोत्रो वृष्णिः पुत्रो मधोः
स्मृतः । तस्य पुत्रशतं त्वासीद्वृष्णिर्येषां यतः कुलं ॥ २८ ॥ माधवा वृष्णयो राजन्यादवाश्चेति संज्ञिताः ॥ यदुपुत्रस्य च क्रोष्टोः
पुत्रो वृजिनवांस्ततः ॥ २९ ॥ स्वाहिस्ततो रुशेकुर्वै तस्य चित्ररथस्ततः ॥ शशबिंदुर्महायोगी महाभोजो महानभूत् । चतुर्द
शमहारत्नश्चक्रवर्त्यपराजितः ॥ ३० ॥ तस्य पत्नीसहस्राणां दशानां महायशाः ॥ दशलक्षसहस्राणि पुत्राणां तास्वजीजनत्
॥ ३१ । तेषां तु षट्प्रधानानां पृथुश्रवस आत्मजः ॥ धर्मो नामोशनास्तस्य हयमेधशतस्य याट् ॥ ३१ । तत्सुतो रुचकस्तस्य पं-
चासन्नात्मजाः शृणु ॥ पुरुजित्रुक्मेषुपृथुज्यामघसंज्ञिताः ॥ ३२ ॥

तिचतुर्दशेति । ३० । दशानां पत्नी सहस्राणां भार्याणां तस्य
प्रत्येकं लक्षं लक्षमित्येवं तासु पुत्राणां दशलक्षसहस्राणि जनयामास । ३१ । पृथुश्रवाः पृथुश्रवा इत्यादयः षट् प्रधानाः । श्रेष्ठा येषां ते
षां मध्ये । ३१ । पंच आत्मजा आसन् तान् शृणु तानेवाह पुरुजिदिति ॥ ३२ ॥

न०९० त०
६७

भार्याभयादेवैकभार्यस्य वंध्यापतेऽप्यामघस्य अपुत्रस्य तत्कृपयैव पुत्रप्रदमभवदिति दर्शयन्नाह ज्यामघास्त्विति ॥ ३४ ॥ यदि मे सपत्नीसा
त्तर्हि सुखेयमुद्वहेतापि न त्वेतरस्त्रीत्याह असपत्नी चेति ॥ ३६ ॥ अतिभयव्याकुल आह जनयिष्यसीति ॥ भार्याभयप्रकंपमानस्त्विन्नसर्वां
गस्य राज्ञः प्राणसंकटमालोक्यानुकंपितास्तेन सर्वकालमराधितो विश्वेदेवाः पितरश्च तथास्त्वित्यन्वमोदन् ॥ ३७ ॥ ततश्च

कमनेतान्या

ज्यामघस्त्वप्रजोऽप्यन्यां भार्यां शैब्यापतिर्भयात् ॥ नाविंदच्छत्रुभवनाद्भोज्यां कन्यामहार्षीत् ॥ ३४ ॥ रथस्थां तां निरीक्ष्या
ह शैब्या पतिममर्षिता ॥ केयं कुह[illegible]रथमारोपितेति वै ॥ ३५ स्नुषा तवेत्यभिहिते स्मयंती पतिमब्रवीत् ॥ अहं वंध्याऽ
सपत्नी च स्नुषा मे युज्यते कथं ॥ ३६ ॥ जनयिष्यसि यं राज्ञि तस्येयमुपयुज्यते ॥ अन्वमोदंत तद्विश्वेदेवाः पितर एव च ॥ ३७ ॥
शैब्या गर्भमधात्काले कुमारं सुषुवे सुतं ॥ स विदर्भ इति प्रोक्त उपयेमे स्नुषां सतीं ॥ ३८ ॥ इति श्रीभागवते महापु
राणे नवमस्कंधे यदुवंशानुकथनं नाम त्रयोविंशतितमोऽध्यायः ॥ २३ ॥ श्रीशुक उवाच ॥ तस्यां विदर्भो
ऽजनयत्पुत्रौ नाम्ना कुशक्रथौ ॥ तृतीयं रोमपादं च विदर्भकुलनंदनं ॥ १ ॥ रोमपादसुतो बभ्रुः बभ्रोः कृतिरजायत ॥ उशि
कस्तत्सुतस्तस्माच्चेदिश्चैद्यादयो नृपाः ॥ २ ॥

देवताप्रसादेन जनयिष्यसीति प्रतिवचनमुक्तं ते गुरोर्न च निरुत्तरः स्त्वापि शैब्या गर्भमधात् ॥ तस्य च महिमा पराशिभिरुक्तः ॥ यथोक्तं
नार्यो बह्व्यपास्तु ये केचिद्भविष्यंत यथवाऽमृताः ॥ तेषां तु ज्यामघः श्रेष्ठः शैब्यापतिरभूत्पत्नीपद्गति ॥ ३८ ॥ इति नवमे त्रयोविंशः ॥
॥ २३ ॥ चतुर्विंशे विदर्भस्य पुत्रत्रयसमुद्भवाः ॥ वंशाना नामुखाः प्रोक्ता रामकृष्णोद्भवावधि ॥ १ ॥ १ ॥ चैद्यादयः दमघोषादयः ॥ २ ॥ ६७

३ ततोदशरथात्तस्माच्छकुनिः पुत्राणामंतरादेवमादि विंत्रोयोऽस्य ॥ ४ ॥ ततः कुरुवशादनुः ॥ ५ ॥ अतोः पुत्रः पुरुहोत्रः महाभोजश्चेत्येवं सप्त
मारिषहेआर्ये ॥ ६ ॥ ८ ॥ तत्तदुपदेशभेदेन ये पंचषष्ट्यादि संख्याः पुत्रुषाः ते अमृतत्वमोक्षं प्राप्ताः ॥ ९ ॥ १० ॥ तस्य युधाजितः सिनि
क्रथस्तु कुंतिः पुत्रोभूत् दृष्णिस्तस्याथ निर्वृतिः ॥ ततोदशार्हो नामाभूत्तस्य व्योमः सुतस्ततः ॥ ३ ॥ डीमृतोविकृति
स्तस्य यैभीमरथः सुतः ॥ ततोनवरथः पुत्रोजातोदशरथस्ततः ॥ ४ ॥ करंभिः शकुनेः पुत्रोदेवरातस्तदात्मजः ॥ देवक्ष
त्रस्ततस्तस्य मधुः कुरुवशादनुः ॥ ५ ॥ पुरुहोत्रस्त्वऽनोः पुत्रस्तस्यायुः सात्वतस्ततः ॥ भजमानोभजिर्दिव्योदृष्णिर्देवा
दृधोंधकः ॥ सात्वतस्यसुताः सप्त महाभोजश्चमारिष ॥ ६ ॥ भजमानस्यनिम्लोचिःकिंकणोधृष्टिरेवच ॥ एकस्या
मात्मजाः ॥ पत्न्यामन्यस्यांच त्रयः सुताः शताजिच्च सहस्राजिदयुताजिदितिप्रभो ॥ ७ ॥ बभ्रुर्देवादृधसुतस्तयोः श्लो
कौपठंत्यऽमू ॥ यथैव शृणमो दूरात्संपश्यामस्तथांतिकात् ॥ ८ ॥ बभ्रुः श्रेष्ठोमनुष्याणां देवैर्देवादृधः स
म पुरुषाः पंचषष्टिश्च षट् सहस्राणिचाष्टच ॥ ९ ॥ येऽमृतत्वमनुप्राप्ता बभ्रोर्देवादृधादपि ॥ महाभोजो
पि धर्मात्माभोजाआसंस्तदन्वये ॥ १० ॥ दृष्णेः सुमित्रः पुत्रोभूद्युधाजिच्चपरंतप ॥ सिनिस्तस्यानमित्रश्च निम्नोभूद
नमित्रतः ॥ ११ ॥ सत्राजितः प्रसेनश्च निम्नस्याप्यासतुः सुतो ॥ अनमित्रसुतोयोन्यः सिनिस्तस्यच सत्यकः ॥ १२ ॥ यु
युधानः सात्यकिर्वैजयस्तस्यकुणिस्ततः ॥ युगंधरोनमित्रस्य दृष्णिः पुत्रोपरस्ततः ॥ १३ ॥ श्वफल्कश्चित्ररथश्चैवा
गांदिन्यांतु श्वफल्कतः ॥ अक्रूरप्रमुखाआसन् पुत्राद्वादशविश्रुताः ॥ १४ ॥

अनमित्रस्य
चेन्नपरः स
निनाम पुत्रस्त
स्य सात्यकः

रतमित्रश्च ११ । १२ सात्यकिः सत्यकस्य
पुत्रोयुयुधानः ॥ तस्य जयस्तस्य कुणिः ततः कुणेर्युगंधरं ॥ अनमित्रस्यैवापरः दृष्णिर्नामपुत्रः ॥ १३ ॥ अक्रूरः प्रमुखोयेषामित्यतद्गुण

सविकाशतिव ९ स्कं ॥ ९६ ॥

ति

ना० न० अतोक्रूरातिरिक्तान्द्वादशाहयति आसंगइति॥२५॥२६॥ रथपुरेकः विदूरथा याश्चान्ये च बहवः॥ विदूरथधामाधा इति पाठे॥ आद्यु
९६ क शब्देन विदूरथो प्युक्तः ततश्च शूरो विदूरथादासीदिति वक्ष्यमाणनिर्देशोपपत्तिः॥२७॥ कुकुरादयश्चत्वारोधंकस्य सुता इति ज्ञेयं

आसंगः सारमेयश्च मृदुरो मृदुविद्गिरिः॥ धर्मवृद्धः सुकर्मा च क्षेत्रोपेक्षोऽरिमर्दनः॥२५॥ शत्रुघ्नो गंधमादश्च
प्रतिबाहुश्च द्वादश तेषां स्वसा सुचारा ख्याता क्रूरसुतावपि॥२६॥ देववानुपदेवश्च तथा चित्ररथात्मजाः पृ
थुर्विदूरथाद्याश्च बहवो वृष्णिनंदनाः॥२७॥ कुकुरो भजमानश्च शुचिः कंबलबर्हिषः॥ कुकुरस्य सुतो वृष्णिर्विलो
मा तनयस्ततः॥२८॥ कपोतरोमा तस्यानुः सखा यस्य च तुंबुरुः॥ अंधको दुंदुभिस्तस्मादरिद्योतः पुनर्वसुः॥२९॥ तस्या
हुकश्चाहुकी च कन्या चैवाहुकात्मजौ॥ देवकश्चोग्रसेनश्च चत्वारो देवकात्मजाः॥ देववानुपदेवश्च सुदेवो
देववर्द्धनः॥२०॥ तेषां स्वसारः सप्तासन् धृतदेवादयो नृप॥ शांतिदेवोपदेवा च श्रीदेवा देवरक्षिता॥ सहदेवा दे
वकी च वसुदेवमुपाहृताः॥२१॥ कंसः सुनामा न्यग्रोधः कंकः शंकुः कुहस्तथा॥ राष्ट्रपालोऽथ सृष्टिश्च तुष्टिमानौ
ग्रसेनयः॥२२॥ कंसा कंसवती कंका सूरभू राष्ट्रपालिका॥ उग्रसेनदुहितरो वसुदेवानुजस्त्रियः॥

यथा श्रीपराशरः कुकुरभजमानशुचिकंबलबर्हिषाख्यास्तथांधकस्य पुत्रा इति॥२८॥ अनोरंधकः अंधकात् दुंदुभिरिति
तद्वचनाद्देवज्ञेयं॥२९॥२०॥ धृतदेवा आदिर्यासां शांतिदेवादीनां गणिताः सप्त॥२१॥ औग्रसेनयः उग्रसेनस्य सुताः॥२२॥ व
सुदेवस्यायेऽनुजा हे वभागादयस्तेषां स्त्रियो भार्याः॥२२॥ अंधकस्य सुतानां चतुर्णां प्रथमस्य कुकुरस्य वंश उक्तः॥ ९८

द्वितीयस्य भजमानस्य वंशमाह ॥ शूरो विदूरथादिति ॥ भजमानाच्च विदूरथः पुत्रोऽभवत् विदूरथाच्च शूर इति पराशरादिवचनात् । यद्वा
पृथुविदूरथाद्याश्चेति पर्वोक्तः । चित्ररथात्संजात विदूरथात्तद्देवमीढस्य यः शूरो नाम पुत्रः ॥ तस्माद्देवमीढो हृदीकस्य सुतः ।-
यथाह पराशरः ॥ तस्यापि शतधनुर्देवमीढाद्याः पुत्राः बभूवुः । देवमीढस्य शूरः तस्य मारिषा नाम पत्न्यभवत् ॥ तस्यां चासौ दश पु

शूरो विदूरथादासीद्भजमानः सुतस्ततः ॥ सिनिस्तस्मात्स्वयंभोजो हृदीकस्तत्सुतो मतः ॥२६॥ देववाढः शतधनुः कृ
तवर्मेति तत्सुताः ॥ देवमीढस्य शूरस्य मारिषा नाम पत्न्यभूत् ॥२७॥ तस्यां स जनयामास दश पुत्रानकल्मषान् ॥ वसुदेव
देवभागं देवश्रवसमानकं ॥२८॥ सृंजयं श्यामकं कंकं शमीकं वत्सकं वृकं ॥ दुंदुभयो नेदुरानका यस्य जन्मनि ॥२९॥
वसुदेवं हरेः स्थानं वदंत्यानकदुंदुभिं ॥ पृथा च श्रुतदेवा च श्रुतकीर्तिः श्रुतश्रवा ॥३०॥ राजाधिदेवी चैतेषां भ
गिन्यः पंच कन्यकाः कुंतेः सख्युः पिता शूरो ह्यपुत्रस्य पृथामदात् ॥३१॥ सा च दुर्वाससा विद्यां देवहूतीं प्रतोषि
ती ॥ तस्या वीर्यपरीक्षार्थमाजुहाव रविं शुचिः ॥ तदैवोपागतं देवं वीक्ष्य विस्मयमानसा ॥ प्रत्ययार्थं प्रयुक्ता मे
याहि देव क्षमस्व मे ॥३३॥ अमोघं दर्शनं देवि आदत्से त्वयि चात्मजं ॥ योनिर्यथा न दुष्येत कर्त्ताहं ते सुमध्यमे
॥३४॥

त्रानजनयत् । वसुदेवपूर्वाणीति आनकाश्च नेदुः प्रादुर्भावस्यस्थानात् ॥ पृथाद्याः कन्यकास्तासां कर्णोत्पत्तिप्रकारमाह ॥
कुंतेरिति पंचभिः । कदाचिद्गृहमागतं दुर्वाससं पृथा परिचर्यादिना तोषयामास ॥ ततश्च तस्माद्देवाह्वानहेतुविद्यामवाप ॥ तदाह सा
चेति । देवमुपागतं वीक्ष्य सा प्राह प्रत्ययार्थं परीक्षार्थं मया विद्या प्रयुक्ता न तु त्वया किंचित्कार्यमित्यभिसंधिना अतो याहीत्येवमुक्ते रवि-
रुवाच । अमोघं देवदर्शनमिति कन्याहमिति चेत्तत्राह ॥ यथा योनिर्न दुष्येत तथाहं कर्त्ता करिष्यामि ॥३४

आवंत्यौ विंदानुविंदौ ॥३४॥ तदेवं वसुदेवस्य भगीनीनां पतीन् प्रोक्ता तत्तत्तनयांस्तावत् पत्नीपुत्रांश्चाह देवभागस्येति नवभिः श्लोकैः ॥४०॥ वसुदेवस्य

इति तस्यां स आधाय गर्भं सूर्यो दिवं गतः सद्यः कुमारः संजज्ञे द्वितीय इव भास्करः ॥३५॥ तं सात्यजन्नदीतोये कृच्छ्राल्लोकस्य वि
भ्यती ॥ प्रपितामहस्तामुवाह पांडुर्वै सत्यविक्रमः ॥३६॥ श्रुतदेवां तु कारूषो वृद्धशर्मा समग्रहीत् ॥ यस्यामभूद्दंतवक्र ऋषि
शप्तो दितेः सुतः ॥३७॥ कैकयो धृष्टकेतुश्च श्रुतकीर्तिमविंदत ॥ संतर्दनादयस्तस्यां पंचासन्कैकयाः सुताः ॥३८॥
राजाधिदेव्यामावंत्यौ जयसेनोऽजनिष्ट ह ॥ मदघोषश्चेदिराजः श्रुतश्रवसमग्रहीत् ॥३९॥ शिशुपालः सुतस्तस्याः कथि
तस्तस्य संभवः ॥ देवभागस्य कंसायां चित्रकेतुबृहद्बलौ ॥४०॥ कंसवत्यां देवश्रवसः सुवीर इषुमांस्तथा ॥ कंकायामान
काज्जातः ॥ सत्यजित्पुरजित्तथा ॥ सृंजयो राष्ट्रपाल्यां च वृषदुर्मर्षणादिकान् ॥ हरिकेशहिरण्याक्षौ शूरभूम्यां च श्या
मकः ॥ मिश्रकेश्यामप्सरसि वृकादीन्वत्सकस्तथा ॥ तक्षपुष्करशालादीन् दुर्वाक्ष्यां वृक आदधे ॥४३॥ सुमित्रार्जुन
पालादीन्समीकात्तु सुदामिनी ॥ कंकस्य कर्णिकायां वै ऋतधामजयावपि ॥४४॥ पौरवी रोहिणी भद्रा मदिरा रोचना इ
ला ॥ देवकीप्रमुखा आसन्पत्न्य आनकदुंदुभेः ॥४५॥ बलं गदं सारणं च दुर्मदं विपुलं ध्रुवं ॥ वसुदेवस्तु रोहिण्यां कृता
दीनुदपादयत् ॥४६॥ सुभद्रो भद्रबाहुश्च दुर्मदो भद्र एव च ॥ पौरव्यास्तनया ह्येते भूताद्या द्वादशाभवन् ॥४७॥ नंदोपनंदकृ
तकशूराद्या मदिरात्मजाः ॥ कौशल्या केशिनं त्वेकमसूत कुलनंदनं ॥४८॥ रोचनायामतो जाता हस्तहेमांगदादयः ॥ इ
लायां पुरुवल्कादीन् यदुमुख्यानजीजनत् ॥४९॥ विपृष्ठो धृतदेवायामेक आनकदुंदुभेः ॥ शांतिदेवात्मजा राजन्प्रशमप्र
तिश्रुतादयः ॥५०॥ राजन्यकल्पवर्षाद्या उपदेवासुता दश ॥ वसुहंससुवंशाद्याः श्रीदेवायास्तु षट् सुतान् ॥५२॥

पत्नीपुत्रांश्चाह पौरवीत्येकादशभिः ॥४५॥ कौशल्याभद्रा ॥४८॥ ४९॥

अष्टमस्तु स्वयमासीत न तु कर्मादीनां हेतुतां नाता आत्मांऽजनितो वा ॥ यतोऽसौ हरिः तदेवोपपादयति ॥ यदेति त्रिभिः ईशस्य मायानियंतुः ॥ परस्य अ
संगस्य द्रष्टुः साक्षिणः आत्मनः सर्वगस्य न ह्येवंभूतस्य मायाविनोदं विना जन्मनः कर्मणो वा हेतुः संभवतीत्यर्थः किंच यस्य मायाचेष्टितं पुंसो
जीवस्यानुग्रहः । तस्य सर्वजीवानुग्राहकस्य कुतः ॥ कर्मादिपारतंत्र्येण जन्मादिसंभवः ॥ अनुग्रहमेवाह हि यस्मात् देवस्थित्याद्य इष्यते अ

देवरक्षितया लब्ध्वा नव पुत्रानगदादयः ॥ वसुदेवः सुतानष्टावादधे सह देवया ॥५२॥ पुरुविश्रुत मुख्यांस्तु साक्षाद्धर्मो
वसूनिव ॥ वसुदेवस्तु देवक्यामष्टपुत्रानजीजनत ॥५३॥ कीर्तिमंतं सुषेणं च भद्रसेनमुदारधीः ॥ ऋजुं संमर्दनं भद्रं
संकर्षणमहीश्वरं ॥५४॥ अष्टमस्तु तयोरासीत्स्वयमेव हरिः किलः ॥ सुभद्रा च महाभागा तव राजन् पितामही ॥५५॥
यदा यदा हि धर्मस्य क्षयो वृद्धिश्च पाप्मनः ॥ तदा तु भगवानराजन आत्मानं सृजते हरिः ॥५६॥ न ह्यस्य जन्मनो हेतुः कर्म
णो वा महीपते ॥ आत्ममायां विनेशस्य परस्य द्रष्टुरात्मनः ॥५७॥ यन्मायाचेष्टितं पुंसः ॥ स्थित्युत्पत्त्यप्ययाय हि ॥ अनु
ग्रहस्तन्निवृत्तेरात्मलाभाय चेष्यते ॥ अक्षौहिणीनां पतिभिरसुरैर्नृपलांछनैः ॥ भुव आक्रम्यमाणाया अभारा
य कृतो घमः ॥५९॥ कर्माण्यपरिमेयानि मनसापि सुरेश्वरैः ॥ सहसंकर्षणश्चक्रे भगवान्मधुसूदनः ॥६०॥

लये लीनोपाधेर्जीवस्य धर्मोद्भवसंभवाद्युपाधि ॥ सृष्ट्यादीनां धर्मसंपादनेनानुग्रहो तथा आत्मलाभाय मोक्षाय इष्यते ॥ तत्र हेतुः ते
नैव क्रियमाणेन तस्य स्थित्यादेः निवर्तेत ॥५८॥ तस्य चेष्टितं भूमेरनुग्रह इत्याह ॥ अक्षौहिणीनामिति द्वाभ्यां अभाराय भारपरि
हाराय ॥५९॥ सुरेश्वरैरपि मनसापि अपरिमेयानि अतर्क्याणि संकर्षणसहितश्चक्रे ॥६०॥

भा० न०
५० संकल्पमात्रेणाभूतारहरणसमर्थस्याधिकमेकरणं यशोविस्तारद्वाराभक्तानुग्रहार्थमित्याह कलाविति द्वाभ्यां ॥ दुःखशोकतमांसि तुदती
तथा यशोप्यतनोत् ॥ ६२ ॥ यस्मिन् सतां कर्णपीयूषे यशोरूपे तीर्थवरे श्रोत्रमेवांजलिः पानसाधनं यस्य स पुरुषः सकृदपि उपस्पृश्य आ
चमनमात्रं कृत्वा तत्सौहृदयन्नचित्कर्मवासनां धुनते ॥ ६२ ॥ तदेवाह द्वाभ्यां ताडादिभिः श्लाघनीयमीहितं यस्य ॥ ६३ ॥ सर्वैरंगैः रम्य

कलौ जनिष्यमाणानां दुःखशोकतमोनुदं ॥ अनुग्रहाय भक्तानां सुपुण्यं व्यतनोद्यशः ॥ ६१ ॥ यस्मिन्सत्कर्णपीयूषे य
व शस्तीर्थे सकृत ॥ श्रोत्रांजलिरुपस्पृश्य धुनते कर्मवासनां ॥ ६२ ॥ भोजवृष्ण्यंधकमधुशूरसेनदशार्हकैः श्लाघनीये
हितः शश्वत कुरुसृंजयपांडुभिः ॥ ६३ ॥ स्निग्धस्मितेक्षितोदारैर्वाक्यैर्विक्रमलीलया नृलोकं रमयामास मूर्त्यास
र्वांगरम्यया ॥ ६४ ॥ यस्याननं मकरकुंडलचारुकर्णभ्राजत्कपोलसुभगं सुविलासहासं ॥ नित्योत्सवं न ततृपु
र्दृशिभिः ॥ पिबंत्यो नार्यो नराश्च मुदिताः कुपिता निमेश्च ॥ ६५ ॥

यामूर्त्याच ॥ ६४ ॥ तत्रप्रदर्शनार्थं मुखशोभामाह ॥ यस्याननं दृशिभिर्नेत्रैः पिबंत्यो नार्यो नराश्च न ततृपुः तृप्ताः ॥ निमिषोन्मेषमात्र
व्यवधानमप्यसहमानास्तत्कर्तुर्निमेः कुपिताश्च बभूवुः ॥ कथंभूतमाननं मकरकुंडलाभ्यां चारुकपोलकर्णौ भ्राजंतौ कपोलौ च तैः सुभगं सवि
लासहासो यस्मिन् ॥ नित्यमुत्सवो यस्मिन् ॥ ६५ ॥

श्रीकृष्णस्यचरितंसमासेनोपवर्णयतिजातइतिद्वाभ्यांजातोजनरूपेणापश्चात्पुरुषोमनुष्याकारः सन्व्रजंगतः॥ व्रजवानांराधितो
ऽर्थो येनतेषुदारेषुसुतानांशतान्युत्पाद्य॥ आत्मनिगमस्वकीयवेदमार्गंग्रंथितः॥ समुद्दीपेनकलिनानिमितेनगुरुभारंक्षपयन्दृष्ट्येव
भूपचमूर्विधूयविजयेजयंअर्जुनमित्येवमुद्घोष्यंकृत्वापरंतत्वमुद्धवायोपदिश्यस्वधामसम्यक्तेनैवरूपेणाजगामेति ॥ इतिश्री

जातोगतःपितृगृहाद्व्रजमेधितार्थोहत्वारिपून्सुतशतानिकृतोरुदारः॥ उत्पाद्यतेषुपुरुषः क्रतुभिःसमीजे
आत्मानमात्मनिगमंप्रथयन्जनेषु॥ ६६॥ पृथ्व्याःसवैगुरुभरंक्षपयन्कुरूणामंतः॥ समुत्थकलिनायुधि
भूपचम्वः॥ दृष्ट्याविधूयविजयेजयमुद्विघोष्यप्रोच्योद्धवायचपरंसमगात्स्वधाम॥ ६७॥ इतिश्रीभागव
तेमहापुराणेनवमस्कंधेश्रीसूर्यसोमवंशानुवर्णनंनामचतुर्विंशोध्यायः॥ २४॥

श्रीभागवतेमहापुराणेश्रीधराचार्यकृतायांभावार्थदीपिकायांनवमस्कंधेचतुर्विंशोध्यायः॥ २४॥ यादृशंपुस्तकंदृष्टंता
दृशंलिखितंमया। यदिशुद्धमशुद्धंवाममदोषोनदीयते॥ १॥ भुग्नपृष्टिकटिग्रीवाउर्द्धमुखप्रकीर्तिता॥ सर्वरत्नसमायुक्तंयत्नेनपरिपाल
येत्॥ २॥ संवत् १८।३८॥ शुभेआसोजमासेशुक्लपक्षेतिथौएकादश्यांभृगुवासरे लिखितंबालकृष्णब्राह्मणलोहार्गलमध्ये।
पठनार्थंश्रीस्वामीजीचैतन्यदासजीकोशिष्यगंगाविष्णुदासस्वयंपठनार्थंवानुपगारार्थं शुभंमंगलं॥ श्रीराधाकृष्णचंद्रजी